
अच्युतग्रन्थमालाया दशमं प्रसूनम्

विद्वद्वरश्रीरसिकोत्तंसरचितं

प्रेमपत्तनम्

स्वोपज्ञप्रेमसर्वस्वसमेतम्



प्रकाशनस्थानम्—
अच्युतग्रन्थमालाकार्यालयः, काशी

अच्युतग्रन्थमालाया दशमं प्रसूनम्

विद्वद्वरश्रीरसिकोत्तंसरचितं

प्रेमपत्तनम्



स्वोपज्ञप्रेमसर्वस्वसमेतम्

काशिकश्रीजोखीराममटरूमल्लगोयनका-संस्कृतमहाविद्यालय-पुस्तकालयाध्यक्षेण अच्युतग्रन्थमालाध्यक्षेण च साहित्याचार्य-

श्रीकृष्णपन्तशास्त्रिणा


सम्पादितम्

प्रकाशनस्थानम्—
अच्युतग्रन्थमालाकार्यालयः, काशी



प्रथमावृत्तिः १५००]   सं० १९८९   [मूल्यम् १)

प्रकाशकः—श्रेष्ठिप्रवरः श्रीगौरीशङ्करगोयनका,
अच्युतग्रन्थमाला-कार्यालयः,
काशी।



मुद्रकः—
माधव विष्णु पराड़कर,
ज्ञानमण्डल यन्त्रालय, काशी।

॥ श्रीः ॥

भूमिका

गोलोकधामपतये प्रकाशचयमूर्तये ।
नमोऽस्तु वासुदेवाय भक्त्यानन्दविवृद्धये ॥
[स्क० पु० वै० ख०]

उपक्रमः

अयि गीर्वाणवाणीप्रणयिनः कृष्णचरणप्रणतिपरायणा मनीषिणः! अच्युतग्रन्थमालाया दशमं प्रसूनं प्रेमपत्तनाभिधमेतदनुत्तमं ग्रन्थरत्नं सम्मुद्य प्रकाश्यते। नूनं नूत्नमपीदं प्रेमपूरप्रसारप्रवणानि चिरत्नानि ग्रन्थरत्नानि नितरामतिशेते। अतोऽद्यावधि ध्वान्तविलीनमिदं निरस्तद्वेषादिदूषणानां भक्तिभूषणानां करारविन्दयोः सादरमुपहरतामस्माकं प्रीतिरीदृक्तया इयत्तया वा सीमानं नाधिरोहति।

कृतिरियं रतिपतिभक्तावतंसस्य रसिकोत्तंसस्य माध्वगौडीयसम्प्रदायमनुसरति। कोऽयं माध्वगौडीयसम्प्रदायः, कश्चास्य प्रवर्त्तयिता, कुतः सम्प्रदायादस्य समुद्भवः, के मुख्यमुख्या अस्य सिद्धान्ताः—इत्येतत्सम्प्रदायतत्त्वमविदुषां विदुषां स्वान्ते समुल्लसतां सन्देहसन्देहानां समाधिरिह न भवेदप्रकृत इति एतद्विषये किञ्चित्प्रस्तूयते—

गौडीयसम्प्रदायोऽसि वङ्गे प्रचुरप्रचारः। अस्यापरं नाम चैतन्यसम्प्रदाय इति। अस्य प्रवर्त्तयितारो भगवन्तश्चैतन्यचन्द्रमहोदयाः १४८५ तमे ईशवीये नवद्वीपं जनुषा विभूषयामासुः। महापुरुषाणाममीषां पितृचरणाः पुण्यपरा जगन्नाथमिश्रनामानः पुरन्दरेत्यपरनाम्नाऽपि प्रथितिमुपगता आसन्। एषां जननी सौशील्येन सौन्दर्येण सौभाग्येन पतिनाम्ना च जयन्तजननीमनुकुर्वाणापि स्वनाम्नापि ताम-

न्यकरोत्। अचरमे वयसि निमाईनाम्ना प्रतीताश्चैतन्यमहोदया गङ्गाधरनाम्नः कस्यचिच्छाब्दिकस्य शालायां शब्दविद्यामनवद्यमन्वशीलयन्। अचिरेणामी लब्धवर्णा व्याकरणे संवृत्ताः। यदाऽऽसन्नमी समासन्नद्वादशवर्षावसितयस्तदैवैषां पितृचरणाः पुरन्दरमहोदयाः पुरन्दरपुरातिथितामुररीचक्रुः। पितृवियोगजेनाभीलकुलेन भृशमाकुला अप्यमी महापुरुषतया स्वाध्यायसमुदयान्नो व्यचलन्। अपि तु सर्वमिमं प्रत्यूहव्यूहं धैर्येण प्रसह्याधिकमनोयोगेनाध्ययने प्रवृत्ता अभूवन्। पितृमृत्योर्वर्षत्रयानन्तरं नवद्वीपनिवासिनो वल्लभाचार्यस्यात्मजया साकमभूदुपयमनमेषाम्। एभिश्चिरमन्तेवसन्तो विद्यां लम्भिताः। न्यायदर्शनस्यैका वृत्तिरपि विरचिता, परं सा नेदानीमुपलभ्यते। एत एव महानुभावाः सन्ति गौडीयसम्प्रदायस्य प्रवर्त्तयितारः, न खलु प्रवर्त्तयितार एव, अपि तूपास्यदेवा अपि। साम्प्रदायोऽसौ माध्वसम्प्रदायानुसारी माध्वसम्प्रदायादेषां सम्प्रदाये नास्ति कोऽपि विशेषो भेदः। माध्वसम्प्रदाये नव सिद्धान्ताः प्रसिद्धाः सन्ति, तेषु षट् तु अविकला एव स्वीकृताः। अवशिष्टानां त्रयाणां परिष्कारो महानुभावैरेभिर्विहित इति विश्रुतचरम्। अत एतत्सम्प्रदायदिगपि संक्षेपेणात्र प्रदर्श्यते—

मध्वाचार्यमतदिशा

मध्वाचार्यवर्य्याः ११ शततमे ईशवीयेऽवनिमण्डलमलञ्चक्रुः। महामहिमशालिभिस्तैरनेके मठाः प्रतिष्ठापिताः ३७ ग्रन्थाश्चारचितास्तेषु ऋग्भाष्यादयः परां प्रथितिमुपगताः। मध्वाचार्यवर्य्याणां संक्षेपेणायमस्ति मतवादः—तेषां मतेऽस्ति नारायण एव सकलकारणकारणम्, सगुणः सविशेषश्च। जीवोऽणुपरिमाणो भगवतो दासः। वेदा नित्या अपौरुषेयाः। पञ्चरात्राध्ययनं जीवस्य परमावश्यकम्। ते कथयन्ति जगदस्ति तत्त्वतस्तथ्यम्, नेदं मरुमरीचिकेव, गगनमलिनिमेव, शुक्तिरजतमिव भ्रान्तिकलितम्। एषां मते पदार्थो द्विधा स्वतन्त्रोऽस्वतन्त्रश्च। अशेषसद्गुणसमवेतो भगवान् स्वतन्त्रतः पदार्थः।

जीवो जडं जगच्च अस्वतन्त्रं तत्त्वम्। जीवपरमात्मनोः, जीवयोः, परमात्मजगतोः, जीवजगतोश्चास्ति परस्परं भेदः। सन्ति तेषामत्रामी दृष्टान्ताः—

यथापक्षी च सूत्रञ्च नानावृक्षरसा यथा।
यथा नद्यः समुद्राश्च शुद्धोदलवणे यथा॥
चौरापहार्यौ च यथा यथा पुंविषया अपि।
तथा जीवेश्वरौ भिन्नौ सर्वदैव विलक्षणौ॥
वैलक्षण्यं तयोर्ज्ञात्वा मुच्यते बध्यतेऽन्यथा।
ब्रह्मा शिवः सुराद्याश्च शरीरक्षरणात् क्षराः॥
लक्ष्मीरक्षरदेहत्वादक्षराऽतः परो हरिः।
स्वातन्त्र्यशक्तिविज्ञानसुखाद्यैरखिलैर्गुणैः॥
निःसीमत्वेन ते सर्वे तद्वशाः सर्वदेवताः।
विष्णुं सर्वगुणैः पूर्णं ज्ञात्वा संसारवर्जितः॥
निर्दुःखानन्दभुङ् नित्यं तत्समीपे स मोदते।

इत्यादि महोपनिषदि द्रष्टव्यम्।

अत एव मध्वाचार्याः सर्वथा द्वैतवादिन उच्यन्ते। एषां मते जीवो भगवतो दास इत्युक्तपूर्वम्। ते कथयन्ति दासो यदि प्रभोः समानकक्षामङ्गीकुर्यात्तदा प्रभुस्तं दण्डयेत्। तथैव जीवो यदि 'अहं ब्रह्मास्मीति' भावमङ्गीकृत्य सकलकारणकारणेन नारायणेन सहात्मनोऽभेदभावनां विदध्यात्, तदा भगवान् तमधो नयति। तेषां मते निर्वाणमुक्तिस्तु शशशृङ्गमिवालीककथा। नारायणस्योत्कर्षज्ञानेन तस्मिन्ननन्या भक्त्या च सारूप्यसालोक्यादयो मुक्तयो भवितुमर्हन्ति। स्वतन्त्रस्य सेव्यस्य भगवतः प्रसादोपलब्धिरेवास्वतन्त्रस्य सेवकस्य जीवस्य चरमः पुरुषार्थः। भगवतो गुणोत्कर्षज्ञानमन्तरेण परमपुरुषार्थलाभो दुर्लभः। 'तत्त्वमसि' इत्यादिश्रुतिमौलिवाक्यश्रवणजेन ज्ञानेन तत्प्राप्तिरतीव दुःशका। केवलयोपासनयैव तत्प्राप्तिर्भवितुमर्हति। 'तत्त्वमसि' इत्यादिवाक्यानि तु अग्निर्माणवक इत्यादिवत् सादृश्यबोधकानि।

उपासना तावत्त्रिविधा—अङ्कननामकरणभजनभेदेन । अङ्कनं नाम शङ्खचक्रादिभिर्देहस्य लाञ्छनम् । नामकरणम्—नारायणनामानुसारिस्वसुतादेराख्याकरणम् । भजनं दशधा । तत्र मानसिकम्—दया, श्रद्धा, नारायणानुग्रहलाभः । वाचिकम्—तथ्यवचनम्, हितकथा, प्रियवचनम्, स्वाध्यायः । कायिकम्—दानम्, परिरक्षणम्, देवपूजनम्, इति । एतदेव सम्प्रदायमिममनुसरतां विपश्चितामपश्चिमं लक्ष्यम् । ततो नापरं कर्त्तव्यमवशिष्यते तेषाम् ।

ते समामनन्ति गुणातीतो नारायणो मायासम्प्रयोगेण त्रिगुणमयानि ब्रह्मविष्णुमहेश्वररूपाणि उररीकृत्य सर्गस्थितिप्रलयान् विदधाति । जीवान् कर्मानुसारेणोच्चावचा योनीर्ददाति । प्रत्यक्षानुमानशब्दा एषां मते प्रमाणानि । निर्विकल्पकं ज्ञानं नास्ति मन्यन्ते, एषैव भित्तिरेषां मतस्य । यत्र नास्ति ज्ञानस्य निर्विकल्पकत्वं तत्र विषयस्यावश्यं सत्यत्वम् । अतोऽमीषां मते जगत् सत् । ज्ञेयस्यासत्यतायां ज्ञानस्य स्फूर्तिरेव न भवितुमर्हतीति ते मन्यन्ते ॥

अत्रायमस्ति संग्रहश्लोकोऽपि—

श्रीमन्मध्वमते हरिः परतरः सत्यं जगत् तत्त्वतो
भेदो जीवगणा हरेरनुचरा नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनं
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥

चैतन्यमतसंक्षेपः

चैतन्यसम्प्रदायस्यामी सन्ति संक्षिप्ताः सिद्धान्ताः उपदेशाश्च—

भगवान् व्रजेन्द्रनन्दनोऽस्ति एषां परमोपास्यो देवः । गोपीमण्डलमण्डितं वृन्दावनमस्ति धाममूर्धन्यं सत्तीर्थम् । गोपीवर्गेण भगवतो या कल्पिता प्रेममयी काचिदुपासना सैवास्ति श्रेयसी सपर्या । श्रीमद्भागवतमेवास्ति परमं प्रमाणम् । भगवति नन्दनन्दनेऽमन्दानन्दकन्देऽनन्यप्रेमैवास्ति परः पुरुषार्थः ।

इष्टदेवे देवकीनन्दने निरतिशयप्रेमोत्पादनं मनसा, वचसा, कर्मणा तदनुगमनञ्च भजनमभिधीयते।

सन्ति भजनस्य तिस्रो विधाः—साधनभक्तिः, भावभक्तिः, प्रेमभक्तिरिति।

संसारेऽस्मिन्नसारे परमं दुरापं मनुजजनुश्चतुरशीतिलक्षयोनीः परिभ्रम्य—केनापि भागधेयसहायेनाधिगम्यते। तदुपलभ्य यैरिन्द्रियचयः परमपुरुषचरणारविन्दे मकरन्देऽलिसन्दोह इव संयोजितः, तेषामेव जनिः सफला, त एव धन्यतमाः।

निष्कामया भक्त्यैव भगवत्प्राप्तिः सुलभा, नान्यैस्तपोदानज्ञानादिभिरनल्पैः।

नास्तिकानां*सम्पर्कः, कुशिष्यकुमित्रादेर्ग्रहः, भगवद्भक्तावतंसैः सत्रा वार्तायां व्यवहारे च किमपि स्खलनम्, आलस्यवश्यत्वम्, निन्दितानां वृत्तानामत्यागः, परनिन्दनम्, शोकवशवर्त्तित्वम्, जीवनिहननम्, कलहः, परदाराभिमर्शनम्, अहङ्कारः, भगवत्सेवायामरतिः, भगवन्महिम्नि अर्थवादोऽयमिति मतिः, असद्देशेऽसमये वा इष्टमन्त्रोच्चारणम्, भगवन्नाम्नः केनाप्यन्येन पदार्थेन सन्तुलनम्, भगवन्निन्दाकर्णनं तत्समर्थनं वा सन्ति गरीयांसः पांसवः। एभ्यो नित्यं वैष्णवैर्विमुक्तैर्भाव्यम्।

प्रथमं भगवद्भक्तौ श्रद्धा, ततः सतां सङ्गः, ततो भगवत्सपर्य्या, ततोऽन्तरायसमुदायहानिः, तदनन्तरं निष्ठारुचिः, अनुपदं भावोदयः, तदनन्तरमुदेति प्रेमभक्तिः सैव पराकाष्ठा, परः पुरुषार्थः।

भगवान् व्रजेन्द्रसूनुरेव केवलमुपास्यः, परमन्येषां परिचर्य्याविधिर्न निन्द्यः।

---

* बहिर्मुखानां संगेन तच्छास्त्रश्रवणेन च। शास्त्राभ्यासेन बहुनाऽसजातीयातिसङ्गतः। अपि सत्तीर्थशिष्याणां रुध्यते प्रेमपद्धतिः॥

[प्रे० टीका पृ० २०]

विशुद्धः प्रेमैवास्ति परो धर्मः। कृष्णप्रेमैव विशुद्धः प्रेमा। प्रेमैव फलभक्तिपदेन व्यवह्रियते।

भक्तेः प्रोन्नतिरेव कृष्णभक्तानामचरमं कर्म। सेवायां रतै रसिकैः साकं मधुरभागवतरसास्वादे नामसंकीर्त्तने च येषां यदाभिरुचिर्भवेत्, ते तदैव धन्यतमाः।

रसोऽत्रानन्द एव। स च द्विविधश्चिदानन्दो जडानन्दश्चेति। चिदानन्द एव परो विशुद्धो निष्कामश्च भगवत्प्रेमा। जडानन्दस्तु तस्यैव प्रेमाकरस्य विकारोऽणोरपि अणीयानंशरूपः। स एव लोके दाम्पत्यप्रणयापत्यप्रेमसखिसौहार्दादिरूपेण प्रचरति।

सर्वे जनाः प्रेमभक्त्यधिकारिणो भवितुमर्हन्ति। प्रेमभक्तिमन्तरेण भगवतः साक्षात्कारोऽसम्भव एव। भाववशो हि भगवान्। स च भावः शान्त-दास्य-सख्य-वात्सल्य-मधुरभेदेन पञ्चविधः। मधुरभावस्यैवापरं नाम कान्ताभाव इति। उपासनायां परिपूर्णायां भवति भावानाममीषामुदयः। मधुरभावो कान्ताभावो वा समस्ति समेष्वेषु श्रेयान्। यथा पतिव्रतपरायणा नारी पतिचरणयोः निष्काममात्मसर्पणं करोति। तथैव भगवच्चरणेषु भक्तस्यात्मसमर्पणमस्ति श्रेयसां पन्थाः। अनेन अन्ये भावा अञ्जसा समुपलभ्यन्तेऽत एव कान्ताभावस्य श्रैष्ठ्यमभिधीयते।

प्रथमं साधनभक्त्या भावभक्तिरुदेति, ततः प्रेमभक्तिस्तस्यैवापरमभिधानं रतिरिति [पञ्चमपुमर्थः] सा केवलं चिन्मयावस्थायामेवोद्भवति।

केवलया कृष्णकृपयैव रतिरुदेति, सतां सङ्गेन सा पुष्यति, स्वेदकम्पादयो विद्यन्ते तस्याः परिचायकाः। रतेः सन्ति चत्वारो भेदाः (१) भागवती रतिः (२) छायारतिः (३) जडरतिः (४) कपटरतिरिति। प्रथमोक्तस्वरूपा। भगवद्रतेः प्रथमावस्थास्ति छायारतिः। मद्यपाङ्गनाद्यासक्तानां या रतिः, सा जडरतिरस्ति। जनान् दर्शयितुमेव दम्भेन न खलु हृदयेन या प्रीतिः क्रियते, सा कपटरतिरिति।

केचन वैष्णवा वैष्णवधर्ममेव श्रेयांसं मन्यमाना अन्यधर्मानधिक्षिपन्ति, केचन वैष्णवचिह्नानि दधाना अपि न वैष्णवधर्ममनुतिष्ठन्ति, केचन वैष्णववंशे गृहीतजन्मानोऽपि अभक्ताः सन्ति, एते सन्ति वैष्णवसमाः। परं वस्तुतो नैते वैष्णवाः। वैष्णवैरेव साकं रसालापो विधेयो नान्यैः।

हरिनामश्रवणेनैव पापानि नश्यन्ति, शरीरं पूतं भवति। यत्र नास्ति कापि आशङ्का तत्र मुहुर्मुहुरुच्चैर्हरिनाम कीर्त्तनीयम्। अनेन शरीरं पूयते, चित्तं भगवद्भक्तिप्रवणं भवति। चित्ते भगवद्भक्तिप्रवणेऽमित्राण्यपि मित्रतां यान्ति, दुःखं च निश्शेषीभवति।

अन्तःकरणशोधनं शमः, बाह्येन्द्रियवशीकारो दमः, शीतोष्णदुःखादिसहिष्णुता तितिक्षा, नश्वरेषु समेषु वस्तुषु हेयबुद्धिर्वैराग्यम्—एतानि प्रधानानि वैष्णवधर्माणि। श्रद्धा-सत्सङ्ग-भजन-निवृत्तिभिरुत्पन्नायां भगवद्रतौ वैष्णवानां हृदये समुत्पद्यते कोऽपि धर्मः, यं विरक्तिपदेनाभिदधति तद्विदः। तदा ते कौपीनमात्रवसनाः कन्दमूलाशना निरशना वा—

कचिद्रुदन्त्यच्युतचिन्तया क्वचिद्
हसन्ति नन्दन्ति वदन्त्यलौकिकाः।
नृत्यन्ति गायन्त्यनुशीलमन्त्यजम्
भवन्ति तूष्णीं परमेत्य निर्वृताः॥

एष एव वैष्णवानां परो धर्मः।

गृहिणो वैष्णवाः कामनां तत्फलाभिषङ्गं च दुःखदं विहाय सप्रीति निष्कामं भगवद्भजनं कुर्युः। एतदेव वैष्णवगृहिणां कर्म।

जातायां विरक्तौ जनः कौपीनावशेषं वेषमङ्गीकृत्य विहायाश्रमवर्णधर्मान् गुणातीतो परमहंसवृत्तिः वैष्णवाश्रममाश्रयेत्। शीतलतैव सलिलस्य, दाहकतेवानलस्य हिंस्रवृत्तिरिव पशोः मनुजस्य भगवति विशुद्धप्रेमोत्पादनमस्ति स्वाभाविको धर्मः।

संसारसर्पदष्टानां भगवन्नाम जीवातुरूपम्। सत्ये तपसा, त्रेतायां ध्यानेन, द्वापरे यज्ञेन, कलौ केवलेन नामसंकीर्त्तनेन* भवति परमात्मप्राप्तिः।

येषां भक्तावतंसानां वदनारविन्दे हरिरित्यक्षरद्वयं सततं विद्यते, तेषां नास्ति कस्यापि तीर्थस्य यज्ञादेर्वावश्यकता। अनेकानि शास्त्राण्यालोच्य विद्वद्भिरिदमेव निश्चितं यन्नारायणपरायणीभूय नारायणध्यानमेवास्ति परं श्रेय इति।

हरिनामाग्निरेव पुनर्जन्महेतुभूतानि पापबीजानि भर्जते, गुल्ममध्यस्थितोऽणुरपि दावाग्निर्मन्दमन्देनापि वायुना ध्मायमानो यथा सकलमपि विपिनं भस्मसात्करोति, तथैव मानसावासो भगवानपि निखिलान् पापपुञ्जान् नाशयति।

संसारे सर्वेऽपि स्वस्वकर्मानुरूपं फलं भुञ्जते, परन्तु भर्जितानि धान्यबीजानि यथाङ्कुरोत्पादने न क्षमाणि तथा वैष्णवानां कर्माण्यपि पापाङ्कुरमुत्पादयितुं न क्षमन्ते। भक्तवत्सलो भगवान् तेषां कर्मफलानि प्रथमत एव नाशयति।

एत एव चैतन्यदेवस्य संक्षिप्ता हितोपदेशा राद्धान्ताश्च। अत्रायमस्ति श्लोकोऽपि—

आराध्यो भगवान् व्रजेन्द्रतनयः तद्धाम वृन्दावनम्।
रम्या काचिदुपासना व्रजवधूवर्गेण या कल्पिता॥
श्रीमद्भागवतं प्रमाणममलं प्रेमा पुमर्थो महान्।
श्रीचैतन्यमहाप्रभोर्मतमिदं तत्राऽऽदरो नः परः॥

प्रेमपत्तनकथांशः

अस्य कथांशस्तावदित्थमुपवर्णितोऽलौकिकवर्णनाचणेन भक्तावतंसेन रसिकोत्तंसेन—नैकशिरोमन्दिरं प्रेमपत्तनं नाम पत्तनं विल-

---

* हरेर्नामैव नामैव नामैव मम जीवनम्।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥

सति गगनमण्डले* । तस्यास्ति परिवृढो भक्तैर्दृढं परिगृहीतोऽमन्दानन्दकन्दं भगवान् नन्दनन्दनो मुकुन्दः । तस्य वर्तेते मतिरती द्वे युवती । तयोर्ललनाललामभूता युवतिरत्नं रतिरस्ति लोकोत्तरलावण्यपूर्णा प्रेमाकररूपा ह्लादिनीसारसंविद् श्रीराधैव । मतिस्तु भगवतः परपुरुषस्यैश्वर्य्यानुसन्धानरूपा या ज्ञप्तिपदेनापि वेद्यते । रतेर्लावण्यातिशयकर्षितचेतसा भगवता शृङ्गारमूर्तिना मतिर्नातितरामादृता, अपि तु वचनादिना अवमानिता च । माधुर्यरूपया† भगवत्तया भृशमावर्जितो भगवान् ऐश्वर्यरूपां तां नातितरामादृतवानिति

* अत्यूर्ध्वमपि वैकुण्ठात् पञ्चाशत्कोटियोजनम् ।
शून्ये स्थितं निराधारं ध्रुवमेवेश्वरेच्छया ॥
नित्यं वृन्दावनं नाम रहस्यं परमं पदम् । [पद्मपु० पातालख०]

† ऐश्वर्यरूपा माधुर्य्यरूपा चेति भगवत्ताया द्वैविध्यात् तद्विषययोर्ज्ञानयोर्द्वैविध्यं प्रदर्श्यते । तत्रैश्वर्य्यम्—नरलीलामनपेक्ष्य पारमैश्वर्याविर्भावः । यथा पितरौ प्रत्यैश्वर्यं प्रदर्श्य "एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे । नान्यथा मद्भवं ज्ञानं मर्त्यलिङ्गेन जायते" ॥ यथा चार्जुनं प्रति—'पश्य मे योगमैश्वरम्' इति । माधुर्य्यन्तु पारमैश्वर्य्यस्य प्रकाशने चाप्रकाशने च नरलीलानतिक्रमः । यथा पूतनाप्राणहर्तृत्वे स्तनचूषणरूपनरबालकचेष्टत्वम्, यथा चातिकठोरशकटोत्पातनेऽप्यतिकोमलाङ्घ्रिदलहतिसिद्धत्वम्, अतिदीर्घदामाशक्यबन्धेऽपि मातृभीतिवैक्लव्यम्, ब्रह्मादिमोहनेऽपि अतिसार्वज्ञेऽपि वत्सचारणलीलत्वम् । पारमैश्वर्ये सत्यपि तस्याप्रकाशनेन दधिपयःस्तेयव्रजस्त्रीजनलोलुपत्वादि ।—ऐश्वर्यज्ञानं पारमैश्वर्यानुसन्धौ सति हृत्कम्पहेतुना सादरसम्भ्रमेण स्वभावशैथिल्यकृद्धर्मविशेषः । यथा—

"युवां न नः सुतौ साक्षात्प्रधानपुरुषेश्वरौ ॥ इति, यथा च—'सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण ! हे यादव ! हे सखेति ! इत्यादि । इह वात्सल्यसख्यात्मकस्वभावशैथिल्यम् । माधुर्य्यज्ञानं तु पारमैश्वर्यानुसन्धानेऽपि हृत्कम्पहेतुसम्भ्रमस्याप्यनुदयात् स्वभावातिस्थैर्यकृद् धर्मविशेषः । यथा—त्रय्या चोपनिषद्भिश्च सांख्ययोगैश्च सात्वतैः । उपगीयमानमाहात्म्यं हरिं साऽमन्यतात्मजम् ॥

हृदयम्। न खलु तेनैवैकेन, किन्तु यशोहृतदयितया त्वयापि भृशं कदर्थिता। विशमौलिमणिः सा पितृसदनसरणिमेव कष्टाकूपारोत्तारतरणिमाकलय्य विहाय कान्तस्य निशान्तं जातेऽनादरे इत्थं प्रतिविधेयमिति निखिलान् शिक्षयन्तीव प्राणेभ्योऽपि गरीयसीं सुतामपि शान्ति त्यक्त्वा तातालयमगच्छत्। अस्ति मतेर्जनकं तावच्छास्त्रमेव, शास्त्रत एव मतेरुत्पत्तेः। तच्च जन्मत एव धनसम्पदादिषु वैराग्यमादधाति। सुतामागतां विलोक्य तामाम्नायाध्यायपटुभिर्वटुभिः साकं भिक्षामटेति समाम्नासीत्। अहह या जातुचित् सकललोकैकस्वामिनः सहचरी आसीत्, सैवेदानीं दैवदुर्विलसिताद् वनं वनमटति नाधिगच्छति चानन्दलवम्।

वन्दिनस्तमुपदेवगणा ये गीतवाद्यबलिभिः परियमुः। वन्द्यमानचरणः पथि वृद्धैः। इत्यादि। इह पारमैश्वर्यानुसन्धानेऽपि वात्सल्योज्ज्वलाख्यस्वभावादीथिल्यम्।

माधुर्यनिधानामैश्वर्यज्ञानं त्रिवेण्यां सारस्वतप्रवाहवद् गौणतयास्ति, हृत्कम्पहेतोः सादरसम्भ्रमस्याभावात्। न च तद् भावसङ्कोचकृत् प्रत्युत तत्पोष्येव मत्सुतो मत्सखो मत्प्रियो वा सर्वेश्वर इत्युल्लाससम्भवात्। इत्यादि सिद्धान्तरत्ने द्रष्टव्यम्।

'मोहि जो ईश्वर माने आपन पै हीन।
ताके प्रेमवश मैं ना होत हूँ अधीन॥
मोहि जो जो भक्त भजै जोइ जोइ भाव।
ताहि सो सो भाव भजूं यो मेरो स्वभाव॥
मेरे पुत्र मेरे सखा मेरे प्राणपति।
याहि भाव जोहि मोसे करे शुद्ध भक्ति॥
आपुनपो बड़ो माने मोहि सम हीन।
ताहि भाव होत हूँ मैं ताहि को आधीन॥
प्रिया जब मानकर करत भर्त्सन।
वेद स्तुतिहू से हरै सोई मेरो मन॥

इत्यादिहिन्दीपद्यपरिवर्तिते चैतन्यचरितामृते च द्रष्टव्यम्।

शान्तस्वान्ताभिधेन केनापि ऋषिणा परिणीता तावत् शान्तिर्नाम मतेर्दुहिता। पितृमन्दिरं मातृरहितं विहाय आभीलकुलाकुला सापत्या सापि निजाश्रमं पत्या नीता।

इत्थं निष्क्रान्तायां सापत्यायां मतौ तदधिकृतं गृहनगरारामादीनां निखिलमधिकारजातं पत्या शृङ्गारमूर्तिना भगवता रतये समर्पितम्। मतिकृत्येषु प्रथमत एव सासूया रतिः सर्वमपि व्यवहारमाचूलमूलं परिवर्तयामास। अमात्यो हि राजस्य प्रथमः स्तम्भः। नृपतिहितैषिणं मन्त्रिणमन्तरेण नैवास्ति नरपतेरभिलषितसिद्धिरिति तया मतिव्यापारितमपारमतिं मन्त्रिणमपाकृत्य नरपतिर्हितेहिताभिरतो भरतो नाम अभिनवः सचिवः प्रतिष्ठापितः। पुरातनस्य पुरोधसः स्थाने शृंगारोचितधर्मकर्मकलापमर्मकुशलः प्रचुरमन्त्रबलः कामशास्त्रप्रणेता वात्स्यायनमुनिर्नियुक्तः। नृपतेस्तन्नगरस्य तदधिवसतां जनानां तेषामुपकरणानां च प्रसाधने पटीयान् शिल्पिवृन्दवन्द्यचरणयुगलोऽनवद्यरचनाकुशलो भूपालेन तेनापूर्वनगरनिर्माणायाऽऽज्ञप्तस्तदाज्ञामजस्रमनुपालयन्नास्तेऽद्भुतो नाम शिल्पिप्रवरः। समुचितमेवेदं यद् शृङ्गारस्याद्भुतेन प्रसाधनम्। तयोः परस्परं मित्रत्वात्। अद्भुतेन तेन नृपतिनिर्देशमङ्गीकृत्य प्रथमं तस्य नगरस्य सुपर्वपर्वताकारो ललितः प्राकारः श्रुतीतिवृत्तपुरावृत्तसंहितादिशास्त्राणां वादजल्पवितण्डादिरूपैः कर्कशतर्कग्रावभिश्च रसाशफलैर्निर्मितः। प्रोन्नतः स विविधसिद्धान्तरूपाभिन्नलयग्रावलिभिर्ललितो रमारानिभिर्विविधधर्ममीमांसकैरर्जितः, आम्नायाद्यर्थतर्कादिचातुर्य्यचाकचिक्यावलोकनेनैव तन्नगरमस्माभिर्दृष्टमिति तावत्तैव कृतकृत्यम्मन्यैः पण्डितम्मन्यैः समाजितः सर्वतो नगरं विराजते। श्रोत्रिया वैतिहासिकाः पौराणिका दार्शनिकाश्च आगमाद्यर्थतर्कादिचातुर्य्यचाकचिक्यावलोकनेनैव आनन्दिताः सन्निस्वान्तानन्दप्रदर्शनेनैव तन्नगरं दृष्टमस्माभिरिति कृतकृत्यम्मन्याः तन्नगरं दूरादेव स्तुवन्तो बहिरेव तिष्ठन्ति। न तु नगरान्तर्गन्तुं शक्नुवन्ति। क पुनस्तत्र मन्तुं प्रभवन्तीति भावः। प्रभुणाऽनन्त-

णिशकलरचितानेकोन्नतशिखरनिकरशेखरशतसुन्दरं पुरन्दरपुरद्वारविडम्बनैकचतुरं रागामरमहीरुङ्करमिव मनोरमं रागानुगमनं नाम गोपुरमारचितं तेनैवाद्भुतेन। तद्द्वारेणैव भवति केषांचिदेव भक्तप्रवराणां तत्र प्रवेशः। तं नगरप्राकारं परितो गभीरनीरनिचिता भूरिविस्ताराऽतिदुस्तरास्ति परिखा। यत्र जनानां स्वान्तस्थमनाविलत्वमाविलत्वञ्च वचनविलोकनैरेव ज्ञायते। भगवद्भक्तिविशुद्धान्तःकरणा एव तां तरीतुं शक्नुवन्ति नेतरे। परिखामण्डलस्य समन्ताद् अमुनैव शिल्पिना विरचितमारामकुलम्। यत्र नलदमयन्तीमालतीमाधवादिवर्णनात्मिकाभिर्लौकिककवितारूपाभिर्लतारूपाभिर्नारीभिरिव नरा आलङ्गिताः सन्त्यनेकेऽङ्कुरिताः कोरकिताः कुसुमिताः फलिताश्च तरवः। अरविन्दमरन्दविन्दुसन्दोहमन्दो वहलपरिमललुब्धेन्दिन्दिरानुगतः कलितकलिन्दकन्याजलकणोऽनिलश्च निरतं वहन् शाखिनाममीषां शाखा आन्दोलयति। लौकिकसत्कविविरचितकवितामयकाव्यनाटकादिरूपं परिखावलयापरतीरस्थमुपवनमुपगतानां तत्रैवातिप्रीतिजुषां तन्माधुर्यानुभवेनैवाह्लादितानां कृतकृत्यम्मन्यानां परिखाप्रकारादिदर्शनेऽप्यलब्धावसराणां नगरान्तर्गमनेकाऽवकाशः। तस्य नगरस्य वहिर्भागस्येयं कथा। आभ्यन्तभागस्तु तस्येत्थमुपवर्णितः—पत्तनस्य तस्याभ्यन्तरभूमिर्विविधारुणद्रव्यैररुणिमानमानीता। क्वचित् कुङ्कुमक्षोदैः, क्वचित्केसरनिकरैः, क्वचित् विविधप्रसूनपरागैः दलैः पल्लवैश्च, क्वचिद् वृन्दावनावतंसानां गोपीकदम्बकानां लाक्षारुणैश्चरणैः कृष्णानुरागरञ्जितैर्हृदयैश्च अन्यैश्च क्रीडोपयोगिभिः विविधरङ्गैः। तत्र वर्तमानानि उदवसितानि वहिरन्तश्च पद्मरागशकलैः कलधौतपङ्केन च रचितानि समान्येवातिललितानि सन्ति। तेषु विशालविद्रुमशकलघटिता कलधौतकीलजटिता सर्वत्रैव विराजते विकटा कपाटपटली। तत्र नगरे सद्मशिखरोपरिस्थितानां कलधौतकलशानां मूर्द्ध्नि स्थिता पताकावली स्वर्णरसरञ्जितेव शोभते। मध्येनगरं मदयितस्य मधुरमेचकस्य राशौ मुदां मूलमाचू-

लमरुणिमानमुपगतं नैश्रेयसाकरं नाम सन्ध्याघनोपमं घनमुपवनं विभाति । सर्वे एव तन्नगरनिवासिनस्तेनैवाङ्कतेन अनुरागरस-रञ्जितमनसः कुसुमकुङ्कुमरागरञ्जितवाससश्च कृताः । तस्मिन् पत्तने न केवलं मनुष्या अपि तु शकुनयोऽपि उभयथाऽरुणतामुपगता. । अहो का कथान्येषां नीरक्षीरविवेकवित्तो राजहंसोऽपि कोकनद-च्छविमाश्रयति मनसा वपुषा च । तस्मिन् पत्तने शृङ्गारमूर्त्तेर्भगवतो भिन्नतया युद्धवीरधर्मवीरहासनामानो भूपोपमन्त्रिणो रत्यैव नियुक्ता. ।

यूनोरद्वैतप्रतिपादकयो. सह सहस्ययो. सदैव तत्र स्थितीरत्यै-वाङ्गीकृता, तत्र शीताधिक्यात् सतोस्तयोर्युवानो न जातुचित् वियुज्येते । ग्रीष्ममानपूर्वानुरागा वियोगप्रयोजका यूनोरिति तेषां नास्ति तत्र प्रचुरः प्रचारः । वसन्तवर्षाशरदां भेदाभेदप्रयोजकाना वर्तत एव तत्र स्थिति. । प्रेमभक्तिप्रवर्त्तकस्तपस्योऽपि तत्रास्त्येव । रतेः प्रेमप्रणयस्नेहमानादयो दश पुत्रा उत्तरोत्तरं ज्येष्ठा बभूवुः । शृङ्गारमूर्तेर्भूपस्य परिपन्थिनो रौद्रकरुणबीभत्सभयानका नगरा-न्तिकमपि नायान्ति । भागवतं मर्यादामयतया स्थितं राज्ञ शासनं स्थिरीकृत्य तत्पुरं पालयति । अभ्यस्तशास्त्रो नाम सेनापतिर्निरन्तरं नगराद्बहिरेव परिभ्रमति न नगरान्तिकमायाति । दर्शनवचनाभि-ज्ञनामानो परस्यान्तवृत्तान्ताभिज्ञौ परीक्षको रत्यैव नियोजितो । दुर्दृष्ट-दुराग्रहदुर्वीरादुःसङ्गनामानो गोपुरबहिःप्रदेशस्था. सन्ति चत्वारः प्रतीहारा रत्यैव व्यापारिता., उक्तपरीक्षकद्वयपरीक्षितानेव जनान्* नगरान्तर्गन्तुमादिशन्ति । इत्थं सम्पन्ने नगररचनादिवैपरीत्ये प्रथमतो

* अह नारायणोऽनन्तो ब्रह्मा विष्णुर्महाविराट् ।
धर्मं क्षुद्रविराट्सर्पो गङ्गा लक्ष्मी सरस्वती ॥
त्वं विष्णुमाया सावित्री तुलसी च गणेश्वर ।
सनत्कुमार स्कन्दश्च नरनारायणावृषी ॥
कपिलो दक्षिणा यज्ञो ब्रह्मपुत्राश्च योगिन ।
पवनो वरुणश्चन्द्र सूर्य्यो रुद्रो हुताशन ॥

मतिस्थिरीकृते विशेषव्यवहारेऽपि रतिर्वैपरीत्यमन्वतिष्ठत् । यावन्मतिरासीत् तया निगमगोचरो धर्म उररीकृत आसीत् । निष्काशितायां तस्यां ह्लादिनीसारसविद्रूपया रत्या धर्मत्वेन य पन्थाः पुरा आदृत आसीत्ततो विपरीतमेवायनमाविष्कृतम् । अधर्मो धर्मत्वेन आदृतः, अनाचार आचारत्वेन, असत्यं सत्यत्वेन, असन्तोषः सन्तोषत्वेन अनादर आदरत्वेन, अविनयो विनयत्वेन, किं बहुना निखिलोऽपिव्यवहारविसरो वैपरीत्यं नीतः । यत्रानलङ्कृतिरेवालङ्कृतिः, स्त्रिय एव पुरुषाः, पुरुषा एव स्त्रियः, ज्ञानमेवाज्ञानम्, सुखमेव दुःखम्, दुःखमेव सुखम्, निकृष्टत्वमेवोत्कृष्टत्वम्, तम एव प्रकाशः, निषेध एव विधिः, अनुत्तरमेवोत्तरम्, अशिरस एव सहस्रशिरसः, अचक्षुष एव सहस्रचक्षुषः, अबाहव एव सहस्रबाहवः, अपद एव सहस्रपदः अनिद्रितत्वमेव सनिद्रितत्वं, वियोग एव संयोगः, संयोग एव वियोगः, मरणमेव जीवनम्, जीवनमेव मरणम्, लघुत्वमेव गुरुत्वम्, स्तुतिरेव निन्दा, निन्दैव स्तुतिः, नतिरेव परमोन्नतिः, व्यय एव लाभः, विस्मरणमेव स्मरणम्, अगर्वत्वमेव सगर्वत्वम्, सकामत्वमेव अकामत्वम्, रविरेव चन्द्रः, चन्द्र एव रविः, असन्त एव सन्तः, असतीत्वमेव सतीत्वम्, सतीत्वमेवासतीत्वम्, अकीर्तिरेव कीर्तिः, निग्रह एव अनुग्रहः च अकवय एव कवयः, शिष्या एव गुरवः इत्यादिविपरीतो व्यवहारव्यारः कविना सोदाहरणमुपन्यस्तः ।

प्रथममिदमत्र विचारणीयम्—प्रेमपत्तनं किम्? मधुरमेचकः कः? रतिश्च केति?

यद्यपि संक्षिप्तेनामुना कथांशेन प्रेमपत्तनं वृन्दावनम्, मधुरमेचको नवनीरदवपुः श्रृंगाररसारो भगवान् व्रजेश्वरः । रतिर्महाभायाङ्कुररूपा परमपुरुषप्रेयसी श्रीराधेति सामान्यतः पाठकवृन्देनोनायासे-

कृष्णमन्त्रोपासकाश्च भारतस्थाश्च वैष्णवाः ।
एभिर्दृष्टश्च गोलोको नान्यैर्दृष्टः कदाचन ॥

ब्र० वै० ख० ५४।१५४-१५६

नाधिगन्तं भवेत्। तथापि प्रेमपत्तनस्य कथं गगने स्थितिः, कश्च तन्महिमा, किमाकारं तत्? भगवतो वासुदेवस्य कीदृगस्ति स्वरूपम्, किंमाहात्म्यम्, कास्तस्य वल्लभाः, के पार्षदाः। ह्लादिनीसारसंविद्रूपाया रतेर्महिमा कीदृश इति विशेषतो जिज्ञासा सर्वसाधारिणी प्रकृतग्रन्थसम्पादनवेलायां मयाप्यनुभूता। अतोऽत्रैतत्सम्प्रदायग्रन्थेभ्यः पुरावृत्तेभ्यश्च यत्किञ्चिदधिगतं तदभिधीयते—

प्रेमपत्तनम्—

अनेककोटिब्रह्माण्डभाण्डोपरि वर्त्ततेऽमन्दानन्दमयमाश्चर्यचर्याःपरिकलितं मञ्जुलवञ्जुलादिनिकुञ्जललितं मन्दारमरन्दबिन्दुवृन्दाश्रितं सुरभिसन्दोहशोभितं नमस्यानामपि नमस्यं परमरहस्यं विविधैश्वर्यपरम्परानिचितं नृत्यगीतनिरन्तरं स्थानमूर्द्धन्यं वृन्दावनं नाम। तदुक्तं पाद्मे—

गुह्याद् गुह्यतरं पुण्यं परमानन्दकारणम्।
अत्यद्भुतं रहःस्थानं रहस्यं परमं पदम्॥
सात्वतां स्थानमूर्द्धन्यं विष्णोरत्यन्तदुर्लभम्।
नित्यं वृन्दावनं नाम ब्रह्माण्डोपरि संस्थितम्॥
तत्र कैशोरवयसं नित्यमानन्दविग्रहम्।
गीतनाट्यकथालापं स्मितवक्त्रं निरन्तरम्॥
शुद्धसत्त्वैः प्रेमपूर्णैर्दृष्टं वै तद्गनाश्रयैः।
पूर्णब्रह्मसुखे मग्नैः स्फुरत्तन्मूर्त्तितन्मयम्॥
भुजंगशत्रुनृत्याढ्यं सकलामोदविभ्रमम्।
नानावर्णैश्च कुसुमैस्तद्रेणुपरिपूरितम्॥
पूर्णेन्दुनित्याभ्युदयं सूर्यमन्दांशुसेवितम्।
अदुःखं दुःखविच्छेदं जरामरणवर्जितम्॥
अक्रोधं गतमात्सर्यमभिन्नमनहंकृतम्।
पूर्णानन्दामृतरसं पूर्णप्रेमसुखार्णवम्॥

गुणातीतं महद्धाम पूर्णप्रेमस्वरूपकम् ।
यत्र वृक्षादिपुलकैः प्रेमानन्दाश्रुवर्षितम् ॥
किं पुनश्चेतनायुक्तैर्विष्णुभक्तैः किमुच्यते ।
गोविन्दाङ्घ्रिरजःस्पर्शात् नित्यं वृन्दावनं भुवि॥
सहस्रदलपद्मस्य वृन्दारण्यं वराटकम् ।
यस्य स्पर्शनमात्रेण पृथ्वी धन्या जगत्त्रये ॥
गुह्याद्गुह्यतमं रम्यं मध्यं वृन्दावनं भुवि ।
अक्षरं परमानन्दं गोविन्दस्थानमव्ययम् ॥
गोविंददेहतोऽभिन्नं पूर्णब्रह्मसुखाश्रयम् ।
मुक्तिस्तत्र रजःस्पर्शात्तन्माहात्म्यं किमुच्यते ॥

जितमिति स्तोत्रेऽपि—

लोकवैकुण्ठनामानं दिव्यसाड्गुण्यसंयुतम् ।
अवैष्णवानामप्राप्यं गुणत्रयविवर्जितम् ॥
नित्यसिद्धैः समाकीर्णं त्वन्मयैः पाञ्चकालिकैः ।
सभाप्रासादसंयुक्तं वनैश्चोपवनैः शुभम् ॥
वापीकूपतडागैश्च वृक्षषण्डैः सुमण्डितम् ।
अप्राकृतं सुरैर्वन्द्यमयुतार्कसमप्रभम् ॥
प्रकृष्टसत्त्वराशिं त्वां कदा द्रक्ष्यामि चक्षुषा ।
क्रीडन्तं रमया सार्द्धं लीलाभूमिषु केशवम् ॥

इदमत्र तत्त्वम्—इति प्रकृत्य सिद्धान्तरत्ने बलदेवविद्याभूषणेरप्यवाचि—

"अनन्तविज्ञानानन्दवपुषो भगवतः स्वचिच्छक्तिविलासमयं प्रकृतिस्पर्शशून्यमपरिच्छिन्नं स्वमहिमसद्व्योमशब्दितं पुरमतिविस्तीर्णबहुभूमप्रासादोपमं चकास्ति । यत्र नानाविर्भावपरिकरपरिच्छदस्वच्छन्दसमावेशोचितान्यतिविशालनीवृशिल्पमयानि निरुपमहानीलपुष्परागेन्द्रचन्द्रकान्तादिकान्तानि विचित्रप्राचीरत्नवरप्रासादादिमहाधामानि मणिचित्रतटाकपीयूषपूर्णसरित्सरोवापीकूपानि

कर्पूरपूरायमाणरजांसि प्रतिक्षणसमुल्लासतरुवल्लीगुल्मानि रम्यविहङ्गादिसत्त्वसंदोहानि कमनीयविमानावलिवियन्ति धामानि स्फुरन्ति। येषु परमालौकिकरूपसम्पन्ना मुक्ता नित्यमुक्ताश्च सर्वाभ्यर्हिततया श्रीदेव्या सह विविधविनोदवन्तं नानाविधैरुपचारैरनुकूलयन्ति" इति।

पाञ्चरात्रेऽपि—

विष्वद्रीच्येव वाग् वेदा अद्रयः कनकाद्रयः।
जलं ब्रह्मद्रवः साक्षाद् द्रुमाः सर्वे सुरद्रुमाः॥
जनाः परिजना यत्र धेनवः कामधेनवः।
श्रीमद्वृन्दावनस्यान्तः प्रदेशो रतिराज्यभूः॥

प्रेमपत्तनटीकायामपि—

'तन्नगरं च लीलापरिकरात्मकनित्यसिद्धासक्तजननिवासस्थानं श्रीवृन्दावनान्तर्मण्डलमेव।' 'भगवतः प्रकाशविशेषे वृन्दावने वनं मेदेहरूपकम्' इत्युक्तम्।

चैतन्यचरितामृते च—

प्रकृतिर पार पर व्योम नाम धाम।
कृष्णविग्रह ये छे विभुत्वादि गुणवान्॥
सर्वग, अनन्त ब्रह्म वैकुण्ठादि धाम।
कृष्ण कृष्ण अवतारेर ताहाइ विश्राम॥
ताहार उपरि भागे कृष्णलोकख्याति।
द्वारका मथुरा गोकुल त्रिविधत्वे स्थितिः॥
सर्वोपरि श्रीगोकुल व्रजलोक धाम।
श्रीगोलोक श्वेतद्वीप वृन्दावन नाम॥
सर्वग अनन्त विभु कृष्ण तनु सम।
उपर्यधो व्यापिया छे नाहिक नियम॥
ब्रह्माण्डे प्रकाश तार कृष्णेर इच्छाय।
एकइ स्वरूप ताँर नाहि दुइ काय*॥

* मूलसंस्कृतपुस्तकालाभे वङ्गभाषामयाच्चैतन्यचरितामृतादुद्धृतमिदम्।

अन्यत्रापि—

"प्राकृते प्रलयं प्राप्ते व्यक्तेऽव्यक्तं गते पुरा।
शिष्टे ब्रह्मणि चिन्मात्रे कालमायातिगेऽक्षरे॥
ब्रह्मानन्दमयो लोको व्यापी वैकुण्ठसंज्ञितः।
निर्गुणोऽनाद्यनन्तश्च वर्त्तते केवलेऽक्षरे॥
अक्षरं परमं ब्रह्म वेदानां स्थानमुत्तमम्।
तल्लोकवासी हि जनः स्तुतो वेदैः परात्परः॥
चिरं स्तुत्या ततस्तुष्टः परोक्षः प्राह तान् गिरा।
तुष्टोऽस्मि ब्रूत भोः प्राज्ञा वरं यन्मनसेप्सितम्॥

श्रुतय ऊचुः—

ब्रह्मेति पठ्यतेऽस्माभिर्यद्रूपं निर्गुणं परम्।
वाङ्मनोगोचरातीतं ततो न ज्ञायते तु यत्॥
आनन्दमात्रमिति यद्वदन्तीह पुराविदः।
तद्रूपं दर्शयास्माकं यदि देयो वरो हि नः॥
श्रुत्वैतद् दर्शयामास स्वं लोकं प्रकृतेः परम्।
केवलानुभवानन्दमात्रमक्षरमध्यगम्॥
यत्र वृन्दावनं नाम वनं कामदुघैः द्रुमैः।
मनोरमं निकुञ्जाढ्यं सर्वर्तुरससंयुतम्॥
यत्र गोवर्द्धनो नाम सुनिर्झरदरीयुतः।
रत्नधातुमयः श्रीमान् सुपक्षिगणसङ्कुलः॥
यत्र निर्मलपानीया कालिन्दी सरितां वरा।
रत्नबद्धोभयतटी हंसपद्मादिसङ्कुला॥
नानारासरसोन्मत्तं यत्र गोपीकदम्बकम्।
तत्कदम्बकमध्यस्थः किशोराकृतिरच्युतः॥
दर्शयित्वेति च प्राह ब्रूत किं करवाणि वः।
दृष्टो मदीयो लोकोऽयं यतो नास्ति परं पदम्॥"

इत्यादि।

श्रीगोस्वामिकडचायामपि—

"मायातीते व्यापिवैकुण्ठलोके
पूर्णैश्वर्ये श्रीचतुर्व्यूहमध्ये।
रूपं यस्योद्भाति..............' इत्यादि।

वैकुण्ठांशिरूपस्य सर्वोपरिविराजमानस्य तन्नगरस्य कथमवनितलेऽवस्थितिरिति शङ्का न कार्य्या, "यत्र यत्र भगवानवतरति तत्र तत्रांशेन पूर्णस्वरूपेण च वैकुण्ठमवतरति, तत्र तद्वनं चायात्येव इति शास्त्रे प्रसिद्धमिति प्रेमपत्तनटीकायामुक्तेः। यथाऽवतारिणो भगवतः 'एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम्' इत्यादिवचनचयैः पूर्णस्वरूपेणावतरणं विश्रुतचरम्, तथैव तन्नगरस्याप्यवतार इति न किमप्यासमञ्जस्यम्। तदुक्तं प्रकारान्तरेण स्कान्देऽपि—

"या यथा भुवि वर्तन्ते पुर्य्यो भगवतः प्रियाः।
तास्तथा सन्ति वैकुण्ठे तत्तल्लीलार्थमादृताः॥" इति।

न च तस्य तादृङ् महिमा न सर्वैर्नयनगोचरीक्रियते इति वाच्यम्, भगवद्भक्तिभरभुग्नोत्तमाङ्गा रतेरनुज्ञया तदनुचरैराज्ञप्तप्रवेशा रतिराज्यसीमानमुपगता एव केचन उत्कचरं तन्महिमानं नयनगोचरीकर्तुं शक्नुवन्ति, अन्ये बहिरेव तिष्ठन्तीति पूर्वमुक्तेः। यासु दिव्यत्वास्फूतिरत्वसंस्कृतदशामेव, भगवति नरदारकादिवदिति सिद्धान्तरत्नाच्च। सायुज्यमुक्तिभाजोऽपि भगवच्चरणरतिं विना यत्र गन्तुं न शक्नुवन्ति। तत्र अनासादितभक्तिगन्धानां प्राकृतानां न प्रवेश इति किमाश्चर्यम्। अधुनातना यथाकथञ्चित् प्रविष्टा अपि तादृशदृष्ट्यभावात्प्रपञ्चसदृशमेव तत्पुरं पश्यन्ति—अत एवोक्तं चैतन्यचरितामृते—

चिन्तामणि भूमि कल्पवृक्षमय वन।
चर्मचक्षु देखें तांरे प्रपञ्चेर मन॥
प्रेमनेत्र देखें तांर स्वरूपप्रकाश।
गोपगोपी सङ्गे जांहा कृष्णेर विलास॥

ये पुनर्भगवदनुगृहीता भगवति दृढां रतिं बिभ्रति, ते तथैव तन्न-

गरमहिमानं पश्यन्ति। तथाहि म्लेच्छोऽपि यवनकविः भगवत्प्रेमपूर-परिप्लुतस्वान्तो महान् रसखानो वृन्दावनवत्कान्तं त्रिलोक्यामपि नापश्यत् स्थानम्। स्थाने महात्मनस्तस्येदृशी मतिः। भक्तप्रवरः स आह स्मः।

मानुष हौं तो वही रसखान बसौं संग गोकुल गाँव के ग्वारन।
जो पशु हौं तो कहा बसु मेरो चरौं नित नन्द की धेनु मँझारन॥
पाहन हौं तो वही गिरि को जो कियो हरि छत्र पुरन्दर धारन।
जो खग हौं तो बसेरो करौं मिलि कालिन्दि कूल कदम्ब की डारन॥

या लकुटी अरु कामरिया पर राज तिहूँ पुर को तजि डारौं।
आठहुँ सिद्धि नवौ निधि के सुख नन्द कि गाय चराय विसारौं॥
नैनन सूँ रसखान जबै ब्रज के बन बाग तड़ाग निहारौं।
केतिक ही कलधौत के धाम करील के कुञ्जन ऊपर वारौं॥

प्रेमाञ्जनाक्तया दृशा तत्रत्यं करीलनिकुञ्जमपि कलधौतधामतो मञ्जुलं पश्यति। अनेकैः कलधौतधामभिस्तस्य निर्मञ्छनं च करोति। भगवदधिष्ठितमुपवर्णितपूर्वं रत्नेन्द्रसारनिर्मितं मन्दिरं केन निर्मञ्छनीकुर्यात्। नैवास्ति ब्रह्माण्डभाण्डोदरे तादृगपूर्वं वस्तु।

भागवतेपि निपुणमुक्तम्—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं न सार्वभौमं न रसाधिपत्यम्।
न योगसिद्धीरपुनर्भवं वा वाञ्छन्ति यत्पादरजःप्रपन्नाः॥

इति॥

मधुरमेचकः—

मधुरः शृङ्गाररसमयोऽत एव मेचकः श्यामसुन्दरतनुर्भगवान् श्रीकृष्ण इति प्रकृतग्रन्थव्याख्यामातन्वताऽद्भुतेन तस्य शृङ्गारमयत्वञ्च "शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति" 'शृङ्गाररससारसर्वस्वम्', इति जयदेवबिल्वमङ्गलोक्तिप्रमाणद्वयमुद्धृत्य मधुरमेचकपदेन भगवान् श्रीकृष्ण एवात्र विवक्षित इति स्पष्टीकृतम्।

मत्स्यकूर्मवराहादयोऽशावतारा यस्यांशाः कृत्स्नशक्तिव्यञ्जी अंशिरूपी स भगवान् अस्ति तद्नगरस्याधिपतिः। सर्वत्र पदे पदे विततोऽस्ति तस्य महिमा, कः खलु तं वक्तुं शक्नोति साकल्येन। अत्र यद्यपि—

असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश! पारं न याति॥

इयमुक्तिरेवौचितीमावहति। तथापि तन्महिमानं प्रकृत्य किञ्चित् प्रोच्यते। पाद्मे तावत्—

यदङ्घ्रिनखचन्द्रांशुमहिमान्तो न विद्यते।
तन्माहात्म्यं कियद्देवि! प्रोच्यते त्वं मुदा शृणु॥
अनन्तकोटिब्रह्माण्डे अनन्तत्रिगुणोच्छ्रये।
तत्कलाकोटिकोट्यंशा ब्रह्मविष्णुमहेश्वराः॥
सृष्टिस्थित्यादिना युक्तास्तिष्ठन्ति तस्य वैभवाः।
तद्रूपकोटिकोट्यंशाः कलाः कन्दर्पविग्रहाः॥
जगन्मोहं प्रकुर्वन्ति तदण्डान्तरसंस्थिताः।
तद्देहविलसत्कान्तिकोटिकोट्यंशको विभुः॥
तत्प्रकाशस्य कोट्यंशरश्मयो रविविग्रहाः।
तस्य स्वदेहकिरणैः परानन्दरसामृतैः॥
परमामोदचिद्रूपैर्निर्गुणस्यैककारणैः।
तदंशकोटिकोट्यंशा जीवन्ति किरणात्मकाः॥
तदङ्घ्रिपङ्कजद्वन्द्वनखचन्द्रमणिप्रभा।
आहुः पूर्णब्रह्मणोऽपि कारणं वेददुर्गमम्॥
तदंशसौरभानन्तकोट्यंशो विश्वमोहनः।
तत्स्पर्शपुष्पगन्धादिनानासौरभसम्भवः॥
तत्प्रिया प्रकृतिस्त्वाद्या राधिका कृष्णवल्लभा।
तत्कलाःकोटिकोट्यंशा दुर्गाद्यास्त्रिगुणात्मिकाः॥

तस्या अङ्घ्रिरजःस्पर्शाद् विष्णुकोटिः प्रजायते। इति।

भक्तानन्दविवृद्धिदो भगवान् श्रीकृष्ण एवास्ति मुख्यं भगवतत्त्वम्। अन्ये मत्स्यकूर्मादयोऽवतारा अकृत्स्नशक्तिव्यञ्जिनस्तस्य विलासांशकलापदेनाभिधीयन्ते। अत एवोक्तं भागवते—

'एते चांशकलाः पुंसः कृष्णास्तु भगवान् स्वयम्।'
'अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल॥' इत्यादि।
केचिद् वदन्ति तस्यांशं ब्रह्म चिद्रूपमव्ययम्।
तद्दशांशं महाविष्णुं प्रवदन्ति मनीषिणः॥

इति चान्यत्रापि। एषास्य महिम्नो दिक्।

न तस्य प्राकृता मूर्तिर्मेदोमज्जास्थिसंभवा॥
स योगित्वादीश्वरत्वात् सत्यरूपोऽच्युतो विभुः।

सौन्दर्यसारसर्वस्वस्य माधुर्य्यौकसस्तस्य सौन्दर्यमाधुर्ये अपि वर्णनातीते। अत एव स भगवान् माधुर्यनिधिस्तमपरिकलितपूर्वं स्वं माधुर्यपूरं मणिमुकुरे प्रतिविम्बगतं विलोक्य राधिकेव सरभसमुपभोक्तुं कामयते। उक्तञ्चात्र विषये—

माधुर्य्यौको नाधुना वर्णनीयं रूपं यूनोरीहते यत्समीक्ष्य।
रत्नादर्शे हन्त कृष्णः सतृष्णं राधाभावं राधिका कृष्णभावं॥ इति।

प्रणतपटलीनां मधुरिम्णो गोपाङ्गनानामेकीभूतप्रेम्णो विनर्यासस्य तस्य माधुर्यं वर्णनातीतमिति किमत्र चित्रम्। तस्य नामाक्षरयोरपि यन्माधुर्यमनुभवन्ति सन्तस्तस्य तुला नास्ति लोकत्रयेऽपि। अत्र विषये पण्डितराजजगन्नाथमहोदयानामियं पदावली नृत्यति सर्वेषां रसनारङ्गे—

मृद्वीका रसिता सिता समशिता स्फीतं निपीतं पयः।
स्वर्यातेन सुधाप्यधायि कतिधा रम्भाधरः खण्डितः॥
सत्यं ब्रूहि मदीयजीव! भवता भूयो भवे भ्राम्यता।
कृष्णेत्यक्षरयोरयं मधुरिमोद्गारः क्वचिल्लक्षितः॥

अलं पल्लवितेन।

रतिः—

रतिस्तु तस्यैव भगवतो ह्लादिनीशक्तिः श्रीराधिकेव। उक्तं श्री-गोस्वामिकड़चायाम्।

"राधा कृष्णप्रणयविकृतिर्ह्लादिनीशक्तिरस्माद्।
एकात्मानावपि भुवि परं देहभेदं गतौ तौ" ॥ इति

चैतन्य चरितामृते तु ह्लादनीतोऽप्युत्कृष्टत्वमस्यं तस्या उक्तम्—

कृष्णे भगवत्ता ज्ञानसंवितेर सार।
ब्रह्मज्ञानादिक सब तार परिवार॥
ह्लादिनीर सार प्रेम प्रेम सार भाव।
भावेर परम काष्ठा नाम महाभाव॥
महाभावस्वरूपा श्रीराधा ठाकुरानी।
सर्वगुणखनि श्रीकृष्णकान्ता शिरोमनी॥

एतदेवाभिप्रेत्य प्रेमपत्तनटीकायाम्—

"रतिस्तु रसपक्षे तत्स्थायिभावाख्या, श्रीकृष्णपक्षे महाभावस्वरूपा श्रीराधैव, 'महाभावस्वरूपेयम्' इत्युक्तेः। रतेर्महाभावाङ्कुररूपत्वात् कार्यकारणयोरभेदोत्तया रतिः श्रीराधैवेति व्याख्यातम्। तद्रासत्तया मधुरमेचकेन निजेश्वर्यं विस्मृतमिति समस्तग्रन्थविवक्षितम्" इति।

उज्ज्वलनीलमणौ च—

तयोरप्युभयोर्मध्ये राधिका सर्वथाधिका।
महाभावस्वरूपेयं गुणैरतिवरीयसी ।" इति

बृहद्गोतमीयतन्त्रेऽपि—

देवी कृष्णमयी प्रोक्ता राधिका परदेवता।
सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहनी परा॥

श्रीब्रह्मसंहितायामपि—

आनन्दचिन्मयरसप्रतिभाविताभि-
स्ताभिर्य एव निजरूपतया कलाभिः॥

गोलोक एव निवसत्यखिलात्मभूतो
गोविन्दमादिपुरुषं तमहं भजामि ॥

तस्या महाभावस्वरूपता पद्यैरेभिः स्फुटं परिचीयते। पाद्मादिपु पुराणेपु पदे पदे सा समुपवर्णितास्ति, अधिकं तत्रैवावलोकनीयमिति।

एतत्सर्वं स्पष्टं विशदयितुं पौराणिकं किञ्चिदत्र प्रस्तूयते—पौराणिकास्तावदामनन्ति *—परमात्मा, नभो, दिशः, कालः, विश्वगोलः, गोलोकः, प्रकृतिरिति सप्त तत्त्वानि सन्ति नित्यानीति। सदातने गोलोके प्रकृतिसहचरो भगवानादिपुरुष एव प्रथममास। प्रकृतिश्च नासीत्ततो भेदवती। सा हि वह्नौ दाहिका शक्तिरिव, इन्दावभिख्येव, प्रभाकरे प्रभेव परमात्मन्यभेदेन तिष्ठति। प्रकृतिर्हि सर्वशक्तिस्वरूपा तया सहितः परमात्मा शक्तिमानभिधीयते। सैव भगवती तया युतो भगवानुच्यते। स्वेच्छामयोऽसौ देवः साकारो निराकारश्च विद्यते। योगिनस्तं तेजोरूपं निराकारं पश्यन्ति, वैष्णवास्तु तेजस्विनमन्तरेण कस्य तेज इति विप्रतिपत्तिं प्रदर्श्यैत्थं भगवन्तं ध्यायन्ति—

तेजोमण्डलमध्यस्थं ब्रह्म तेजस्विनं परम्।
स्वेच्छामयं सर्वरूपं सर्वकारणकारणम् ॥
अतीवसुन्दरं रूपं बिभ्रतं सुमनोहरम्।
किशोरवयसं शान्तं सर्वकान्तं परात्परम् ॥
नवीननीरदाभासधामैकं श्यामविग्रहम्।
शरन्मध्याह्नपद्मौघशोभामोचनलोचनम् ॥
मुक्ताच्छविविनिन्द्यैकदन्तपङ्क्तिमनोरमम्।
मयूरपिच्छचूडञ्च मालतीमाल्यमण्डितम् ॥
सुनसं संस्मितं कान्तं भक्तानुग्रहकारणम्।
ज्वलदग्निविशुद्धैकदन्तपङ्क्तिमनोरमम् ॥
द्विभुजं मुरलीहस्तं रत्नभूषणभूषितम्।
सर्वाधारञ्च सर्वेशं सर्वशक्तियुतं विभुम् ॥

* देवीभागवतम्, स्क० ९ अ० २।३।

सर्वैश्वर्यप्रदं सर्वस्वतन्त्रं सर्वमङ्गलम् ।
परिपूर्णतमं सिद्धं सिद्धेशं सिद्धिकारकम् ॥
ध्यायन्ते वैष्णवाः शश्वत् देवदेवं सनातनम् ।
जन्ममृत्युजराव्याधिशोकभीतिहरं परम् ॥
वयसो ब्रह्मणा यस्य निमेष उपचर्य्यते ।
स चात्मा स परं ब्रह्म कृष्ण इत्यभिधीयते ॥

एकको न रममाणो द्वितीयमिच्छन् सृष्ट्युन्मुखः स स्वेच्छया द्विधा बभूव । तस्य वामांशो वामारूपः दक्षिणांशश्च पुरुषरूपो बभूव । अथ रासोल्लासे सुरसिको रासेश्वरश्चन्द्रबिम्बवन्यवदनया तया सार्कं रासमण्डले चिरं चिक्रीड । क्रीडावसाने परिश्रान्तो जगत्पिता तस्यां वीर्य्यमाधत्त । तदा श्रान्तिमुपगतायास्तस्याः श्रमजलेन विश्वगोलकं सकलं परिपूर्णमभवत् ।

एवं गर्भमाधाय सा भगवती कृष्णचिच्छक्तिर्मन्वन्तरशतं कृष्णतेजसा जाज्वल्यमाना सुषाव स्वर्णाभमतिपृथुलं डिम्भमेकम् । तादृशं विपुलाकारं तमलोक्य दूयमानमानसा सा सलिलाप्लुते विश्वगोलके तं निचिक्षेप । तस्य त्यागं दृष्ट्वा हा हेति प्रलपन् भगवान्—

यतोऽपत्यं त्वया त्यक्तं कोपशीले ! च निष्ठुरे ! ।
भव त्वमनपत्यापि चाद्यप्रभृति निश्चितम् ॥
या यास्त्वदंशरूपाश्च भविष्यन्ति सुरस्त्रियः ।
अनपत्याश्च ताः सर्वास्त्वत्समा नित्ययौवनाः ॥ इति देवीं

शशाप । तस्मिन्नेवासरे देव्यास्तस्या जिह्वाग्रात् शुद्धस्फटिकसंकाशा कन्यकैका समजनि । अथ सा कृष्णप्राणाधिदेवी द्विधा संजाता । तस्यावामार्द्धं कमलालयारूपेण परिणतं दक्षिणार्द्धञ्च राधिकारूपेण । कृष्णोऽपि द्विधा समभवत्—दक्षिणार्द्धो द्विबाहुः, वामार्द्धनश्चतुर्बाहुरिति । देव्या जिह्वाग्रादुत्पन्नां शारदां कमलालयाञ्च कृष्णश्चतुर्बाहवे विष्णवे प्रादात् । विष्णुश्च ते समादाय वैकुण्ठमगच्छत् । रासेश्वरी तु गोलोकाधिपतेः श्रीकृष्णस्य सन्निधिमलङ्कृतवती । वैकुण्ठं

गतवतो भगवतो नारायणस्याङ्गात् सहस्रशः पार्षदाः संबभूवुः, कमलालयाङ्गाच्च कोटिशो न्यकृताप्सरसो दास्यः। तथैव गोलोकमण्डनस्य कृष्णस्य लोम्नां विवरतो वयसा तेजसा च समा असंख्या गोपाः सञ्जाताः, राधायाश्च रोमकूपेभ्यो रूपेण वयसा च तत्समा गोपकन्यकाः। सर्वा अपि ता रत्नभूषणभूषिताः सुस्थिरतारुण्यो मञ्जुभाषिण्यो राधातुल्या आसन्।

स किल प्रक्षिप्तोऽर्भकः ब्रह्मवयोमितकालपर्यन्तं जले तिष्ठन् द्विधाऽभवत्। तन्मध्ये शतकोटिरविप्रभः क्षुधापीडितो रोरूयमाणः शिशुरदृश्यत। मातापितृभ्यां परित्यक्तोऽसंख्यब्रह्माण्डनाथोऽप्यसावनाथवदूर्ध्वमपश्यत्। स्थूलादपि स्थूलतमः स एव विराड्नाम्ना प्रथितिमुपगतः। स खलु विराट् भगवतः श्रीकृष्णस्य षोडशांशोऽस्ति। सर्वविच्च राधाप्रकृतेरुत्पन्नत्वात् प्राकृतो महाविष्णुरभिधीयते। अस्य प्रत्येकं लोमकूपेषु सन्ति अनेके क्षुद्राः विराजः। तेषां संख्यां कृष्णोऽपि नहि वक्तुं क्षमः। तत्तत्क्षुद्रब्रह्माण्डस्थानां ब्रह्मविष्णुशिवादीनामपि नास्ति संख्या। पातालाद् ब्रह्मलोकपर्यन्तमभिधीयते ब्रह्माण्डम्। तत्र सन्त्यनेके लोकास्तेषामुपरि विद्यते वैकुण्ठं विष्णोर्धाम। तच्च ब्रह्माण्डात् बहिर्वर्ति नित्यमप्राकृतञ्चास्ति। तदुपरि विराजते सदातनो गोलोकः। कृष्णवदपारमहिमशालिनस्तस्य महिमा विद्यते तावद् वाचामविषयः।

सोऽयं गोलोकः तस्य मार्गश्च स्कन्दपुराणे इत्थमुपवर्णितः:—

मेरुशृङ्गं समारूढो नारदो दिव्यया दृशा।
श्वेतद्वीपं च तत्रस्थान् पश्यन्मुक्तान् सहस्रशः॥
वासुदेवे भगवति दृष्टिमाधाय तत्क्षणम्।
उत्पपात महायोगी सद्यः प्राप च धाम तत्॥
प्राप्य श्वेतं महाद्वीपं श्वेतान् चन्द्रप्रभान् शुभान्।
पूजयामास शिरसा मनसा तैश्च पूजितः॥
दिदृक्षुर्धाम परमं स च तत्परः स्थितः।
भक्तमैकान्तिकं विष्णोर्बुद्ध्वा भागवतास्तु ते॥

तमूचुस्तुष्टमनसो जपन्त द्वादशाक्षरम् ।

श्वेतमुक्ता ऊचुः—

मुनिवर्य्य ! भवान् भक्तः कृष्णस्यास्ति यतोऽत्र नः ।
दृष्टवान् देवदुर्दर्शान् किमिच्छन्नथ तृप्यति ॥

नारद उवाच—

भगवन्तं परं ब्रह्म साक्षात्कृष्णमहं प्रभुम् ।
द्रष्टुमुत्कोऽस्मि भक्तेन्द्रास्तं दर्शयत तत्प्रियाः ॥

स्कन्द उवाच—

तदैकः श्वेतमुक्तस्तु कृष्णेन प्रेरितो हृदि ।
एहि ते दर्शये कृष्णमित्युक्त्वा पुरतोऽभवत् ॥
प्रहृष्टो नारदस्तेन साकमाकाशवर्त्मना ।
पश्यन् धामानि देवानां तत ऊर्ध्वं ययौ मुनिः ॥
सप्तर्षींश्च ध्रुवं दृष्ट्वाऽनासक्तः कुत्रचित्स च ।
महर्जनतपोलोकान् व्यतीयाय द्विजोत्तमः ॥
ब्रह्मलोकं ततो दृष्ट्वा श्वेतलोकानुगो मुनिः ।
कृष्णस्यैवेच्छयाऽध्वानं प्रापाप्यावरणेष्वपि ॥
भूम्यप्तेजोऽनिलाकाशाहम्महत्प्रकृतीः क्रमात् ।
क्रान्त्वा दशोत्तरगुणा प्राप गोलोकमद्भुतम् ॥
धाम तेजोमयं तद्धि प्राप्यमेकान्तिकैर्हरेः ।
गच्छन् ददर्श विततामगाधां विरजां नदीम् ॥
गोपीगोपगणस्नानधौतचन्दनसौरभाम् ।
पुण्डरीकैः कोकनदैश्श्यामिन्दीवरैरपि ॥
तस्यास्तटं मनोहारि स्फटिकाश्ममयं महत् ।
प्राप श्वेतहरिद्रक्तपीतसन्मणिराजितम् ॥
कल्पवृक्षालिभिर्जुष्टं प्रवालाङ्कुरशोभितम् ।
स्यमन्तकेन्द्रनीलादिमणीनां खनिमण्डितम् ॥

नानामणीन्द्रनिचितसोपानततिशोभितम् ।
कूजद्भिर्मधुरं जुष्टं हंसकारण्डवादिभिः ॥
वृन्दैः कामदुघानाञ्च पिबन्तीनां जलं शुभम् ।
उत्तीर्याथ धुनीं दिव्यां तत्क्षणादीश्वरेच्छया ॥
तद्धामपरिखाभूतां शतशृङ्गमवाप सः ।
हिरण्मयं दर्शनीयं कोटियोजनमुच्छ्रितम् ॥
विस्तारे दशकोट्यस्तु योजनानां मनोहरम् ।
सहस्रशः कल्पवृक्षैः पारिजातादिभिर्द्रुमैः ॥
मल्लिकायूथिकाभिश्च लवङ्गैलालतादिभिः ।
स्वर्णरम्भादिभिश्चान्यैः शोभमानं महीरुहैः ॥
दिव्यैर्मृगगणैर्नागैः पक्षिभिश्च सुकूजितैः ।
दुर्गायितस्य तद्धाम्नस्तस्य रम्येषु सानुषु ॥
मनोज्ञान् विततानैक्षत् भगवद्रासमण्डपान् ।
वृतानुद्यानततिभिः फुल्लपुष्पसुगन्धिभिः ॥
कपाटै रत्ननिचितैश्चतुर्द्वारसुशोभनान् ।
चित्रतोरणसम्पन्नैः रत्नस्तम्भैः सहस्रशः ॥
जुष्टांश्च कदलीस्तम्भैर्मुक्तालम्बैर्वितानकैः ।
दूर्वालाजाक्षतफलैर्युक्तान्माङ्गलिकैरपि ॥
चन्दनागरुकस्तूरीकेसरोक्षितचत्वरान् ।
सुश्राव्यवादनिनदैर्हृद्यान् बहुविधैरपि ॥
तेषु यूथानि गोपीनां कोटिशः स ददर्श ह ।
अनर्घ्यवासोभूषाभिः सद्रत्नमणिकङ्कणैः ॥
काञ्चीनूपुरकेयूरैः शोभितान्यङ्गुलीयकैः ।
तारुण्यरूपलावण्यैः स्वरैश्चाप्रतिमानि हि ॥
राधालक्ष्मीसवर्णानि शृङ्गारिककराणि च ।
भोगद्रव्यैर्बहुविधैर्मण्डपेषु युतेषु च ॥
विलसन्ति च गायन्त्यो मनोज्ञाः कृष्णगीतिकाः ।

उपत्यकासु तस्याद्रेरथ वृन्दावनाभिधम् ॥
कृष्णस्य राधिकायाश्च प्रियं तत्क्रीडनस्थलम् ।
कल्पद्रुमालिभी रम्यं सरोभिश्च सपङ्कजैः ॥
मल्लिकामाधवीकुन्दैर्लवङ्गैर्यूथिकादिभिः ।
मन्दशीतसुगन्धेन सेवितं मातरिश्वना ॥
दधिमन्थनशब्दैश्च सर्वतो नादितं मुने ! ।
तद्वीक्ष्य हृष्टः स प्राप गोलोकपुरमुज्ज्वलम् ॥
वर्तुलं रत्नदुर्गैश्च राजमार्गोपशोभितम् ।
राजितं कृष्णभक्तानां विमानैः कोटिभिस्तथा ॥
रथै रत्नेन्द्रखचितैः किङ्किणीजालशोभितैः ।
महामणीन्द्रनिकरै रत्नस्तम्भालिमण्डितैः ॥
अद्भुतैः। कोटिशः सौधैः पङ्क्तिसंस्थैः मनोहरम् ।
विलासमण्डपै रम्यै रत्नसारविनिर्मितैः ॥
रत्नेन्द्रदीपततिभिः शोभितं रत्नवेदिभिः ।
केसरागुरुकस्तूरीकुङ्कुमद्रवचर्चितम् ॥
श्रीकृष्णदर्शनायातैर्नैकब्रह्माण्डनायकैः ।
विरञ्चिशङ्कराद्यैश्च चलिहस्तैः सुसङ्कुलम् ॥
व्रजद्भिः कृष्णवीक्षार्थं गोपगोपीकदम्बकैः ।
सुसङ्कुलमहामार्गं मुमोदालोक्य तन्मुनिः ॥
कृष्णमन्दिरमापाऽथ सर्वाश्चर्यं मनोहरम् ।
नन्दादिवृषभान्वादिगोपसौधालिभिर्वृतम् ॥
चतुर्द्वारैः षोडशभिः दुर्गैः सपरिखैर्युतम् ।
कोटिगोपवृतैकैकद्वारपालसुरक्षितैः ॥
रत्नस्तम्भकपाटेषु द्वार्षु स्वाग्रस्थितेषु सः ।
उपविष्टान् क्रमेणैव द्वारपालान् ददर्श ह ॥
वीरभानुं चन्द्रभानुं सूर्यभानुं तृतीयकम् ।
वसुभानुं देवभानुं शक्रभानुं ततः परम् ॥

रत्नभानुं सुपार्श्वं च विशालमृषभं ततः।
अंशुं बलं च सुबलं देवप्रस्थं वरूथपम्॥
श्रीदामानं च नत्वाऽसौ प्रविष्टोन्तरस्तदाज्ञया।
महाचतुष्के वितते . तेजोऽपश्यद् महोच्चयम्॥
तरवेककालसम्भूतकोटिकोट्यर्कसन्निभम्।
दिशश्च विदिशः सर्वा ऊर्ध्वाधो व्यामुवच्च यत्॥
कृष्णस्यानुग्रहो यस्मिन् स तेजसि समीक्षते।
केवलं तेज एवान्ये पश्यन्ति न तु तं मुने॥

तस्मिन् ददर्शाद्भुतदिव्यमन्दिरं विचित्ररत्नेन्द्रमयं मनोज्ञम्।
सिंहासनं तत्र मणीन्द्रसारै रत्नेन्द्रसारैश्च विनिर्मितं सः॥
आश्चर्यकृत् प्रेक्षकमानसानां दिव्यं मुनिः प्रैक्षत भूरिहर्षः।
तत्राथ कृष्णं भगवन्तमैक्षन्नारायणं निर्गुणमास्थितं सः॥
सर्वेशमीशं पुरुषोत्तमं च यं वासुदेवं च वदन्ति सात्वताः।
यं केचिदाहुः परमात्मसंज्ञं केचित् परं ब्रह्म परात्परञ्च॥
ब्रह्मेति केचिद् भगवन्तमेके विष्णुं च भक्ताः परमेश्वरञ्च।
कन्दर्पसाहस्रमनोहराङ्गं सदा किशोरं करुणानिधानम्॥
अतिप्रशान्ताकृतिदर्शनीयं क्षराक्षरेभ्यश्च परं स्वतन्त्रम्।
नैकाण्डसर्गस्थितिनाशलीलाविधायकापाङ्गनिरीक्षकञ्च॥
अनेककोट्यण्डमहाधिराजं विश्वैकवर्यं नटवर्यवेषम्।
नवीनजीमूतसमानवर्णं कर्णोल्लसत्सन्मकराभकुण्डलम्॥
निजाङ्गनिर्यत्सितभूरितेजश्छायावृतत्वात् सितवर्णमुक्तम्।
निनादयन्तं मधुरं च वेणुं कृत्वा मुखाग्रेऽम्बुजचारुदोर्भ्याम्॥
जयासुनीलाललितामुखानां वृन्दैः सखीनां सह राधया च।
समर्च्यमानं रमया च भामाकलिन्दजाजाम्बवतीमुखानाम्॥
धर्मेण वेदैरखिलैर्भगैश्च ज्ञानादिभिः संयतपाणियुग्मैः।
निषेव्यमाणं च सुदर्शनाद्यैर्निजायुधैर्मूर्तिधरैरनेकैः॥
सनारमाणिक्यसुवर्णवर्णैः सितैश्च केचिन्निजपार्षदाद्यैः।

उपासितं चक्रगदाब्जशङ्खलसद्भुजैर्नन्दसुनन्दमुख्यैः ॥
श्रीदाममुख्यैरथ गोपवेषैर्भक्त्यानवभ्रैर्द्विभुजैरनेकैः ।
उपास्यमानं गरुडेन चाग्रतो विभूतिभिश्चाष्टभिरानताभिः ॥
दृष्ट्वा तमत्यद्भुतदिव्यमूर्तिं तद्रूपसौरभ्यहृताखिलेन्द्रियः ।
आनन्दवारिप्रतिरुद्धदृष्टिः प्रेम्णोर्ध्वरोमा सुखसंभृतोऽभूत् ॥
दण्डवत् तं नमस्कृत्य नारदः प्रेमविह्वलः ।
बद्धाञ्जलिपुटस्तस्थौ वीक्षमाणस्तदाननम् ॥ इत्यादि ।
[स्कन्द० पु० वासुदेवमहात्म्यम्, अ० १५।१६]

पुराणांशानिमाननुसृत्यैव रचितं प्रेमपत्तनकथामुखमिति
स्पष्टमनेन प्रतीयते । इति ।

समन्वयः

अत्र पुनः पुनः पुराणादिवचनचयमुद्धृत्य प्रेमपत्तनपरिचये यत्नमादधतामस्माकमिदमस्ति तात्पर्यम्—यदस्मिन् प्रस्तुते पुस्तके—यत्राऽधर्म एव धर्मः, यत्राऽविनय एव विनयः, यत्राऽनाचार एवाचारः, यत्रासत्यमेव सत्यम्, यत्रासतीत्वमेव सतीत्वम्,—इत्यादीनामापाततोऽनाचारप्रतिपादकानामिव वचसामस्ति भूयस्त्वम्। अवलोक्य तानि वचांसि कश्चित् पेशलमतिपदिदं नाकलयेद् यदनाचारप्रचारकमिदम्पुस्तकमिति । विपरीतभावनामिमां निरसितुं कीदृक् तत्पत्तनं कीदृशाश्च तत्रत्या गुणवर्जिता जना इति परीक्षणमावश्यककोटितामाटीकत । अत एव तदनुष्ठितमस्माभिः । तत्र जातमाम्रेडितं क्षन्तव्यं मनीषिभिः ।

इदानीमिदमत्र विचारणीयम्—यतः पूततरं लोकान्तरं नास्ति, तादृशे पूर्वमुपवर्णिते आनन्दमयेऽतिशयपुण्यविपाकजेन भगवदनुग्रहेण कृतवसतीनां गुणत्रयवर्जितानां जनानामाचारानाचाररीतिरस्मत्साधारणी न वेति । नास्त्येवास्मत्साधारणीति सकलजन-

प्रसिद्धम्; शास्त्रेषु च बहुशो यत्र तत्र समुद्धोषितम्। अत्रेदं निदानम्—यत् पदं लब्धुमनुष्ठीयते धर्मः, सेव्यते सदाचारः, विनयसत्यवचनत्वादयो गुणाश्चोपार्ज्यन्ते प्राप्ततत्पदानां तु किमवशिष्यते यदर्थं तैस्तत्र यत्नः करणीयः।

निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः। [भागवतम्]

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन॥ [गीता]

यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम्॥ [भागवतम्]

अधर्मो धर्मतामेति ह्यादृते परमेश्वरे।
धर्मोऽप्यधर्मतामेति तमनादृत्य भावितः॥

इत्यादिवचनान्यपि तादृशां भगवत्प्रेमपूरपरिप्लुतस्वान्तानां धर्माधर्मबन्धननिर्मुक्तिमानन्ति।

तानेव भगवद्भक्तशिरोमणीनुद्दिश्य गोस्वामिश्रीहरिवंशमहानुभावैरप्यभिहितम्—

कैशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकां।
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः॥
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मैऽप्यहो निर्ममाः।
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भ्यो नमः॥

अन्यच्च—

लिखन्ति भुजमूलयोर्न खलु शङ्खचक्रादिकं।
विचित्रहरिमन्दिरं न रचयन्ति भालस्थले॥
लसत्तुलसिमालिका दधति कण्ठपीठे न वा।
गुरोर्भजनविक्रमात् क इह ते महाबुद्धयः॥

रसिकोत्तंसमहाभागेनापि—

प्रौढप्रेममयं भाति यद् व्रजे व्रजवासिनाम्।
अधानं तदभिधानां प्रधानादधिकं मतम्॥

तामवस्थामनुभवद्भिः श्रीमच्चैतन्यमहाप्रभुपादैरपि—

नाहं विप्रो न च नरपतिर्नापि वैश्यो न शूद्रो
नो वा वर्णी न च गृहपतिर्नो वनस्थो यतिर्वा।
किन्तु प्रोद्यन्निखिलपरमानन्दपूर्णामृताब्धे-
र्गोपीभर्त्तुः पदकमलयोर्दासदासानुदासः॥ इति।

नेयं सर्वसाधारणी दशा तां भूमिमनारूढाः पद्धतिमिमामनुकुर्वाणा दीपशिखाश्लिष्टस्य पतङ्गस्य विधया नूनं समूलं नश्येयुः। नाप्यनाचारप्रचारगन्धोऽप्यनेनाशङ्क्यो विद्वद्भिः। नूनं सदाचारशिरोमणीनामेषा परिपाकावस्था।

यथा श्रुतिस्मृतिपुराणप्रतिपादितसदाचाररतानां दार्शनिकसार्वभौमाणां विचारराज्यचक्रवर्त्तिनां मनीषामहाराजानां भगवतामाचार्यवरशङ्करपादानाम्—

न वर्णा न वर्णाश्रमाचारधर्मा
न मे धारणाध्यानयोगादयोऽपि।
... .
.. . .॥
न माता पिता वा न देवा न लोका
न वेदा न यज्ञा न तीर्थं ब्रुवन्ति।
. .. . .
... .॥

इत्यादिपद्यपटलीं दृष्ट्वा आचार्यचरणा वर्णाश्रमाचारधर्मान्नाद्रियन्तेऽतोऽनाचारप्रवर्तकाः, वेदयज्ञादीनामभावमामनन्तो नास्तिका इति न जातुचित् कश्चिदपि विपश्चिदवगच्छति। यतो भगवता कृतब्रह्मसाक्षात्कारं ब्रह्मीभूतं ज्ञानिनमुद्दिश्य तस्यैव पारमार्थिकीमवस्थामभिलक्ष्य न खलु व्यावहारिकीम्, पदावलीयमारचिता, उत्तरार्द्धे सर्वत्र श्लोकेषु "तदेकोऽवशिष्टः शिवः केवलोऽहम्" इति दर्शनात्। अयन्तु पन्थाः शास्त्रेषु शतशः समुद्घोषित एवास्ति।

तथैवात्राप्यवगन्तव्यम्। सेयं प्रेमपत्तनप्रणाली परा भक्तिमा-

श्रितानां त्रिगुणातीतानां भगवत्प्रेयसामेव, न खलु प्राकृतानामस्मादृशामिति सर्वं समञ्जसम्। अलं पल्लवितेन।

ग्रन्थकृदाविर्भावकालः

ग्रन्थकृदयं कदाऽवनिमण्डलं मण्डयामासेति मीमांसायां प्रस्तूयमानायां यद्यप्यमुकवत्सरेऽस्य जनुर्जातमिति प्रतिपादयितुं नास्त्यत्र परिस्फुटः कश्चनाधारः, तथापि सन्ति ग्रन्थेऽस्मिन् तेषां बहूनां भक्तशिरोमणीनां सूक्तयः, येषामाविर्भावावसरो नास्ति तिमिरततिविलीनः। ते च तावत् श्रीचैतन्यमहाप्रभुपादाः श्रीरूप-सनातन-जीव गोस्वामिनः श्रीहितहरिवंशगोस्वामिश्रीविश्वनाथचक्रवर्तिप्रभृतयश्च। तेषु श्रीचैतन्यपादानामाविर्भावसमयस्तावत्* (१४८५ A.D) प्रतिपादितपूर्वः। १५३३ खिस्ताके ४८ वर्षमिते वयसि कीर्तिशेषतां गता इति च वङ्गभाषानिबद्धेन निम्नाम्नातेन चैतन्यचरितामृतपद्येनावसीयते।

श्रीकृष्ण चैतन्य पृथ्वी ते अवतरि।
अष्टचल्लीस ४८ वत्सर प्रकट विहरि॥
चौद्दशतसात १४०७ शाके जन्मेर प्रमाण।
चौद्दशतपञ्चायन्ने १४५५ हइला अन्तर्धान॥

श्रीरूपसनातनावपि तत्समकालिकावेव। प्रचरति जनश्रुतिरेषा यत् श्रीरूपगोस्वामिनां कृतिः विदग्धमाधवं श्रीचैतन्यदेवैः प्रशंसितमिति। विदग्धमाधवसम्पूर्तितिथिस्तदन्ते तैरेव स्वयमालिखिता†। तेन ज्ञायते। तदन्तर्धेरेकवर्षपूर्वं विदग्धमाधवं पूर्तिमुपगतमिति। श्रीसनातनगोस्वामिनस्तावद् रूपाग्रजाः, तेषां वृद्धवैष्णवतोषिणी

* शाके मुनिव्योमयुगेन्दु-१४०७-गण्ये शुभोदये फाल्गुनपौर्णमास्याम्।
त्रैलोक्यभाग्योदयपुण्यकीर्तिः प्रभुः शचीनन्दन आविरासीत्॥

† नन्दसिन्धुरबाणेन्दु-१५८९-संख्ये संवत्सरे गते।
विदग्धमाधवं नाम नाटकं गोकुले कृतम्॥ [नि० सा० सं० पृ० २२९]

नाम भागवतटीका १५५४ खिस्ताब्दे पूर्तिमुपगता* तत्संक्षेपश्च श्रीजीवगोस्वामिभिः १५८२ खिस्ताब्दे विहित इति भागवतदशमस्कन्धान्ते विन्यस्तमस्ति† ।

श्रीमद्धितहरिवंशगोस्वामिमहोदयानामपि जन्मसमयः वि० सं० १५३० वैशाखकृष्णा ११ एकादशीतिथि‡ [१४७२ A.D.] मिश्रबन्धुविनोदनामनि भाषाकवीनामितिवृत्ते निरूपितः§ । ते असीतिवर्षमितमायुरुपभुज्य १६०९ विक्रमाब्दे कीर्तिशेषतां गता इति तत्रैव स्पष्टीकृतमस्ति । एभ्यो नूतनमर्वाचीनोऽयं ग्रन्थकार इति निर्विवादमेव । श्रीविश्वनाथचक्रवर्तिनामपि प्रकृतग्रन्थे विद्यते सूक्तिः । येषां सूक्तयोऽस्मिन् दृष्टिगोचरीभूतास्तेषां ज्ञातेतिवृत्तानां समेषां मध्येऽर्वाच्चोऽमी चक्रवर्तिनः । अमीभिः श्रीमद्भागवतोपरि सारार्थदर्शिनी नाम टीका आरचिता, तत्परिसमाप्तौ—

"रूत्वक्षिषड्भूमि-१६२६ मिते राधाकृष्णसरस्तटे ।
शुक्लपक्ष्यां सिते माघे टीकेयं पूर्णतामगात् ॥
टीकेयं वैश्वनाथी भवतु भगवतो भक्तलोकस्य रस्या"

इति स्वनामनिर्देशपूर्वकं स्वग्रन्थपरिसमाप्तिकालः १६२६ शकाब्दः (१७०४ A D) तैः स्वयमाम्नातः। उपलब्धासु तत्कृतिषु चरमा कृतिरियम्, कृष्णभावनामृतञ्चाचरमेति विभाव्यते। तत्सम्पूर्तिस्तावत् फाल्गुनपूर्णिमायां १६०१ शकाब्दे [१६७९ A D.] जातेति तत्रैव लिखितमस्ति । दानकेलिकौमुदीटीका, यस्या वाक्यं प्रस्तुतपुस्तके + समुद्धृतमस्ति,

* शाके षट्सप्ततिमनौ १४७६ पूर्णेयं टिप्पणी शुभा ।

† संक्षिप्ता युगशून्याम्रषड्के-१५०४ गणिते तथा ॥

[भा० स्क० १० वृन्दा० सं०]

‡ भक्तमाले तेषां जन्म १५५९ विक्रमाब्दे समभूदिति विद्यते ।

[पृ० ६०६ कलकत्ता संस्क०]

§ मिश्रबन्धुविनोद पृ० २५० भाग प्र० ।

+ तथोक्तं श्रीविश्वनाथचक्रवर्तिमहाशयैः दानकेलिकौमुदीटीकायाम्—

ततोऽर्वाचीना प्राचीना वेति असंदिग्धमभिधातुं न पारयामो वयम्। परमनुमानतस्ततोऽर्वाचीना दानकेलिकौदीटीकेति प्रतीयते। श्रीविश्वनाथचक्रवर्तिभ्योप्ययं ग्रन्थकृदर्वाचीनस्तत्समकालिको वेति सन्देहे समुल्लसति तत्परिहारीयापि विद्यतेऽत्र सूत्रमेकम्। तच्च प्रेमपत्तनटीकायां विद्यमानम्—"वल्लभरसिको मदनुजः" (प्रे० टी०पृ० ११) "इति कुलपतिकविरिदानीन्तनः" (प्रे०टी०पृ० १४५) इति वाक्यद्वयम्। अनेन निश्चप्रचमिदं यदस्य व्याख्यानं वल्लभरसिककुलपतिकविस्थितिसमये समभूदिति। कोऽयं कुलपतिः कश्च वल्लभरसिक इति जिज्ञासायाम्—आगराभिजनो मिश्रोपाह्वः कुलपतिरासीद् माथुरो भूसुरः। अयं सप्तदशशतकस्यासीदुद्दामभाषाकविः। जयपुरनृपतेर्महाराजश्रीजयसिंहसूनोर्महाराजश्रीरामसिंहस्यासीदाश्रितः। अनुमानतोऽवगम्यते १६७७ विक्रमाब्दे (१६२० A. D.) अयं समभूदिति मिश्रबन्धुविनोदादधिगम्यते*। ज्ञायते संस्कृतभाषायामपि तस्यासीदसाधारणोऽधिकार इति, तेन काव्यप्रकाशादीन् सम्यगालोच्य तन्मतसारांशो भाषायामालिखितः। क्वचित्तन्मतखण्डनमप्याचरितम्। भाषामयाः सप्त ग्रन्थास्तस्याद्यावधि प्रकाशमुपगताः। तैस्तस्य कवित्वप्रौढ़िर्भृशं परिचीयते। इदानीं भाषासाहित्ये स आचार्यश्रेणिमलङ्करोति। संस्कृतस्फुटपद्यानि तु तस्य दृश्यन्ते। प्रस्तुतपुस्तके ग्रन्थकारेणाप्येकमपद्यं तस्योद्धृतम्। तच्च यथा—

भूभृत्त्वमीत्यैवौदीच्याः शैलाहिममिषाद्धृतैः।
देव! त्वत्कीर्तिकर्पूरपूरैरेव कृताः सिताः॥

परं कुत्रत्यमिदम्पद्यमिति न ज्ञायते। संस्कृतिमायामपि वाचि तेन किमपि खण्डकाव्यं महाकाव्यं वा रचितं न वेति अद्यावधि नाधिगतम्। तस्य सप्तग्रन्थेषु प्रथमो ग्रन्थः 'रसरहस्यम्' १७२७ विक्रमाब्देऽ-

दानकेलिकलौ लुप्तधर्ममर्यादयोर्भजे।
राधामाधवयोः काममलोमदम्ममदाननम्॥ [प्रे० प० पृ० ५६]

* मिश्रबन्धुविनोद २य भा० पृ० ४७१।

वसितिमुपगत इति तत्समातौ तेन स्वयमालिखितम्। सप्तमी तत्कृतिस्तावत् १७४२ विक्रमाब्दे समाप्तेति च तेनैव लिखितम्। मिश्र-बन्धुभिः कुलपतेर्जनिसमयः तस्य कवितापौढिमवलोक्य निर्धारितः। तादृशी कवितापौढिः पञ्चाशद्वर्षदेशीयस्यैव कवेः काव्ये भवितु-मर्हतीति तेषां मतम्। १७२७ विक्रमेऽब्देऽवसितां तत्कृतिं दृष्ट्वा ततः ५० वर्षपूर्वं तस्य जनिकालस्तैर्निर्धारितः। परं विप्रतिपद्यामो वयमत्र, यतो हि श्रूयन्ते बहवो रससिद्धाः कवीश्वरा दार्शनिकाश्च जन्मान्तरागतसंस्कारबलेन येषां वाक् प्रथमे वयस्येव प्रौढिं पुपोष। आचार्यश्रीशङ्करपादाः श्रीहर्षप्रभृतयश्चात्र सन्ति दृष्टान्ताः। अतः सिद्धं नास्ति सर्वथा कवितापौढेर्वयःप्रौढेश्च सामानाधिकरण्यमिति। अस्माकं मनसि प्रतिभाति—कुलपतिकविः १६९० विक्रमवत्सरेऽजनीति। इत्थं १६६७ खिस्ताब्दे राजसिंहासनमधिरूढे जयपुराधीशे महाराजरामसिंहे तदाश्रयदातृता च निपुणमुपपद्यते। १६७७ वि० जन्म-स्वीकारे तु वार्धक्ये स तदाश्रितोऽभूदित्यवसीयते। वल्लभरसिक-स्यापि जन्मकालो मिश्रबन्धुभिः स्वविनोदे १६८१ वि० निर्दिष्टः *। सोऽपि अनुमानत एव स्थिरीकृत इति प्रतिभाति। अतोऽत्राप्यस्ति विप्र-तिपत्तिरस्माकम्, तथाहि श्रीवि नाथचक्रवर्तिनः प्रकृतग्रन्थकारस्यापि सुबहुमान्याः सुगृहीतनामधेयाः सन्तीति दर्शितपूर्वम्। तेषां चरमा कृतिः १६२६ शाके [१७६१ वि०] अवसितेत्यप्युक्तचरम्। यदि तदानीं चक्रवर्तिनां सप्ततिवर्षदेशीयं वयः कल्प्येत, तदापि प्रकृतग्रन्थव्याख्या-तुरनुजे तदपेक्षया दशभिर्वर्षैर्यौवं प्रतीयते, तच्च कथमपि न संगच्छते। अतः कल्प्यते सम्भवतः १७०० विक्रमाब्दे तेन जनिर्लब्ध-मिति। अनया विवेचनया चक्रवर्तिनः प्रेमपत्तननिर्मातारश्च सम-सामयिकाः इति सिद्ध्यति। तत्र च चक्रवर्तिनां ज्येष्ठता, प्रेमप-त्तननिर्मातुश्च कनिष्ठता प्रतीयते, चक्रवर्तिषु तदीयसुबहुमानदर्शनात्। अतः १६९५ विक्रमेऽब्दे प्रेमपत्तनकारा जनिमापुरिति निर्धार्यते।

* मिश्रबन्धुविनोद भा० २ प्र पृ० ४१८।

ग्रन्थकृत्परिचयः

प्रकृतग्रन्थकारस्य रसिकोत्तंस इति नामासीत्। तच्च न वास्तवमिति अस्मादेव ग्रन्थादवसीयते। तत्प्राप्तिनिदानमत्रेत्थमुपवर्णितम्—"रसिकोत्तंसो हरिर्जयति"* इति पद्यं विधाय भगवति समर्प्य सुप्तस्य सहसा स्वप्नमभूत्। तत्र विराजमानयोः प्रियाप्रिययोरन्तिकमागतं मां विलोक्य शनैः प्रिया प्रियं प्रत्युक्तवती—तवायमागतो रसिकोत्तंस इति, तन्निशम्य जातजागरस्तां प्रातः सखेदं सविनयं विज्ञापितवान् कविः—

मां वीक्ष्य दयितपुरतो रसिकोत्तंसस्तवागतोऽयमिति।
देवि! वचो भवदीयं मदीयमनिशं मनस्तुदति॥ इति॥

तत एव तस्य रसिकोत्तंस इति नामधेयं जातम्। तस्य वास्तवं नाम किमासीदिति न ज्ञायते। केचन तस्य रसिकशिरोमणिरिति नामामनन्ति तत्र मूलं मृग्यम्। हरिदासरसिकस्तु ततोऽतिप्राचीनः, अतः सोऽयमिति न भ्रमितव्यम्।

अस्य मुकुन्दकुन्दाष्टकं नामापराऽपि कृतिरस्तीति ज्ञायते। परं सा नाद्यावधि प्रकाशमुपगता। आफ्रेक्टपण्डितेन रचिते बृहति Catalogus Catalogorum नामनि सूचीपत्रे प्रेमपत्तनं प्रेमपत्तनिकानाम्ना निर्दिष्टम्। स च निर्देशः प्रमादत एव कृत इति ज्ञायते, यतोऽस्य प्रेमपत्तनमिति नाम ग्रन्थे बहुशः समुद्घोषितमस्ति।

अयं कीदृशो भक्तशिरोमणिरित्यनुपमयाऽनयैव रचनया परिचीयेत। कृतभगवत्साक्षात्कारोऽयमिति तु तस्य नामैव निर्दिशति। तादृशी भक्तिरेवात्र हेतुर्यदस्य काव्ये पदलालित्यम्, अर्थगाम्भीर्यम्, माधुर्यम्, औज्ज्वल्यञ्च युगपदेवाहमहमिकया परिपतन्ति दृश्यन्ते। प्रकृतग्रन्थे तन्निर्मितानि सन्ति १०२ पद्यानि। अत्र पठितं प्रथमं पद्यं तावत् विदग्धमाधवनाटकतो गृहीतम्। चतुर्थं श्रीमद्भागवतात्। अङ्कितानि

* कुग्रन्थमिदमिति न ज्ञातम्।

शिष्टानि तस्यैवेति निर्विवादम् । शेषाण्यन्यदीयानि पद्यानि कविना तत्कर्तृनामनिर्देशपुरःसरमुपात्तानि तानि च नाङ्कितान्यस्माभिः । एभिः १०२ पद्यैरेव भृशं प्रतीयतेऽस्य कवित्वशक्तिः, भक्तप्रवरोऽयं कविप्रवर इति च निःसन्देहमभिधातुं शक्यते। उच्चकविकोटिमाटीकमानेऽप्यस्मिन् लेशतोऽप्यहङ्काराभावोऽस्य महीयस्त्वं द्योतयति—

अस्यानल्पं जल्पतो दासभावाद्
गूढं लीढोच्छिष्टबिन्दून्मदस्य ।
अन्त पीतप्रेममाध्वीकघूर्णा-
वन्तः सन्तः साहसं मा हसन्तु ॥

उचितैव भक्तप्रवरस्य व्याहृतिरियम् । भक्तप्रवरः कविप्रवरश्च महात्मा तुलसीदासोऽपि, यस्य काव्यस्य तुलैव नास्ति, एतत्सहोदरान् वचनचयानुदाजहारैव । कविकुलमौलिः कालिदासोऽपि । महीयसामयं स्वभाव एव ।

टीकाकृत्परिचयः

कश्चास्य टीकाकारः, किञ्च टीकाया अभिधेयमिति ग्रन्थेऽस्मिन् न स्पष्टतयोट्टङ्कितम् । टीकान्ते विद्यते पद्यमेतत्—

अद्भुतेन मयोन्नीतमद्भुतं प्रेमपत्तनम् ।
प्रियः प्रविश्य प्रीणातु रतिः क्रीणातु मामिति ॥

अद्भुतेन मयोन्नीतम्=अद्भुतनामकेन मया व्याख्यानादिना परिष्कृतमित्यर्थप्रतीतेः, अद्भुतष्टीकाकारः, ग्रन्थपरिसमाप्तिपङ्क्तौ—

"इति श्रीरसिकोत्तंसरचितं प्रेमपत्तनं प्रेमसर्वस्वपूर्णं संपूर्णतामगात्" प्रेमसर्वस्वपूर्णम्=प्रेमसर्वस्वयुतमित्यर्थप्रतीतेः, प्रेमसर्वस्वं टीकाभिधेयमिति च मया कल्पितम् । प्रेमपत्तननिर्मातुः शिल्पिनोप्यस्ति 'अद्भुत' इत्यभिधेयम्, तन्मुखेनाप्युपरितनी उक्तिः संगच्छते ।

केचिदामनन्ति ग्रन्थकारेणैव टीकाप्यारचितेति । अनयोः कतरः पक्षः श्रेयानिति सन्देहे मनसि पदं कुर्वति प्रकृतविचारोपयोगिनः

कतिचन ग्रन्थांशानुद्धृत्य विचारयामः—"कवेर्भावविशेषजिज्ञासा चेत् तत्कृतं मुकुन्दकुन्दाष्टकं द्रष्टव्यम्" (प्रे० टी० पृ० ५) इत्यत्र परोक्ष्य-वचनेन तदा कवेर्निर्देशात्,

"मङ्गलमाचरति रसिकोत्तंसो नाम कविप्रवरः। तन्नामप्रातिनिदान-मग्रतो व्यक्तं भावि"। (प्रे० टी० पृ० ७) इत्यत्र कविप्रवर इति श्लाघा-वचनदर्शनात्, अद्भुतेन मयोदितमित्यन्तिमपद्यदर्शनाच्च ग्रन्थकृतो रसिकोत्तंसादन्यः टीककार इत्यापाततः प्रतिभाति ।

परन्तु सन्त्यत्र ग्रन्थकारेणैव टीकाप्येषा निर्मितेति पक्षसाधकानि बहूनि वचनानि । तेषु तावत्— "अत्र पुरञ्जनोपाख्यानादिवत् परोक्षत्वेन कथनं तु नववधूनामवगुण्ठनमिव निजोक्तीनां दर्शनोत्कलि-कया चमत्कारविशेषार्थम्, तथा निजोपास्यस्य वस्तुनः संगोपनार्थम्, निजसन्दर्भस्य भगवत्प्रियत्वापादनार्थञ्च । तदुक्तम्—'यत्परोक्षप्रियो देवो भगवान् भूतभावनः' इति" (प्रे० टी० पृ० ११–१२) इत्यादि-ग्रन्थकृदाशयमसंदिग्धतया वक्तुमपरष्टीकाकारो नेष्टे । परोक्षतया कथनस्य तात्पर्यमपि कविना स्वयं स्पष्टीकृतम्। "वल्लभरसिको मद-नुजः" (प्रे० टी० पृ० ११) रसिकपदघटितं नामापि तं रसिकोत्तंसानुज-मवगमयति । दृश्यते हि लोके सहोदराणां नामसु प्रायः किमपि शब्द-सादृश्यम् । यद्यपि तस्य रसिकोत्तंस इति नाम प्रदर्शितदिशा समभूत्। तथापि तस्य वास्तविकनाम्नो रसिकशिरोमणिः, हरिदासरसिक इति नामवत् रसिकपदघटितत्वं न केनापि हेतुना निवार्यतेऽतः कवेरिदं काल्पनिकं नाम तत्र शब्दसादृश्यं तस्मिंस्तदनुजत्वनिश्चयेऽकिञ्चित्कर-मिति न वाच्यम् । अथवा वल्लभरसिक इत्यपि नाम भवेत्काल्पनिकम्, कवयो हि सहोदराः सदृशमेकं वा काल्पनिकं नाम विभ्राणा दरीदृश्यन्ते ।

अपि च—वल्लभरसिकश्लोकम्—

"गगनतलादवनितलं दैववशादेत्य सुखनिवासाय ।
पृच्छति मुहुः सशिरसः सदनमशिरसः परं प्रेम ॥"

उद्धृत्य, तं संक्षेपेण व्याख्याय,"यथा वा" पदमुपन्यस्य यथावेत्यव्ययादनन्तरं लिखितं पद्यं ग्रन्थकर्तुरेवेति सर्वत्र ज्ञेयमिति* निर्दिश्य

न पीतममृतं मया दिननिशाकृतोरन्तरे
वनागमविरोधिता बत कृता न संतापलेः।
न पुण्यसलिलाप्लुतं निजशिरः शिवायार्पितम्
सुधा भवितुमीहते मम मनो रतेरास्पदम् ॥

इत्यादि पद्यत्रयं यथावेति पदपुरस्सरमुल्लिखितम्। ग्रन्थकर्ता चात्र मूलकार एव। मूलेऽपि तेन स्वरचितं पद्यं यथावेत्यव्ययादनन्तरमेव निर्दिष्टम्। एषैव शैली ग्रन्थकारस्य यत्स्वरचितं पद्यं यथावेत्युपक्रम्य लिखति, टीकायामपि तथैव लिखितवान्। अन्यश्चेत् कश्चिदभविष्यट्टीकाकारस्तर्हि अमुकपुस्तकीयं पद्यमिदमित्यलेखिष्यत्। मूले नास्त्येव क्वचनापि टीकोद्धृता श्लोकावली। मुकुन्दकुन्दाष्टकं विद्यते ग्रन्थकृतोऽपरा कृतिः, परं तत्र तादृशश्लोकस्थितिरेव न सम्भाव्यते। अतः सिद्धं मूलकार एव टीकाकार इति। किञ्च—मूलकृता आत्मनाम गुरोर्नामेति स्मृतं दोषमुत्पश्यता यदात्मनो वास्तवं नाम प्रयत्नेन संगोपितम्, तत्समकालिकः किञ्चिदर्वाचीनो वा अन्यश्चेदभविष्यत् टीकाकारः, उक्तदोषनिर्मुक्तस्तन्निर्दिशेत्। न च निर्दिष्टवान् अपि तु मूलकारवत्प्रयत्नेन संगोपितवान्। अतोऽपि ज्ञायते मूलकार एव टीकाकार इति।

अन्यच्च-यत्राकीर्तिरेव कीर्तिः,इत्यादिग्रन्थपरिशिष्टांशः टीकायांमोदाहरणं पूर्तिमुपनीतः। अन्ते च तस्मिन्नगरे रतिकृताः सहस्रशो विपर्ययाः सन्ति, कियन्तो वर्णनीयाः। इदं दिग्दर्शनमात्रमित्यलं पल्लवितेन। तद्दिग्दर्शनमात्रलिखनन्तु रतिपर्यायस्य प्रेम्णो निसर्गकुटिलत्वकथनायैव इति प्रतिपाद्य ग्रन्थोऽवसितः। मूलेऽविद्यमानमपि वस्तु टीकायां

* अत्र 'यथावा' इत्यस्मात्पदादव्यवहितोत्तरं तत्पद्यं प्रदातुकामेन मया वाक्यमिदं टिप्पण्यामुद्धृतम्। वस्तुतस्तु तत् टीकास्थमेवेति विभाव्यं सुधीभिः।

गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः ॥

इति प्रार्थयमानो विरमतीति शम्—

काशी
श्रीवसन्तपञ्चमी १९८९

सतामाश्रवः
श्रीकृष्णपन्तः

विषय-सूची

॥ श्रीः ॥

श्रीकृष्णो जयतितराम् ।

श्रीरसिकोत्तंसरचितं

प्रेमपत्तनम्

श्रीमदद्भुतकृतप्रेमसर्वस्वोपेतम् ।

अनर्पितचरीं चिरात्करुणयावतीर्णः कलौ
समर्पयितुमुन्नतोज्ज्वलरसां स्वभक्तिश्रियम् ।
हरिः पुरटसुन्दरद्युतिकदम्बसंदीपितः
सदा हृदयकन्दरे स्फुरतु नः शचीनन्दनः ॥ १ ॥

प्रेमपत्तनाभिधममुं संदर्भं व्याख्यातुकामः कवि. श्रीहरिगुरुचरणस्मरणलक्षणं मङ्गलमाचरति—अनर्पितचरीमिति । श्रीशचीनन्दनो हरिः न. हृदयकन्दरे सदा स्फुरतु इति सम्बन्धः। शचीतिख्याता स्वप्रसूस्तस्या नन्दनस्तनयः; यद्वा, शचीं नन्दयतीति तथा, अस्यार्थद्वयस्य रूढियोगाभ्यामेव भेदः, अर्थस्तु स एव। स एव हरिः जनवृजिनवसनहेयद्भवस्वान्तादीनां हरणेन तथाप्रसिद्धः श्रीव्रजेन्द्रनन्दनः। अत्र तावदभेदरूपकाख्य एवालङ्कारः। तथा भिन्नप्रवृत्तिनिमित्तयोरेकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यमिति प्रसिद्धं लक्षणम्; पदद्वयस्य मिथ. सामानाधिकरण्यमपि तयोर्यथावदभेदमेवावबोधयति। नोऽस्माकमिति यदुक्तं तु सजातीयाशयमित्रपुत्रशिष्याद्यपेक्षया; यद्वा, नोऽस्माकं संसारिणां विषयाक्रान्तचित्तानां बहिर्मुखानां तत्प्रभावम-

इति



नारदादिगेयध्येयतयोन्नतीकृतः उज्ज्वलरसो ययेति बहुव्रीहिः । तेन श्रीकृष्णभक्तिसंबन्धहीनस्योज्ज्वलरसस्य उन्नतेतरता बोधिता । "शृङ्गारः शुचिरुज्ज्वलः" इत्यमरः । पुनः कथंभूतः—पुरटसुन्दरद्युतिकदम्बसंदीपितः पुरटं हेम ततोपि सुन्दरी या द्युतिस्तस्याः कदम्बः समूहस्तेन संदीपितः परमप्रकाशं नीतः, तेन साक्षात्कृष्णोपि गौरसुन्दरीकृत इति भावः । "निकुरम्बं कदम्बकम्" इत्यमरः । यद्वा, पुरटादपि सुन्दरी द्युतिः कान्तिर्यस्याः सा राधा तस्याः "पश्यति दिशि दिशि रहसि भवन्तम्" इति, तथा "दृश्यसे पुरतो गतागतमेव मे विदधासि" इति श्रीजयदेवमहानुभावोक्तिरित्यास्वप्नजागरयोरन्तर्वहिः समन्ततः प्रेमोन्मादपरवशतया मुहुः स्फुरन्त्यास्तस्याः कदम्बैरिव कदम्बैः समूहैर्हेतुभिः श्यामसुन्दरोपि संदीपितः संजातसमीचीनगौरदीप्तिः कृतः । घञन्तस्य संदीपपदस्य तारकादित्वादितच् । पुरटद्युतेस्तस्या बहिः समन्ततः सततस्फूर्त्या तथान्तर्निरन्तरानुध्यानेन पेश[1]स्कृत्कीटन्यायेन स्वयं श्रीव्रजेन्द्रनन्दनतया श्यामसुन्दरोपि गौरसुन्दरो बभूवेति भावः ॥ १ ॥

आविरस्तु हृदि तापहृत्सुहृद्वल्लवीवलयहृद्विभूषणम् ।
सक्तभक्तवरहंससत्कृतं मुक्तिशुक्तिपुटमौक्तिकं महः ॥२॥

अथ श्रीनन्दनमेव प्रार्थयते, आविरस्तु—इत्यादिना पद्येन । मुक्तिशुक्तिपुटमौक्तिकरूपं महस्तेजो हृदि आविरस्तु इति योजना । मुक्तिरेव शुक्तिपुटं तस्य मौक्तिकं तत्स्वरूपं यन्महः सच्चिदानन्दात्मकनिखिलावयववत्तया स्वप्रकाशम् अतसीपुष्पसंकाशं श्रीकृष्णाख्यं हृदि मन्मनसि आविरस्तु प्रादुर्भावं प्राप्नोतु । अत्राविर्भावस्य तत्कर्तृ-

१—पेशो रूपान्तरं स्वगृहीतकीटस्य करोतीति पेशस्कृत् कीटभेदः ।
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः ।
याति तत्साम्यतां राजन् पूर्वरूपमसंत्यजन्" ॥ [भा० १० ४० ९]

विदुषामन्नार्थे बहुत्वमेवंविधानामविरलत्वं शंसति। सदा सातत्येन हृदयकन्दरे हृदयमेव कन्दरं कन्दरा तत्र स्फुरतु प्रकाशतामिति प्रार्थनायां लोट्। अत्र कन्दरपदं हरिपदस्याभिधामूलव्यञ्जनया सिंहत्वं बोधयति, तस्य भगवदसांमुख्यदुर्वारमत्तवारणविदारणाऽसाधारणकारणत्वात्। तथा आत्मनः पर्वतत्वमारोपयति कठिनत्वं जडत्वं किंचिदचलत्वं च। तथा द्वितीयार्थं वाक्यमेव सर्वमिदं स्वस्य स्वदैन्यलालसत्वं च व्यञ्जयति। कथंभूतः—अनर्पितचरीं पूर्वमनर्पिताम्[1] "भूतपूर्वे चरट्" इति चरट्। स्वभक्तिश्रियं स्वस्य आत्मनो भक्तिरानुकूल्येनानुशीलनलक्षणा तस्याः श्रियं सम्पदं समृद्धिमिति यावद्, भक्तिरूपां श्रियमिति वा समर्पयितुं यथावद्वितरणाय चिराद् ब्रह्माहोरात्रसंज्ञकचतुर्युगसहस्रद्वितयलक्षणसमयावसाने कलौ कलेः प्रथमभागे करुणया निरुपाधिककृपया अवतीर्णः, अट्टादवतीर्ण इतिवधित्यसिद्ध एव प्राकट्यं प्राप्त इत्यर्थः। अत्र चिरादवतीर्ण इति पदद्वयेनेदानीमिव पूर्वकल्पे श्रीकृष्णावतारानन्तरमवतीर्यार्पितामपि कालबाहुल्यात्प्रच्छन्नप्रायां पुनरवतरणात्पूर्वं केनाप्यनर्पितां तामेवार्पयितुं पुनरवतीर्ण इति सिद्धान्तविशेषो बोधितः। स च श्रीशचीनन्दनस्यैव प्रेमभक्तिसम्पद्वितरणसामर्थ्यं व्यञ्जयति। अत्र संप्रदानानुक्तिः पात्रापात्रविवेकं विनैव यस्य कस्यापि संप्रदानत्वं व्यञ्जयति। तदुक्तं प्रबोधानन्दसरस्वतीपादैः श्रीचैतन्यचन्द्रामृते—

"पात्रापात्रविचारणं न कुरुते न स्वं परं वीक्षते
देयाऽदेयविमर्शको नहि न वा कालप्रतीक्षः प्रभुः।
सद्यो यः श्रवणेक्षणप्रणमनध्यानादिना दुर्लभं
दत्ते भक्तिरसं स एव भगवान् गौरः परं मे गतिः"॥ इति।

कथंभूतां स्वभक्तिश्रियम्—उन्नतोज्ज्वलरसामुन्नतोऽधिक उज्ज्वलरसः शृङ्गाररसो यस्याम्। यद्वा, पूर्वं सद्भिरुज्झितोऽपि उन्नतः शुक-

१ क्वचिद् अभूतपूर्वामिति पाठः।

नारदादिगेयध्येयतयोन्नतीकृतः उज्ज्वलरसो ययेति बहुव्रीहिः। तेन श्रीकृष्णभक्तिसंबन्धहीनस्योज्ज्वलरसस्य उन्नतेतरता बोधिता। "शृङ्गारः शुचिरुज्ज्वलः" इत्यमरः। पुनः कथंभूतः—पुरटसुन्दरद्युतिकदम्बसंदीपितः पुरटं हेम ततोपि सुन्दरी या द्युतिस्तस्याः कदम्बः समूहस्तेन संदीपितः परमप्रकाशं नीतः, तेन साक्षात्कृष्णोपि गौरसुन्दरीकृत इति भावः। "निकुरम्बं कदम्बकम्" इत्यमरः। यद्वा, पुरटादपि सुन्दरी द्युतिः कान्तिर्यस्याः सा राधा तस्याः "पश्यति दिशि दिशि रहसि भवन्तम्" इति, तथा "दृश्यसे पुरतो गतागतमेव मे विदधासि" इति श्रीजयदेवमहानुभावोक्तिरित्यास्वप्नजागरयोरन्तर्बहिः समन्ततः प्रेमोन्मादपरवशतया मुहुः स्फुरन्त्यास्तस्याः कदम्बैरिव कदम्बैः समूहैर्हेतुभिः श्यामसुन्दरोपि संदीपितः संजातसमीचीनगौरदीप्तिः कृतः। यद्वान्तस्य संदीपपदस्य तारकादित्वादितच्। पुरटद्युतेस्तस्या बहिः समन्ततः सततस्फूर्त्या तथान्तर्निरन्तरानुध्यानेन पेशस्कृत्कीटन्यायेन स्वयं श्रीव्रजेन्द्रनन्दनतया श्यामसुन्दरोपि गौरसुन्दरो बभूवेति भावः ॥ १ ॥

आविरस्तु हृदि तापहृत्सुहृद्वल्लवीवलयहृद्विभूषणम्।
सक्तभक्तवरहंससत्कृतं मुक्तिशुक्तिपुटमौक्तिकं महः ॥२॥

अथ श्रीनन्दनमेव प्रार्थयते, आविरस्तु—इत्यादिना पद्येन। मुक्तिशुक्तिपुटमौक्तिकरूपं महस्तेजो हृदि आविरस्तु इति योजना। मुक्तिरेव शुक्तिपुटं तस्य मौक्तिकं तत्स्वरूपं यन्महः सच्चिदानन्दात्मकनिखिलावयववत्तया स्वप्रकाशम् अतसीपुष्पसंकाशं श्रीकृष्णाख्यं हृदि मन्मनसि आविरस्तु प्रादुर्भावं प्राप्नोतु। अत्राविर्भावस्य तत्कर्तृ-

१—पेशो रूपान्तरं स्वगृहीतकीटस्य करोतीति पेशस्कृत् कीटभेदः।
"कीटः पेशस्कृतं ध्यायन् कुड्यां तेन प्रवेशितः।
याति तत्सात्म्यतां राजन् पूर्वरूपमसंत्यजन्" ॥ [भा० ११ अ० ९]

फत्वं वदन् कविः स्वस्य सर्वसाधनलेशहीनत्वं व्यञ्जयन् तस्य करुणा-वरुणालयतां विशदयति[1]। अत्रोपमानोपमेययोर्मौक्तिकमहसोरनु-भयोक्तिमयमभेदरूपकं[2] तथा तयोर्मिथः सामानाधिकरण्यं चाभेदमेवा-वबोधयति। यथा प्राण्यङ्गत्वादस्थिविशेषस्यापि शुक्तिपुटस्य सज्ज-सभाजनसाफल्यशोभासौभाग्यादयो गुणा मौक्तिकेनैव संपद्यन्ते तथा-ऽऽत्यन्तिकप्रलयरूपाया मुक्तेरपि ते ते गुणाः श्रीकृष्णस्वरूपसम्बन्धे-नैवेत्यभिप्रायः। पुनश्च यथा मौक्तिकहीनाया शुक्तेस्तत्तद्गुणहीनत्वं तथा श्रीकृष्णस्वरूपहीनाया मुक्तेरपीति पूर्वोक्तार्थदृढीकरणाय पुन-र्व्यतिरेकमुखेन व्याख्यातम्। मुक्तेरात्यन्तिकप्रलयरूपत्वं व्यक्तं कथयति *श्रीमद्भागवतस्य द्वादशस्कन्धपद्यं यथा*—

"नित्यो नैमित्तिकश्चैव तथा प्राकृतिको लयः।
आत्यन्तिकश्च कथितः कालस्य गतिरीदृशी" ॥ इति।

पुनश्च बुद्धीन्द्रियार्थरूपेणेत्यादिभिरात्मानात्मविवेकं प्रदर्श्याह शुकः—

"यदैवमेतेन विवेकहेतिना मायामयाहङ्करणात्मबन्धनम्।
छित्वाऽच्युतात्मानुभवोऽवतिष्ठते तमाहुरात्यन्तिकमङ्ग संप्लवम्" ॥इति

अथ तयोः साधारणधर्मानाह विशेषणत्रयेण। कथंभूतं तत्— तापहृद् जलजमणितया घर्मनिदाघादितापं हरतीति *तथा*; तन्महोपि आध्यात्मिकादितापत्रितयहृदित्यालङ्कारिकैरङ्गीकृतेन बिम्बप्रतिबिम्ब-भावेन विशेषणस्यासाधारणधर्मबोधकत्वम्। पुनः कीदृशम्—सुहृद्व-ल्लवीवलयहृद्विभूषणं सुहृदः श्रीकृष्णप्रेमवतीत्वेन शुकवामदेवहृदयादपि सुष्ठु समीचीनं तैरपि प्रशंसनीयं हृद् हृदयं यासां ताः; यद्वा, श्री-नन्दनन्दने निभृतानुरागामृतसंभृततया सतीसमूहहृदयेभ्योपि सुष्ठु

1 व्यञ्जयति—इति घ पाठः।

2 रूपकं तद्विभाऽधिक्यन्यूनत्वानुभयोक्तिभिरिति रूपकलक्षणम्। शम्भु-र्विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम्। अयमस्ति विना शम्भुस्तार्तीयीकं विलोचनम्। अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात्। इति क्रमेण त्रिविधरूपकस्योदाहरणानि।

सुन्दरं ताभिरपि स्पृहणीयं हृद् यासां ताः; यद्वा, सुहृदो मित्राणि ताश्च ता वल्लव्यो गोपतरुण्यस्तासां वलयं मण्डलं समूह इति यावत्, तस्य हृद् हृदयं तस्य विभूषणं हारादिवत् कण्ठलग्नतया बहुशोभाप्रदम्। मौक्तिकमपि तरुणीनां हारादिरूपतया विभूषणं भवत्येव। यद्वा "तरुणीस्तन एव दीप्यते मणिहारावलिरामणीयकम्" इत्युक्त्यनुसारेण वल्लवीवलयहृद् विभूषणं यस्येति रसविशेषपोषको बहुव्रीहिरुभयत्रापि। यद्वा, मौक्तिकपक्षे तत्पुरुष एव, महसः पक्षे बहुव्रीहिः। अनेनार्थेनोपमानोपमेययोर्विशेषबोधकेन व्यतिरेकालङ्कारो व्यञ्जितः। तल्लक्षणं च—"व्यतिरेको विशेषश्चेदुपमानोपमेययोः" इति। पुनः कथंभूतं सकभकवरहंससत्कृत सका आसक्तिमन्तोऽत एव भक्तवरा भक्तोत्तमास्त एव हरिवदननयनकमलावलोकमुदितमनस्तया सारासारविवेकादिसाधारणधर्मैर्हंसास्तैः सत्कृतं निजजीवातुकत्वेन सभाजितम्। हंसा अपि स्वजीवनप्रदत्वेन मौक्तिकं सभाजयन्त्येव। पक्षेऽस्मिन् ग्रन्थारम्भे मङ्गलार्थं तथैवौचित्यानुरोधात् तरुणं यथाकथञ्चिदनुनीयान्तेनीतेशभावस्य कवेर्महःशब्देनोक्तिः, तरुणावसाने पुनः श्यामसुन्दरस्यापि तस्य महसः सितेन शुक्तिपुटमौक्तिकेन। अनुभयोक्तिमयमभेदरूपकं तु तस्य सद्वृत्तत्वेपि सुपात्रसंगमेपि चञ्चलत्वं तथाऽऽविद्धत्वं[१] शुक्लत्वेन नीरागत्वं च व्यञ्जयद् ग्रन्थकर्त्तुस्तद्वद्वल्लभत्वस्फूर्त्तिस्वभावसुलभ मनागमर्षलेशपेशलभावविशिष्टान्तःकरणत्वं व्यञ्जयति। कवेर्भावविशेषजिज्ञासा चेत्तदनुभावरूपं तत्कृतं मुकुन्दकुन्दाष्टकं द्रष्टव्यम् ॥२॥

विधुतविषयलेशानप्रवृत्तिप्रवेशा-
नपिविषयविशेषासक्तितत्त्वोपदेशान्।
भवविपदवसादान् ह्यहो ग्रुसमुस-
प्रमदमदविपदाँस्तीर्थपादान्नमामि ॥ ३ ॥

१ भावितान्तःकरणत्वमित्यपि पाठः।

एवं पद्यद्वयेन भगवत्स्फूर्तिं संप्रार्थ्य गुरून् प्रणमति—विधुतेति। अहं तीर्थपादान् श्रीगुरून् तच्चरणान् वा नमामि। प्रथमार्थे पादपदोपादानं पुनरर्थद्वयेपि बहुत्वं परमादरेणैव। साक्षात्तन्नामानुक्तिस्तु "आत्मनाम गुरोर्नाम नामातिकृपणस्य च। श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः" ॥ इति स्मृतिवाक्यानुरोधात्। कथंभूतान्—विधुतविषयलेशान् विधुतो निष्कृतो विषयाणां शब्दस्पर्शादीनां लेशोपि यैस्तान्। हेतुगर्भं विशेषणान्तरम्—न प्रवृत्तिमार्गे प्रवेशो येषां तान् निवृत्तिनिरतत्वादिति भावः। तथाभूतानपि अहो इत्याश्चर्ये विषयविशेषासक्तितत्त्वोपदेशान् जीवस्य दासत्वान्नैसर्गिकप्रेम्णो विषयविशेषे श्रीकृष्णाख्ये या आसक्तिः सैव तत्त्वं परमपुरुषार्थतया परमसुखरूपं तस्यैवोपदेशः शिक्षणं प्रपन्नेषु येषां तान्। पुनः कथंभूतान्—भवविपदवसादान् भवस्य संसृतेर्या विपदः अहन्ताममतामूला हर्षविषादप्रभृतयस्तासामवसादोऽवसादनं येभ्यस्तथाभूतानपि अहो चित्रं गुप्तं निभृतं यथा स्यात्तथा हृदि उप्ता भूमौ बीजवत् शतगुणवृद्ध्यर्थं निक्षिप्ताः प्रमदमदविषादा यैस्तान्। प्रमदो हर्षः, मदविषादौ स्पष्टौ; उपलक्षणं चैतत्सर्वसंचारिणां तेषां प्रणयसागरतरङ्गत्वात्प्रणये सति स्वयमेव ते संचारिणः सर्वेपि संभवन्ति शिक्षणं विनैवेति गुप्तमुप्तत्वं व्यक्तमेवेति भावः। पद्येऽस्मिन् विरोधाभासो नामालङ्कारः तल्लक्षणं यथा—"आभासत्वे विरोधस्य विरोधाभास इष्यते" इति॥३॥

कृष्णं कृष्णपरिष्वङ्गसतृष्णं गौरसुन्दरं।
धन्यं कीर्तिसुतानन्यमन्यं चैतन्यमाश्रये ॥ ४ ॥

एवं तावत्सन्दर्भव्याख्यानारम्भे पद्यद्वयेन चैतन्यकृष्णचन्द्रयोर्मनसि स्फूर्त्तिं संप्रार्थ्य पुनरेकेन पद्येन गुरुपादान्नमस्कृत्य प्रारीप्सितस्य प्रेमपत्तनाभिधानस्यात्यन्ताऽपूर्वाद्भुतसन्दर्भस्य निष्प्रत्यूहपरिसमाप्ति-

१ स्मयकृताः—इत्यपि पाठः।

कारणं शिष्टपरम्पराप्राप्तं हरिगुरुचरणाश्रयणलक्षणं मङ्गलमाचरति रसिकोत्तंसो नाम कविप्रवरः। तन्नामप्राप्तिनिदानमग्रतो व्यक्तं भावि। कृष्णमिति। चैतन्यं तन्नाम्ना ख्यातं कलियुगपावनावतारं महाप्रभुं कृष्णं श्रीनन्दनन्दनमाश्रये। अत्र पदद्वयस्य मिथो रसं फलमितिवत् सामानाधिकरण्येनाभेदात् कृष्णचैतन्याभिधानं महाप्रभुमित्यर्थः। अनेन सदानन्दतया प्रसिद्धार्थस्य कृष्णपदस्य चैतन्यपदसामानाधिकरण्येन परमपूर्णतमत्वमस्य व्यञ्जितम्। तदुक्तं कृष्णं प्रति प्रबोधानन्दसरस्वतीपादैः श्रीचैतन्यचन्द्रामृते—

"क सा निरङ्कुशकृपा क तद्वैभवमद्भुतम्।
क सा वत्सलता शौरे यादृग्गौरे तवात्मनि"॥ इति।

पुनस्तेनैव कृष्णपदेन अस्य मरकतमणिमञ्जुलाङ्गत्वं तेन चैतन्यपदस्य निर्विशेषपरत्वं व्यावृत्तम्। पुनः कीदृशम्—गौरसुन्दरं [गौरश्चासौ सुन्दरस्तमिति] कर्मधारयः। सुवर्णवर्णाङ्गत्वेनातिसुन्दरमित्यर्थः। ननु मरकतमणिमञ्जुलाङ्गत्वं सुवर्णवर्णाङ्गत्वं च युगपदेकस्यातिविरुद्धमित्यपेक्षायां पुनर्विशिनष्टि—कीर्तिसुतानन्यमन्यमिति। कीर्त्तिसुता श्रीगान्धर्विका तया सह आत्मानमनन्यं भेदशून्यं मन्यते इति तथा। सुवर्णवर्णाङ्ग्यास्तस्याः निरन्तरानुध्यानेन सुवर्णवर्णाङ्गत्वं तेनातिसुन्दरत्वं च न विरुद्धमिति भावः। तदुक्तं श्रीभागवते एकादशे—

"कृष्णवर्णं त्विषाऽकृष्णं साङ्गोपाङ्गास्त्रपार्षदम्।
यज्ञैः संकीर्त्तनप्रायैर्यजन्ति हि सुमेधसः"॥ इति।

तथा

"अन्तःकृष्णं वहिर्गौरं दर्शिताङ्गादिवैभवम्।
कलौ संकीर्त्तनाद्यैः स्मः कृष्णचैतन्यमाश्रिताः"॥ इति च।

तथा तद्भावाप्तिरेव तत्प्राकट्यस्य मुख्यं प्रयोजनमिति अपरिकलितपूर्वः कथमत्कारकारीत्यादौ व्यक्तमेव। तथैवोक्तं श्रीकृष्णदासकविराजमहाशयैः श्रीचैतन्यचरितामृते—

"राधा कृष्णप्रणयविकृतिर्ह्लादिनीशक्तिरस्मा-
देकात्मानावपि भुवि परं देहभेदं गतौ तौ।
चैतन्याख्यं प्रकटमधुना तद्‌द्वयं चैक्यमाप्तं
[1]तं राधाद्युतितितियुतं नौमि कृष्णस्वरूपम्" ॥इति।

तथैवोक्तं श्रीप्रबोधानन्दपादैरपि श्रीचैतन्यचन्द्रामृते—

"सिंहस्कन्धं मधुरमधुरस्मेरफुल्लाननान्तं
दुर्विज्ञेयोज्ज्वलरसमयाश्चर्यनानाविकारं ।
बिभ्रत्कान्ति विकचकनकाम्भोजशोभाभिरामा-
मेकीभूतं वपुरवतु वो राधया माधवस्य" ॥ इति ।

अत एव तस्य कृष्णस्यैव परिष्वङ्गायालिङ्गनाय सतृष्णं स्वातिवर्षासमयचातकवदत्यन्तार्तिमन्तमत एव धन्यं निखिलावतारप्रकाशान्तरस्वभक्तवृन्देभ्यः श्रेष्ठं क्रमेणैश्वर्य्यांशव्यक्त्या केवलप्रेमासमवेतत्वेनाशक्तत्वादनौचित्याच्चान्यत्र तादृशभावाभावात् ॥ ४ ॥

अस्यानल्पं जल्पतो दासभावाद्
गूढं लीढोच्छिष्टबिन्दून्मदस्य ।
अन्तःपीतप्रेममाध्वीकघूर्णा-
वन्तः सन्तः साहसं मा हसन्तु ॥ ५ ॥

इदानीं निजविनयाविर्भावार्थं सज्जनसार्थमर्थयते—अस्येति । अस्य मल्लक्षणस्य जनस्य अनल्पं बहु यथा भवति तथा जल्पतः विप्रलपतः सतो रसविशेषभावनाचतुराः साहसं मा हसन्तु । कथंभूताः सन्तः—अन्तरिति, अन्तः अन्तःकरणे एव पीतस्य प्रेममाध्वीकस्य या घूर्णा तद्वन्तः; यद्वा, अन्तरेव पीता निगीर्णा प्रेममाध्वीकस्य या घूर्णा तद्वन्तः। कथंभूतस्यास्य मम—दासभावाद् दासस्यभावाद् गूढं निभृतं

---

१ "राधाभावद्युतिशबलितम्" प्रचलितपुस्तकेऽस्त्ययं पाठः ।

लीढमास्वादितमुच्छिष्टं सतां पानपात्रलग्नं यद्बिन्दुमात्रम् अर्थान्माध्वीकस्यैव तेनैवोन्मदस्य मत्तस्य । प्रभोरुच्छिष्टपात्रलग्नं वस्तु प्रभुणा दत्तमपि निभृतं भुज्यत एवेति दासस्वभावः ॥ ५ ॥

मतिरतियुवतिपतिर्यत्पालयिता मधुरमेचको राजा ।
गगने विलसति नगरं नैकशिरोमन्दिरं नाम ॥ ६ ॥

अथ कविः परमप्रेमपीयूषरससारसर्वस्वमाधुरीमनास्वादितचरीं सजातीयाशयानास्वादयिष्यन् विधिकिङ्करार्कचातुर्मास्यमनन्यरसिकम्मन्यानामवनामितास्यं रसिकसमूहोपास्यं रसललितलास्यगर्भं प्रेमपत्तनाभिधं परमाद्भुतं सन्दर्भमारभते—मतीत्यादिना पद्येन ।

गगने नगरं विलसतीति सम्बन्धः । गगने सर्वोपरि पातालादिवैकुण्ठावधि निखिललोकनिवासिभिः शेषकायाधववल्ल्युद्धवभुवनारदविधातृश्रीप्रभृतिभिः सर्वरसविशेषभावनाभिज्ञैः सर्वोपरिविराजमानतया मनसि निश्चितमित्यर्थः । यथोक्तं श्रीब्रह्मणा तृतीये देवान्प्रति—"यच्च व्रजन्त्यनिमिषामृषभानुवृत्त्या दूरेयमा ह्युपरि नः स्पृहणीयशीलाः" इति । अत्र वैकुण्ठविशेषणं न उपरि वर्त्तमानमिति तैर्व्याख्यातत्वात् तस्याप्यलभ्यत्वमायातम् । किं पुनस्तन्नगरस्येति कैमुत्यं तस्य तदंशित्वात् । यद्वा, गगने सर्वोपरितया दूरस्थत्वादत्यन्तोन्नतिमतामपि हस्ताऽग्राह्यमित्यर्थद्वयेनास्य दुर्लभत्वमुक्तम् । यद्वा, गगने रसज्ञानां हृदयाकाशे तत्रैव सदा स्थितं न तु तैर्बहिः प्रकटितमित्यर्थः । एतेन तस्य दुरूहत्वादनधिकारित्वाद्रहस्यत्वाच्च सुगोप्यत्वमुक्तम् ।

नगरं विलसति विराजत इति वर्त्तमानप्रयोगेण तस्य नित्यत्वमप्युक्तम् । एतेनैव वस्तुनिर्देशात्मकं मङ्गलान्तरमपि सूचितम् । तन्नगरं विशिनष्टि—मतीति । नामेति प्रसिद्धौ मधुरमेचकनाम्ना प्रसिद्ध इत्यर्थः । [यत्पालयिता] यत्पालनकृत् । मधुरः शृंगाररसः स एव मेचकः श्यामः;

२

यद्वा, मधुरः श्रृङ्गाररसमयः अत एव मेचकः श्यामसुन्दरः श्रीकृष्ण इति शब्दमूलव्यञ्जनया मुख्यार्थान्तरत्वमुक्तम्; "श्रृङ्गारः सखि मूर्त्तिमानिव" इति श्रीजयदेवोक्तेः। तेन श्रृङ्गाररसात्मको व्रजनवयुवराज एव तन्नगरपालकः, अत एव राजा—सर्वावतारेभ्यः स्वप्रकाशान्तरेभ्यश्च शुचिरसमयत्वेन राजते—इति। तदुक्तं श्रीमुनीन्द्रेण दशमे—"तत्रातिशुशुभे ताभिर्भगवान् देवकीसुतः" इति। तथा "श्रृङ्गाररससारसर्वस्वम्" [1] इति श्रीविल्वमङ्गलोक्तेश्च। तथोक्तं कृष्णराजकविमहाशयैश्चैतन्यचरितामृते—

"राधासङ्गे यदा भाति तदा मदनमोहनः।
अन्यथा विश्वमोहोऽपि स्वयं मदनमोहितः" इति।

"रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थिति"रित्युक्तेश्च। पुनः कीदृशः—मतिरतियुवतिपतिः मतिरतिसंज्ञके युवती तयोः पतिः। अत्र मतिरतिपदयोः क्रमेण पूर्वोत्तरविन्यासात् मतेर्ज्येष्ठात्वं रतेः कनिष्ठात्वं व्यञ्जितम्। तत्रापि द्वन्द्वान्ते श्रूयमाणस्य युवतिपदस्य पूर्वपदद्वयसम्बन्धसाम्येऽपि रतियुवतिपदयोः प्रत्यत्तात्यन्तसंयोगाद्रतेर्नवयुवतित्वं ध्वनितम्। तेन च वक्ष्यमाणं तस्यां नृपस्यात्यन्तासक्तिमत्वं युक्तमेवेत्यनुध्वनिः। अत्र श्रृङ्गारपक्षे मतिर्नाम रतेः सपत्नी श्रीकृष्णपक्षे निजैश्वर्यानुसंधानम्। रतिस्तु रसपक्षे तत्स्थायिभावाख्या, श्रीकृष्णपक्षे महाभावरूपा श्रीराधैव "महाभावस्वरूपेयम्" इत्युक्तेः। रतेर्महाभावाङ्कुररूपत्वात्कार्य्यकारणयोरभेदोक्त्या रतिः श्रीराधैवेति व्याख्यातम्। तदासक्त्या मधुरमेचकेन निजैश्वर्य्यं विस्मृतमिति समस्तग्रन्थविवक्षितम्। तन्नगरस्यान्वर्थं नामाह—नामेति प्रसिद्धौ। नैकशिरोमन्दिरं प्रेमपत्तनापरपर्य्यायं तथाप्रसिद्धमित्यर्थः। तदन्वर्थता च नैकशिरसां न एकं शिरो येषां ते बहुशिरसामित्यर्थः; पुनस्तेनैव समासेन अशिरसामिति मुख्योर्थः। कर्ण-

---

१ रससर्वस्वम्—इत्यपि पाठः।

कटुताभयात्पूर्वं तथैव व्याख्येयम्। तदनन्तरं मुख्योर्थः। तेषामेव मन्दिरं सुखनिवासस्थानम्; सहस्रशिरस एव तत्र वसन्तीत्यर्थः; यत्राऽशिरस एव सहस्रशिरस इति वक्ष्यमाणत्वात्। सहस्रशिरसामेव तत्र प्रवेशनिवासाधिकारो न तु अन्येषामिति भावः। अत्र सशिरस्त्वमशिरस्त्वं च तदाशावत्त्वमतदाशावत्त्वमेव विवक्षितम्; तच्च बहुशो व्यक्तमेव। तदाह वल्लभरसिको मदनुजः—

"गगनतलादवनितलं दैववशादेत्य सुखनिवासाय।
पृच्छति मुहुः सशिरसः सदनमशिरसः परं प्रेम॥

पूर्वमुक्तमशिरसामेव प्रेमनगरे प्रवेशः। उदाहरणे प्रेम सशिरसः सदनं पृच्छतीति व्यत्ययो नानुसंधेयः, अशिरसामेव प्रेमसम्बन्धो नान्येषामेतन्मात्रस्यैव विवक्षितत्वात्। यथा वा[1]—

"न पीतममृतं मया दिननिशाकृतोरन्तरे
घनागमविरोधिता वत कृता न सीतापतेः।
न पुण्यसलिलाप्लुतं निजशिरः शिवायार्पितं
मुधा भवितुमीहते मम मनो रतेराऽस्पदम्"॥

यथा वा—

"दूरे लग्नं प्रेमफलं सर्वथैव यदीहसे।
निधेहि रसिक स्वीयं शिरः स्वपदयोरधः"॥

यथा वा—

"मा प्रेमपूरं विश वा शिरः स्वं दूरं निधायैव पदं निधेहि।
व्यधायि धात्रैव गतोपरोधः प्रेमोत्तमाङ्गोत्तमयोर्विरोधः॥इत्यादि।

अत्र पुरञ्जनोपाख्यानादिवत् परोक्षत्वेन कथनं तु नववधूनामवगुण्ठनमिव निजोक्तीनां दर्शनोत्कलिकया चमत्कारविशेषार्थम्, तथा निजोपास्यस्य वस्तुनः संगोपनार्थम्, निजसंदर्भस्य भगवत्प्रियत्वापादनार्थं च। तथोक्तम्—

१ यथेत्यव्ययादनन्तरं लिखितं पद्यं ग्रन्थकर्तुरेवेति सर्वत्र ज्ञेयम्।

"निजेष्टधनमन्त्रावमानायैव प्रकाशयेत्" । इति

पुनस्तदुक्तं श्रीमद्भागवते—

"परोक्षवादा ऋषयः परोक्षं च मम प्रियम्" इति।

"यत्परोक्षप्रियो देवो भगवान्भूतभावनः" इति च ।

तन्नगरं च लीलापरिकरात्मकनित्यसिद्धासक्तजननिवासस्थानं श्रीवृन्दावनान्तर्मण्डलमेव ।

यथोक्तं पञ्चरात्रे—

"विष्वद्रीच्येव वाग्वेदा अद्रयः कनकाद्रयः ।
जलं ब्रह्मद्रवः साक्षात् द्रुमाः सर्वे सुरद्रुमाः ॥
जनाः परिजना यत्र धनेवः कामधेनवः ।
श्रीमद्वृन्दावनस्यान्तःप्रवेशो रतिराज्यभूः ॥

यत्रावतारान्तरस्य प्रकाशान्तरस्य च परमप्रेमवश्यत्वं तत्र तत्कालावच्छेदेन मधुरमेचकस्यैवाविर्भावः । यत्र च तस्य निवासस्तत्प्रदेशस्य व्यापिवैकुण्ठवत्तन्नगरत्वमित्यवधेयम् ॥ ६ ॥

यत्र वशीकृतदयिता पत्युर्दयिताऽतिगर्विता ।
सततं रतिरनुकूला महिषी मतिं कदर्थयामास ॥ ७ ॥

यत्र वशीकृतदयितेति । वशीकृतदयिता तथा पत्युर्दयितेति गर्वे हेतुद्वयम्, अनयोस्तु परस्परं हेतुहेतुमद्भावः । महिषी पट्टराज्ञी । अनुकूला अर्थात् पत्युरेव । कदर्थयामासेति पूर्ववृत्तान्तकथने भूतप्रयोगः । यत्रेति सप्तम्यन्तानां पदानां तन्नगरं विलसतीति पूर्वेणैव सम्बन्धः ॥ ७ ॥

पितृभवनमाधिशमनं विज्ञा विज्ञाय पत्तनं पत्युः ।
रत्यावमानिता स्त्रीजितेन तेनापि तत्याज ॥ ८ ॥

पितृभवनमिति । आधिर्मनःपीडा तस्याः शमनमात्रं न तु सर्वथा

तस्याशनं तत्र रतेरुद्भवस्य साक्षाद्दर्शनाभावात्, रत्या तथा तेन पत्या चावमानिता क्रिययैव न तु वचनादिना । तत्र पत्युर्हेतुगर्भविशेषणं स्त्रीजितेनेति । पत्युः पत्तनं नगरं तत्याज, यतो विज्ञा । अत्रापि तत्याजेति क्रियापदं पूर्ववद्भूतनिर्देशकं बोध्यमिति ॥ ८ ॥

प्रेक्षावतोऽखिलजनानिव शिक्षयन्ती
लोकोत्तरं रतिपतेरुदयं विलोक्य ।
तातालयं पतिसुतादि विहाय सद्यो
याता मतिस्तदिदमेव मतेर्मतित्वम् ॥ ९ ॥

तस्या विज्ञात्वमेव विशदयति—प्रेक्षावत इति । प्रेक्षावतो बुद्धिमतः शिक्षयन्तीवेत्युत्प्रेक्षा । भाविनिजानादरं पूर्वमेव लक्षणैरनुमीय ततः पूर्वमेवान्यत्र गमनमेव मतेर्मतित्वम्; अनादरानन्तरं ततोऽन्यत्रगमनं कुमतित्वम्; तदनन्तरमपि गृहधनादिकामनया तत्रैव निवासस्तु जड़त्वमेवेत्यर्थः । तदुक्तं श्रीबलदेवेन शिशुपालवधे—

"स्वस्थादेवापमानेपि देहिनस्तद्वरं रजः ।
पादाहतं यदुत्थाय मूर्धानमधिरोहति" ॥ इति ।
तस्मान्मतिरत्योर्नैकत्र संवास इति सिद्धान्तः ।

तदुक्तम्—

सदा समासादितदक्षिणीका निजोदयध्वस्तसमस्तवृद्धिः ।
मनागपि प्रेमलवोपलब्धि विवत्यगस्त्योऽब्धिमिवोपलब्धिम् ॥
"प्रेक्षोपलब्धिश्चित्संविद्" इत्यमरः ।

यथा च—

"रतिमत्त्वमेव विरलं मतिमत्त्वं जगति दृश्यते सरलम् ।
अनयोरहह विरोधाद् रतिमतिमत्त्वं न कुत्रापि" ॥

तत्रोदाहरणं यथा—

"श्रुतिमुनिमतसत्यास्तत्त्ववाचो ममापि
प्रियगिरमवमत्या हा हसन्त्या व्यधायि।
व्रजपतिवसुमत्याद्यापि रत्यानुमत्या
नवयुवतिसमित्या हन्त मत्या विरोधः" ॥

वाक्यमिदं व्रजसुन्दरीणां प्रेमोक्तीः श्रुत्वा विस्मितस्योद्धवस्य।

तथा—

"विद्रावयति ह निद्रां धुनोति धर्मं त्रपामपाकुरुते।
धृतिसहिता मतिमादौ लयं नयन्ती रतिर्मनो विशति" ॥ इति ॥६॥

तस्याऽधनस्य जनकस्यागमसंज्ञस्य शासनादनिशम्।
अथ पितृशिक्षापटुभिर्वटुभिर्भिक्षां चिरादटति ॥१०॥

रतिविरोधिन्या मतेर्दुरवस्थां विशदयति—तस्येति। आगमसंज्ञस्य अर्थात् शास्त्रस्य। शास्त्रद्वारेण परिडतमुखादेव श्रीकृष्णेनापि निजैश्वर्यं ज्ञातये [प्रोक्तम्,] न स्वतः, [तस्य] सदा धीरललितत्वेन कुञ्जकेलिरतत्वात्। तदुक्तं च—

"अभूत्कंसरिपोर्नेत्रं शास्त्रमेवार्थदृष्टये।
नेत्राम्बुजं तु युवतीवृन्दोन्मादाय केवलम्" ॥ इति।

शास्त्रादेव मतिरुत्पद्यते इति प्रसिद्धेः शास्त्रस्य मतिजनकत्वम्। कथंभूतस्य—अधनस्य दरिद्रस्य, शास्त्रस्य अपत्यधनादिषु वैराग्यगर्भितत्वात्; तस्य शासनादाज्ञया, अथ तदनन्तरमेव तस्यैव पितुः शास्त्रस्य शिक्षा उपदेशस्तत्र पटुभिर्वटुभिः ब्रह्मचारिभिः, अर्थात् शास्त्राज्ञानुवर्त्तिभिः परिडतैः सह चिराद्बहुकालतः भिक्षामटति। तेन रतिविरहितायाः मतेर्भिक्षोचितैवेति ध्वनिः। यत्र निरादरस्तान् बन्धूनपि विहाय भिक्षाटनमेव वरं न तु। तन्मुखावलोकनमिति च रतिविरोधिन्या एव मतेर्मतित्वमिति व्यञ्जितम्। यदि तस्यास्तन्नगरे

कुत्रापि रतिलेशोप्यभविष्यत् तदा खिन्नाया अपि तस्या अन्यत्र गमनं नाभविष्यदेव। तदुक्तम्—

जेण[1] विणा ण जिविज्जइ अणुमिज्जइ सो किआवराहोवि।
कअचि[2] णअरआहे[3] भण कस्स ण वल्लहो अग्गि इति ॥१०॥

**सुमतिसुताऽतिविनीता शान्तस्वान्ताभिधेन परिणीता।
मातुर्वियोगवीता शान्तिः पत्या निजाश्रमं नीता ॥११॥**

सुमतीति। शान्तस्वान्ताभिधेन अर्थात्—शान्तरसाभिज्ञेन केनापि मुनिनेत्यर्थः, शान्तेस्तन्निकटनिवासयोग्यत्वात्, रतिपतिनगरनिवासाऽयोग्यत्वाच्चेति भावः। परिणीता विवाहिता स्वीयत्वेनाङ्गीकृतेत्यर्थः। सापत्या तेनैव निजाश्रमं नीता। तस्मिन्नगरे सुमतिसमुद्भवा शान्तिरपि न स्थितेत्यर्थः। रतेरननुकूलतयाऽत्यन्तानभीष्टत्वात् ॥११॥

**गृहनगरादिसमस्तं न्यस्तं पत्या तदाधिपत्याय।
मतिकृतविधिविपरीतं रतिरतिविषमं विधिं विदधे ॥१२॥**

गृहेति। न्यस्तं समर्पितम्। मतिकृतविधिविपरीतमिति विधिविशेषणं क्रियाविशेषणं वा। रतिर्मत्या सपत्न्या कृतो यो गृहनगरादिविधिस्ततो विपरीतं विरुद्धं विधिं रचनाप्रकारं विदधे चकारेत्यसूयाग्रस्तस्वभावत्वं स्त्रीणां व्यञ्जितम् ॥१२॥

यत्र नरपतिहितेहितोभिरतो भरतो नाम सचिवः कृतः ॥

---

१ येन विना न विजीव्यतेऽनुनीयतेऽसौ कृतापराधोऽपि।
कृतेऽपि नगरदाहे भण कस्य न वल्लभो अग्निरिति।

२ आदर्श पुस्तके—'पतेत्रि' इति पाठोऽस्ति।

३ ,, —'हाहे' इति पाठोऽस्ति।

अथ रतिकृतं विपर्ययमेव विशेषतोऽनुवर्णयति—यत्रेति। नरपतेर्हितरूपं यदीहितं तत्राभिरतो भरतो नाम वस्तुतस्तु शृङ्गाररसोऽद्भुचाभिरतो भरतो नाम मुनिरेव सचिवो मन्त्री कृतः। अर्थाद्रत्यैव मतिकृतः सचिवो नगरान्निष्काशित इति सर्वत्रानुसन्धेयम् ॥

यत्र धर्मकर्मकलापमर्मकुशलः पुरोहितः स्मरसूत्रधारो नाम ॥

यत्रेति। स्मरसूत्रधारो वात्स्यायनमुनिः पुरोहितो रत्या कृतः, इति पूर्वेणैव सर्वेषां सम्बन्धः। तदाज्ञयैव तत्रत्याः सर्वे सर्वं पुष्पधनुर्यागादिकर्माऽनुतिष्ठन्तीत्यर्थः ॥

यत्र राजनगरोपकरणप्रसाधनसाधनं शिल्पिप्रवरोऽद्भुतो नाम राज्ञा सत्कृत्य निजानुकूलाऽपूर्वनगरनिर्माणायाऽऽदिष्टस्तथैव तदनुकरोति स्म ॥

यत्र राजनगरेति। राज्ञस्तथा तन्नगरस्य तन्निवासिजनानां तदुपकरणानां च प्रसाधनं शृङ्गारस्तस्य साधनमद्भुतो नाम शिल्पिप्रवरः स च अर्थादद्भुतरस एव तं विना सर्वत्र शोभाविशेषानुदयात्। तदुक्तं साहित्यदर्पणे—

रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वात्सर्वत्राप्यद्भुतो रसः ॥

सत्कृत्य वस्त्रादिभिरलङ्कृत्य आदिष्ट आज्ञप्तस्तदनु तदादेशानन्तरमेव तथैव करोति। स्मेति विस्मये। सर्वदा राजनगरादिप्रसाधनं कुर्वन्नेव तिष्ठतीत्यर्थः

यत्र निगमेतिहासपुराणसंहितादिसुवर्णखचितोत्तमागमबहुवर्णकर्कशतर्करत्नसकलसन्दोहयत्नरचितो ललि-

तोन्नतो विविधतत्सिद्धान्तानलयन्त्रावलिवलितो दुर्जनाजितो विद्वज्जनसभाजितो विराजते सर्वतो नगरं सुपर्वपर्वतोपमाकारः प्राकारः।

इदानीं नगरवर्णनेनैव तचातुर्यमनुवर्णयति—यत्र निगमेति। यत्र सर्वतो नगरं नगरस्य समन्तात् सुपर्वपर्वतोपमाकारः सुपर्वाणो देवाः। "सुपर्वाण सुमनसः" इत्यमरः। तेषां पर्वतो मेरुस्तदुपमस्तत्सदृश आकारो यस्य स तथाभूतः प्राकारो वप्रपर्यायः विराजते विशेषेण शोभते इति वर्त्तमाननिर्देशः पूर्ववदिति सम्बन्धः। तमेव प्राकारं विशिनष्टि—निगमेति। निगमाश्चत्वारो वेदाः, एक एवेतिहासो महाभारताख्यः, पुराणानि सप्तदश, श्रीमद्भागवतं तु "यजमानपञ्चमा इडां भक्षयन्ति" "धनुर्द्वितीय· ककुभश्चतस्रः" इत्यादिष्विव त्रिपट्संख्यापूरकमात्रं भगवतो वर्णमयं स्वरूपमेवेति कौटोक्तिविलासाभिधतया तन्नगरपालनकर्तृत्वेन वदयते।

किञ्च—

"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा।
वैकुण्ठनामग्रहणमशेषाघहर विदुः॥"

इत्यादिषु सर्वपापहारिप्रायश्चित्तत्वेन निर्णीतस्यापि श्रीभगवन्नाम्नस्तत्स्वरूपादभिन्नत्वम्।

"नामचिन्तामणिः कृष्णश्चैतन्यरसविग्रहः।
पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः॥"

इत्युक्तेः। तथा च—

"एकोनविंशे विंशतिमे[१] वृष्णिषु प्राप्य जन्मनी।
रामकृष्णाविति भुवा भगवानहरद्भरम्॥"

इति पद्येऽवतारत्वेन गणितस्याप्यस्मत्प्रभोः श्रीकृष्णचन्द्रस्यावतारित्वमेव।

---

१ विंशतितमे—इति वक्तव्ये तकारलोपश्छन्दोऽनुरोधेन।

"एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।" इति तत्रैवोक्तेः। तथा श्रीमद्भागवतस्य पुराणत्वेन ख्यातस्यापि संयोगपृथक्त्वेन भगवत्प्रकाशान्तरत्वमेव ।

"कृष्णे स्वधामोपगते धर्मज्ञानादिभिः सह ।
कलौ नष्टदृशामेष पुराणार्कोऽधुनोदितः ॥"

इति तत्रैवोक्तत्वात् ।

तथा—

"जगद्गुरुं सात्वतशास्त्रविग्रहम्" इति षष्ठे श्रीमुनीन्द्रेणोक्त्वादित्यलं पल्लवितेन। प्रकृतमनुसरामः। संहिताः प्रह्लादसनत्कुमारादिप्रोक्ताः; [निगमेतिहासपुराणसंहिता आद्यो येषान्ते] तेषां निगमादीनां ये सुवर्णाः शोभनान्यक्षराणि, श्लेषेण सुवर्णं हेम तत्र खचितानि क्रोडीकृतानुरागात्युत्तमशास्त्राणां न तु तत्परिपन्थिनामसच्छास्त्राणां बहुवर्णानि सत्वरजस्तमोमयानि वादजल्पवितण्डादीनि। पक्षे स्पष्टम्। कर्कशानि तर्करत्नानि तर्कोत्तमाः, श्लेषेण तर्का एव रत्नानि तेषां शकलानि खण्डास्तेषां सन्दोहाः समूहास्तैर्यत्नेन परमप्रयासेन रचितो निर्मितस्तेनैवाद्भुतेन शिल्पिप्रवरेणेति प्रकरणलब्धम्। तर्काणां कर्कशत्वन्तु—

"मिथ्यातर्कसुकर्कशेरितमहावादान्धकारान्तरभ्राम्यन्मन्दमतेः" इति।

तथा—

'कर्कशतर्कविचारव्यग्रः' इत्यादिषु व्यक्तमेव। पुनः कथम्भूतः ललितोन्नतः [ललितश्चासावुन्नत इति] कर्मधारयः। एतेन विशेषणेन तस्य मनोहरत्वमनुल्लङ्घ्यत्वञ्चोक्तम्। पुनः कथंभूतः—विविधा नानाविधा निगमतर्कादीनां सम्बन्धिनो ये सिद्धान्तास्त एवानलयन्त्राणि प्रसिद्धानि तैर्वलितः संयुक्तः, अत एव दुर्जनाजितः दुर्जनैरसारातिभिर्द्विविधमीमांसकादिभिरजितो जेतुमशक्यः। पुनः कथंभूतः—विद्वज्जनसभाजितः विद्वज्जनैः पाण्डित्याभिमानवद्भिः सभाजितः सत्कृतः। निगमाद्यर्थतर्कादिचातुर्य्यचाकचिक्यावलो-

कनेनैवानन्दितैः सिद्धान्तानलयन्त्रदर्शनेनैव तन्नगरमस्माभिः सम्यगवलोकितमिति तावतैव कृतकृत्यमन्यैस्तन्नगरं दूरादेव स्तुवद्भिर्विद्वद्वृन्दैर्बहिरेव स्थीयते न तु नगरान्तर्गन्तुं शक्यते इति भावः। एवंप्रकारस्य निगमादिसुवर्णसच्छास्त्रतर्कादिरचितत्वेन तन्नगरस्य निगमाद्यन्तर्वर्तित्वम्, निगमादिरक्षितत्वञ्च व्यञ्जितम्। तत्र निगमद्यन्तर्वर्तित्वे प्रमाणं श्रीभागवतवचनम्—

"भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया।
तदध्यवस्यत्कूटस्थो रतिरात्मन्यतो भवेत्॥" इति।

तथा चतुर्थे पृथुं प्रत्याह सनत्कुमारः—

"शास्त्रेष्वियानेव सुनिश्चितो नृणां
क्षेमस्य सध्र्यग्विमृशेषु हेतुः।
असङ्ग आत्मव्यतिरिक्त आत्मनि
दृढारतिर्ब्रह्मणि निर्गुणे च या॥" इति।

निर्गुणे मायागुणातीते ब्रह्मणि परब्रह्मणि श्रीकृष्णे न तु. निर्विशेषे; तद्रक्षकत्वे प्रमाणम्—

"नैवाभ्यसेद्बहून् शास्त्रान् वाचो विग्लापनं हि तत्"। इति।

तथा—

"यदा यस्यानुगृह्णाति भगवानात्मभावितः।
स जहाति मतिं लोके वेदे च परिनिष्ठिताम्॥" इति।

तथा श्रीमद्गीतायाञ्च—

"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन"। इति

ततो निगमादीनां प्राकाररूपकत्वं युक्तमेव। नगरस्य प्राकारान्तर्वर्तित्वं तथा प्राकारस्य तद्रक्षकत्वं प्रसिद्धमेव॥

यत्र शिखरमणिशकलकलितललितोन्नतशिखर-[निकर] शेखरसहस्रसुन्दरं रुचिरारुणरुचितुन्दिल-

कुरुविन्दमणिमयमेकमेव रागानुगमनं नाम रागामरमहीरुहाङ्कुरमिव गोपुरम् ॥

यत्र शिखरमणीति। "दाडिमीबीजसंकाशं माणिक्यं शिखरं विदुः" इत्युक्तस्तद्रचितशिखरसमूहा एव शेखरसहस्राणि मुकुटवृन्दानि तैः सुन्दरम्। पुनः कथंभूतम्—रुचिराभिररुणरुचिभिः शोणितकान्तिभिस्तुन्दिलाः पुष्टाः कुरुविन्दाभिधा मणिविशेषास्तन्मयमेकमेव रागानुगमनं नाम गोपुरं विराज इति पूर्वेणैव सम्बन्धः। एवमग्रेऽप्यनुसन्धेयम्। रागामरमहीरुहाङ्कुरमिवेत्युत्प्रेक्षा। तत्रामरपदेन तस्य नित्यत्वे सर्वकामप्रदत्वं च ध्वनितम्। वस्तुतो रागानुगद्वारेणैव तत्र प्रवेशो नान्यथेति विवक्षितम् ॥

यत्र परितः प्राकारमनल्पायामगम्भीरताविस्तारदुस्तरं प्रकटोपलक्षितान्तःस्थितसितकठिनप्रस्तरं विमलसत्त्वाख्यं परिखावलयम् ॥

यत्र परित इति। यत्र परितः प्राकारं प्राकारस्य समन्ताद् विमलसत्त्वाख्यं विमलसत्त्वमित्याख्याऽभिधानं यस्य तथा। वस्तुतश्चेतसोऽतीवनिर्विकारत्वं नगरान्तःप्रवेशरोधकं परिखावलयम्। आयामो दैर्घ्यम्, गम्भीरताऽगाधत्वम्, विस्तारस्तिर्यग्दैर्घ्यम्, तैर्दुस्तरं तरीतुमशक्यम्। पुनः कथम्भूतम्—प्रकटोपलक्षितान्तःस्थितसितकठिनप्रस्तरम्—प्रकटमुप समीप इव लक्षिता दृश्यमाना अन्तःस्थिताः सितकठिनप्रस्तराः धवलकठोरपाषाणशकलानि यस्मिन्निति वचनविलोकनादिनैव अन्तःकरणस्थितं स्वच्छत्वं कठिनत्वञ्च लक्ष्यत इति भावः। तथा चोक्तम्—

"बहिर्मुखानां सङ्गेन तच्छास्त्रश्रवणेन च।
शास्त्राभ्यासेन बहुनाऽसजातीयातिसङ्गतः॥
अपि सत्तीर्थशिष्याणां रुध्यते प्रेमपद्धतिः।" इति ॥

यत्र लौकिककवितालताप्रतानपरिरम्भिताङ्कुरितकोरकितमुकुलितविकसितफलितकाव्यनाटकादितरुनिलयं विविधगन्धाधारमन्थरशीतलानिलमिलनललन्नवलकिसलयपरमाभिराममारामकुलं सर्वतः परिखावलयम् ॥

यत्र लौकिककवितेति। यत्र सर्वतः परिखावलयं परिखामण्डलस्य समन्ततः परमाभिरामं महामनोहरमारामकुलमुपवनवृन्दं तदेव विशिनष्टि—लौकिकेति। लौकिका नलदमयन्तीमालतीमाधवादिवर्णनात्मिका याः कविताः कविप्रौढोक्तिनिबद्धकवित्वपद्धतयस्ता एव लतास्ताभिर्नायिकाभिरिव प्रतानैः सूक्ष्मसूत्रैरिव तासामवयवविशेषैः परिरम्भिताः संवलिता ये काव्यनाटकादितरवः—काव्यानि नैषधादीनि श्रव्यानि, नाटकानि मालतीमाधवादीनि दृश्यानि तान्येव तरवो द्रुमाः—तेषां नेतॄणामिव निलयमास्पदम्। अत्र कविता एव लताः काव्यादय एव तरव इत्युभयत्रानुभयोक्तिरूपकम्। स्त्रीपुंव्यक्तिव्यञ्जकाभ्यां लतातरुपदाभ्यां तयोर्नायिकत्वसूचनेनोपमालङ्कारो व्यञ्जित.। किञ्च, नलदमयन्तीवर्णनात्मिकानां कवितानां लौकिकत्वकथनेन भगवद्वर्णनात्मिकानां कवितानामलौकिकत्वं तेन परमपुरुषार्थरूपत्वं ध्वनितम्। ततः परिरम्भणादिवाङ्कुरिता जाताङ्कुरा, कोरकिता जातकोरकाः, मुकुलिता मनाग्विकसिताः, विकसिताः प्रफुल्लाः, फलिताश्चेति प्रतिविशेषणं कर्मधारयः। काव्यादिपक्षे समासान्तर्गतैरेभिः पञ्चभिर्विशेषणैः क्रमेण युक्तिच्छन्दोरीत्यलङ्कारप्रसादाख्याः पञ्चगुणाः काव्यादीनामुक्ताः। नायका अपि नायिकाभिरालिङ्गिता रोमोद्गमसोत्कलिकत्वसर्वाङ्गप्रसरस्मिन्नप्रमोदजन्मसाफल्यवन्तो भवन्त्येवेति च विवेचनीयम्। पुनः कथम्भूतमारामकुलम्—विविधेति। पुष्पितोपवनविहारित्वाद् विविधानां नानाप्रकाराणां गन्धानामाधार आश्रयस्तत एव मन्थरो मन्दगतिः, बहुभाराश्रयो मन्थरो भवत्येव। शीतलश्च योऽनिलो वायुस्तस्य मिलनं

सम्बन्धः प्रतिविशेषणमत्रापि कर्मधारयः। तत्र पूर्वविशेषणद्वयेनास्य सौगन्ध्यं मान्द्यञ्च व्यञ्जितम्; शीतलत्वं तु प्रकटमेवोक्तम्। एवं तस्य त्रिविधस्य वायोः सम्बन्धेन ललन्ति सचाकचिक्यं चलन्ति यानि नवलानि नूतनानि सद्यो जातानि किसलयानि कोमलपल्लवा यस्मिन्। अत्रापि काव्यादिपक्षे व्यञ्जनाऽसमवेतानां पदाक्षराणां लालित्यं ध्वनितमिति सूक्ष्मदृशाऽवधेयम्। तदुक्तं प्राचीनैः—

"प्रातः पङ्कजकुड्मलद्युतिपदं तत्केशरोल्लासवा-
नर्थोऽभ्यन्तरसौरभप्रतिनिभं व्यङ्ग्यं चमत्कारि यत्।
छिद्रैर्यद्रसिकैश्चिरं सहृदयैर्भृङ्गैरिवास्वाद्यते
तत्काव्यं न पुनः प्रमत्तकुकवेर्यत्किञ्चिदुज्जल्पितम्" ॥

एवं सत्कविनिबद्धलौकिककवितामयकाव्यनाटकादिरूपं परिखावलयापरतीरस्थमुपवनं गतानां तत्रैवातिप्रीतिमतां तन्माधुर्यानुभावेनैवानन्दितानां कृतकृत्यम्मन्यानां जनानां परिखाप्रकारादिदर्शनेऽप्यलब्धावसराणां नगरान्तर्गमने न विकाश इति किं वक्तव्यमिति विवक्षितम् ॥

यत्रान्तर्नगरं यावककुसुम्भरससरसविमलहिङ्गुलसिन्दूरलेशपेशलपिच्छिलकुङ्कुमपङ्काङ्गरागवतीव प्रकटपरमानुरागवतीव वसुमती भाति शोणितमणिमयी ॥

एवं नगरबहिर्भागवर्णनं विधाय तन्मध्यभागमनुवर्णयति— यत्रान्तर्नगरमिति। नगरस्यान्त इति अन्तर्नगरं यावकादिभिररुणरसैः सरसा मृदुलीकृता ये निर्मला हिङ्गुलसिन्दूराद्यरुणपदार्थलेशास्तैः पेशलं सुन्दरं यत्कुङ्कुमपङ्कं तेनाङ्गरागवतीव वसुमती भूमिर्भाति। अन्यत् स्पष्टमेव ॥

यत्रान्तर्बहिरन्तः पद्मरागशकलकलधौतकलितान्यतिललितानि सकलान्येव सद्मानि।

यत्रान्तर्बहिरन्तरिति। यत्रान्तर्यस्मिन्नगरमध्ये बहिरन्तः—बहिश्च अन्तश्च—पद्मरागाख्याः शोणमणयस्तेषां शकलानि खण्डाः कलधौतं सुवर्णञ्च, अर्थात् सुवर्णस्य पङ्कमित्यर्थस्तैः कलितानि रचितान्यत एव ललितान्यत्यन्तमनोहराणि सकलानि समस्तान्येव सद्मानि गृहाणि प्रासादा भवन्तीति क्रियापदमुपरितो योज्यमित्यलमधिक-व्याख्यानेन ॥

यत्र विशालविद्रुमद्रुमशकलघटिता कलधौतकील-शृङ्खलादिजटिता सर्वत्रैव विकटाकपाटपटली ॥

यत्र विशालेति। यत्र विशालाः सपरिणाहा ये विद्रुमाणां प्रवा-लानां द्रुमास्तरवस्तेषां शकलैः खण्डैर्घटिता रचिता, कलधौतस्य सुवर्णस्य कीलाः शृङ्खलादयश्च तैर्जटिता खचिता सर्वत्रैव सर्वसद्मसु विकटा धर्षयितुमक्षमा कपाटानां पटली समुदायः ॥

यत्र सद्मशिखरोपरिसुवर्णकलशोपरिसुवर्णरसरञ्जि-तैव पताकावली ॥

यत्र सद्मेति। स्पष्टार्थमेव

मूलं मुदां रतिपतेर्मनसोऽनुकूल-
माचूलमूलमरुणं धरणीगुणेन।
निश्रेयसाकरममन्दमरन्दसान्द्रं
सन्ध्याघनोपमघनोपवनं विभाति ॥१३॥

मूलं मुदामिति। रतिपतेः सदयितस्य मधुरमेचकस्य मुदामा-नन्दानां मूलं तस्यैव राज्ञो मनसोऽनुकूलं परमप्रीतिप्रदं धरिण्या गुणेनारुणिमलक्षणेन आचूलमूलं चूलं चूडामूलं तदभिव्याप्याचरणम्। नैश्रेयसाकरं नैश्रेयसं नाम वैकुण्ठस्थितं वनं "यत्र यत्र भगवानवतरति

तत्र तत्रांशेन पूर्णस्वरूपेण च वैकुण्ठमवतरति तत्र तद्वनं चायात्येव" इति शास्त्रे प्रसिद्धम्। तत्र वैकुण्ठस्थितस्य तथा श्वेतद्वीपादिवैकुण्ठांशस्थितस्य वनस्य च आकरं प्राकट्यनिदानमंशिरूपमित्यर्थः। अमन्दो मुहुर्यो मकरन्दस्तेन सान्द्रं निविडं सन्ध्याघनोपममरुणाभं घनं सच्छायमुपवनमारामो विभाति शोभते॥ १३॥

यत्रानुरागरसरञ्जितमनसः कुसुम्भकुङ्कुमरसरञ्जितवाससः सर्व एव नगरनिवासिनः कृताः॥

यत्रानुरागेति। कृताः रतेराज्ञया तेनाद्भुतेनैव। यत्र गोपुरमारभ्य एतावत्पर्य्यन्तं सर्वत्रारुणमयत्वकथनं तन्नगरस्य सूर्यादिलोकानां तेजोमयत्वादिवदनुरागमयत्वमेव विशदयति। अनुरागरसेन रञ्जितानि वासांसि येषां तादृशाः सर्वे नागराः कृता इति भावः॥

यत्र सर्वे पतत्रिणोऽप्यरुणाः। तत्र दिग्दर्शनाय हंसानामरुणत्वोदाहरणं यथा—

अहो महीयान् महिमाऽपरोक्षो
राधापदाधारमहीतलस्य।
पयोविवेकप्रचुरप्रशंसो
हंसोऽपि यत्रारुणतां प्रयाति॥१४॥

यत्रेति स्पष्टार्थमेव॥ १४॥

यत्र वीरद्वयहासविशदसंज्ञौ भूपोपमन्त्रिणौ रत्यैवाधिकृतौ।

पक्षे युद्धवीरधर्म्मवीरौ हासश्च नृपमित्रतया, उपमन्त्रिणः उत्साहोपहासादिभिस्तत्पोषकाः॥

यत्र सहःसहस्यसंज्ञावेवाद्वैतपरिनिष्ठितौ शङ्कर-शिष्यौ ॥

यत्र सह इति। सहःसहस्यनामानौ सहा मार्गशीर्षः, सहस्यः पौषः, तावेवाद्वैतस्य द्वयोरैक्यस्य सम्पादकौ तत्र शीताधिक्याद् द्वयोरैक्यं भेदाभाव इव भवतीत्यर्थः। "मार्गशीर्षे सहा मार्गः" इति; "पौषे तैषसहस्यौ द्वौ" इति चामरः ॥

यत्राभिमताऽप्रचुरप्रचारमाध्वमता ऊष्मकभामादि-दर्शननामानस्तदन्तेवासिनः ॥

यत्राभिमतेति। अभिमतः संम्मतोऽप्रचुरप्रचारः माध्वमतो येषान्ते तथा; ऊष्मकभामादिदर्शननामानस्तदन्तेवासिनो माध्व-शिष्याः। वस्तुतस्तु ऊष्मको ग्रीष्मः, भामो मानः, आदिदर्शनं पूर्वा-नुरागः, एतेषु किञ्चिद्वियोगोऽपि तत्रात्यन्तोष्मणा शुचिमानयोः पूर्वा-नुरागे तु संयोगाभावेन पूर्वं भेदोऽस्त्येव, तन्मतस्याऽप्रचुरप्रचार-त्वात्, सर्वदाद्वैतमेवेति ध्वनिः ॥

यत्र विशिष्टाद्वैतपरिनिष्ठिताः कुसुमसमयसदासार-सोमप्रभनामानो रामानुजीयाः ॥

यत्रविशिष्टाद्वैतेति। द्वैतयुक्तमद्वैतं विशिष्टाद्वैतं तत्र परिनिष्ठिताः नियद्धश्रद्धाः कुसुमसमयसदासारसोमप्रभनामानो रामानुजीयाः रामानुजशिष्याः। वस्तुतस्तु वसन्तवर्षासमयशरदः। "वसन्ते पुष्पसमयः" इत्यमरः। सदा आसारो वृष्टिर्यस्मिन्स वर्षासमयः। सोमस्य चन्द्रस्य प्रभा कान्तिर्यस्मिन् स शरदृतुः। एतेषु भेदाभेदौ मिश्रतया स्त इति विशिष्टाद्वैतसिद्धिः ॥

यत्र प्रेमभक्तिसिद्धान्तप्रवर्तकः कलिप्रियस्य शिष्य-स्तपस्याख्यः ॥

यत्र प्रेमेति। प्रेमभक्तिमार्गप्रवर्तकः कलिप्रियस्य नारदस्य शिष्यस्तपस्याख्यः। वस्तुतस्तु फाल्गुनः, कलिप्रियशब्दस्यान्वर्थतया कलहप्रवर्तकत्वमप्यायातम्। तेन फाल्गुनी होलिका क्रीडारूपं कलहकुलं भवत्येव प्रेमरसमयम्। "स्यात्तपस्यः फाल्गुनिकः" इत्यमरः॥

यत्र प्रेमप्रणयस्नेहमानरागानुरागमहाभावमोदनमादनमोहनाभिधा यथोत्तरं ज्येष्ठा रतिपतिप्रेष्ठा राजकुमारश्रेष्ठाः॥

यत्र प्रेमेति। यत्र प्रेमादयो दशराजकुमारश्रेष्ठाः। अत्र ज्येष्ठश्रेष्ठपदाभ्यामन्येऽपि निर्वेदाद्यास्त्रयस्त्रिंशदष्टसात्त्विकाश्च रतिपतेरेव पुत्रा इति व्यञ्जितम्। यथोत्तरं ज्येष्ठा इति वक्ष्यमाणं रतेर्विपरीतकर्तृत्वं ज्येष्ठकनिष्ठवैपरीत्यकथनेनात्रापि दर्शितम्।

किं वक्तव्यं पुत्रेषु, स्वयमपि रतिः कान्तविषयकतया कान्ताश्रयया वा रत्या कनिष्ठापि ज्येष्ठा जाता। तथोक्तं साहित्यदर्पणकृता—"कनिष्ठज्येष्ठरूपत्वान्नायकप्रणयं प्रति" इति॥

यत्र भीरुभावरुद्रविधेयकरुणाकरकदर्याख्या भूपतिपरिपन्थिनो राजनिर्जिता नगरान्तिकमपि नायान्ति॥

यत्र भीरुभावेति। भीरुभावरुद्रविधेयकरुणाकरकदर्याख्याः वस्तुतस्तु प्राकृतभयानकरौद्रकरुणबीभत्साः, एतेषां शृङ्गाररसाऽमित्रतया परिपन्थित्वं युक्तमेव॥

यत्र पुरपरिपालकः स्थिरीकृतराजशासनः कीरोक्तिविलासो नाम॥

यत्र पुरेति। पुरपरिपालकः चत्ता कीरोक्तिविलासो नाम।

वस्तुतस्तु श्रीभागवतमेव मर्यादामयतया राजशासनं स्थिरीकृत्य पुरं पालयति—दिवानिशं नानासिद्धान्तगोमुखध्वनिभिस्ततस्ततो राजाज्ञया भ्रमति—न तु तत्रत्यान् निग्रहीतुं प्रभवति, तत्रत्यानां सर्वेषां मधुरमेचकीयत्वात्। स्थिरीकृतं सम्यक् स्थापितं राज्ञो मधुरमेचकस्य शासनं येनेति बहुव्रीहिः॥

यत्र शूरत्वमात्रादृतो निरर्गलो राजसेवानभिज्ञोऽनत्यन्ताभीष्टो राज्ञा दुर्जननिर्जयाय निर्दिष्टो निरन्तरं परितो नगरमेव परिभ्रमति सेनापतिरभ्यस्तशास्त्रो नाम।

यत्र शूरत्वेति। अभ्यस्तशास्त्रो नाम सेनापतिः। वस्तुतः शास्त्रश्च एव। कथंभूतः—राज्ञोनात्यन्ताभीष्टः, तत्र हेतुगर्भं विशेषणत्रयम्—निरर्गलो राजसेवानभिज्ञो धृष्टश्चेति; अनत्यन्ताभीष्टत्वेन किञ्चिदभीष्टत्वमायातम्। तद् व्यञ्जयितुं विशेषणान्तरं शूरत्वमात्रादृत इति, शास्त्रीयकर्कशतर्कयुक्तिमयशस्त्रास्त्रवित्तया बहिर्मुखसंसत्समराङ्गणे तज्जयकुशलत्वेन राज्ञादृतः; अतो दुर्जनानां स्वविरोधिनां द्विविधमीमांसकादीनां निर्जयाय निर्दिष्ट परितो नगरमेव ससैन्यः परिभ्रमति। नगरान्तर्नायातीत्येव शब्दार्थः। तन्नगरे शास्त्रीयकर्कशवादवितण्डादीनां नावसर इति भावः॥

यत्र दृग्दर्शनवचनाभिज्ञसंज्ञावलक्षितहृदयवृत्तान्तविदौ परीक्षकौ॥

यत्र दृग्दर्शनेति। दृग्दर्शनवचनाभिज्ञसंज्ञौ परीक्षकौ दर्शनश्रवणाभ्यामेवा :स्थितार्थाभिज्ञौ। वस्तुतस्तु दर्शनश्रवणाभ्यामेवान्तःस्थितं निभृतवृत्तान्तं तन्नगरे सद्यो ज्ञायत इति तत्रत्यानां चातुर्य्यं व्यञ्जितम्॥२५॥

यत्र दुरदृष्टदुराग्रहदुर्वैराग्यदुःसंज्ञादयः प्रबलमती-

द्वारां गोपुरवहिःप्रदेशस्थाः परीक्षकद्वयपरीक्षितान् रतिपतिसुहृद एव नगरान्तर्गन्तुमादिशन्ति ॥

यत्र दुरदृष्टेति। यत्र दुरदृष्टादिसंज्ञाः प्रवला रोद्धुं समर्थाः प्रतीहारा द्वारपालाः। वस्तुतो दुरदृष्टादयश्चत्वारस्तन्नगरान्तःप्रवेशरोधका गोपुरवहिःप्रदेशस्था नत्वन्तः प्रविशन्ति। तत्र दुर्भाग्याद्याश्रयः कोऽपि नास्तीति भावः। किन्तु नृपसुहृदः सहस्रशिरस एवान्तर्गन्तुमादिशन्ति, न तु एकशिरस इत्येव शब्दार्थः। अथ तत्र के तैः प्रवेशिताः, के च न प्रवेशिता इत्यपेक्षायामन्वयव्यतिरेकाभ्यां तान् प्राक्तनाधुनिकविभागेन निर्दिशति। एते पुरा यदवधि सुराऽसुराणामनुग्रहनिग्रहार्थमाविष्कृताऽप्राकृतातिवन्धुरविग्रहं परमानुग्रहामृतसिन्धुं दीनानामेकवन्धुं सुवन्धुं कमलवन्धुकुलकमलकाननकमलवन्धुं गतिगञ्जितमुदसिन्धुरं निजासनान्तिकमकस्मादागतं रघुकुलतिलकं जानकीजानिं श्रीरामचन्द्रं सादरमवलोकितवन्तः, तदवधि तद्युगललावण्यामृतसेकादिव सत्वरोदित्वरकिसलयदलादिभिरुपचितनिजेष्टदेवयुगलसेवनमयमनोरथाङ्कुरैराक्रान्तमनोरथाः तत एव सततानुगतनिजेष्टप्रियसहचरीवर्गाश्चिरमभीप्सिताऽनवाप्तिसम्प्राप्तसन्तापोष्मपरिपाकगाढतरभावाः परमानुरागरसरञ्जितस्वभावाः प्रकटं सहस्रशिरस इति दूरादेव दृग्दर्शनपरीक्षिताः, दुर्दृष्टादिभिर्न मस्कृताः संस्तुताश्च, सत्कृता नगरनिवासिभिः, अन्तःप्रवेशिताः सततासुतरूपवेषपेशलमूर्तयः पत्तनालङ्कृतयः परमहंसप्रशंसितगतयः सुखं विहरन्ति मुनयः सहस्रशो दण्डकाटवीनिवासिनः प्राचीनाः। तदुक्तम्--

पुरा महर्षयः सर्वे दण्डकारण्यवासिनः।
रामं दृष्ट्वा हरिं तत्र भोक्तुमैच्छन् सुविग्रहम्॥
ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले।
हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात्॥ इति।

तथा महाविद्यामहासिद्ध्योरुपदेशादङ्गीकृतश्रीवृन्दावनवसतयो

निरन्तरं तन्नगरनिवासिजनानुगतयो विशुद्धानुरागामृतसंभृतमतयो नैकशिरस इति परीत्तकद्वयपरीक्षितरतयो द्वारपालै रचितोचितनतयो नगरपरिकरकृतसत्कृतयोऽद्भुतहासविलासमाधुर्य्यादिसमुन्नतयोऽलङ्कृत्यलङ्कृतयो विलसन्ति यत्र श्रुतयोऽनन्ताः प्राचीनाः।

तदुक्तं श्रुतिभिरेव निजस्तुतौ दशमे—

"निभृतमरुन्मनोक्षेत्यारभ्य, वयमपि ते समाः समदृशोऽङ्घ्रिसरोजसुधा" इति। इदानीमिदानीन्तना यत्र गुरूतरगुरूपदेशपरवशतया बहिरोपद्धिविनयादिवीता अपि अन्तर्नितान्तनिपीतानुरागासवविवशासवः सहस्रशिरस एवेति दृग्दर्शनवचनाभिज्ञनिर्णीताः प्रतिहारैर्नुताननताः प्रवेशिता अपि भीता इव शिथिलपदसत्वरगता विनीतास्तदाननमवलोकयन्तः ससंभ्रममन्तर्गताः पुरजनादृताः कीरोक्तिविलासानुगृहीताः सहसाद्भुतसौन्दर्यमाधुर्यौदार्यगुणगाङ्गेयगुणमयवसनमणिगणखचितरशनादिविभूपिता विभूपितविभूपणाः प्रायोगतद्रूपणाः प्रियजनपरिषदं रतेराज्ञया हंसकमनीयगमनैरलं शोभयन्ति कियन्तः साम्प्रदायिकाः रसिकनायका भागवता महानुभावाः प्राचीनेतरा ये श्रीरूपगोस्वामिचरणैर्धुर्य्यनामानो लिखिताः। यथा तल्लक्षणमुदाहरणञ्च रसामृतसिन्धौ—

"कृष्णस्य प्रेयसीवर्गे दासादौ च यथायथम्।
यः प्रीतिं तनुते भक्तः स धुर्य्य इति कथ्यते॥"

यथा—"देवः सेव्यतया यथा स्फुरति मे देव्यस्तथाऽस्य प्रियाः
सर्वः प्राणसमानतां प्रचिनुते तद्भक्तिभाजां गणः।
स्मृत्वा साहसिकं बिभेमि तदहं भक्ताभिमानोन्नतम्,
प्रीतिं तत्प्रणते खरेप्यविदधद् यः स्वास्थ्यमालम्बते॥" इति।

तथा—

एतेऽनन्याश्रयतापराश्रयाः सरला बहिरन्तरेकरसमधुरिमरसपरिमुताः, विमुताश्च विधिनिषेधसीमानम्, परमरूढ़भावदशापरवशाः, असात्विका अपि सततोदितसात्विकाः, अराजसा अपि सम-

शोदितराजसाः, अतमसोपि मनसि मिन्नतमसः, निर्गुणा अप्यनुगतानेक कल्याणगुणाः, सहस्रशिरस एवेति संस्तुता दूरादेव दृग्दर्शनवचना भिशाभ्यम्, निपीताः प्रणयमाध्वीकमदेन, नमस्कृताः प्रतीहारचतुष्टयेन प्रवेशिताश्च, सादरं तदभिवीक्षणेप्यलब्धक्षणा, मदमन्थरगतयः कथमपि शनैरन्तर्गताः क्षणस्तम्भिता निरङ्कुशभावविशेषोदयाङ्कुरेण परिरम्भिताः, पुरपरिजनैरालिङ्गिताः सत्वरं कौशलसौशील्यसौकुमार्य्यसौस्वर्यादिक्रियाकलापैः, परिवीता दृष्टिभिर्येव तूर्णं लोकोत्तर-गन्धद्रव्यवासितैः सुवर्णैः सुवर्णसूत्रकलितललितचतुरञ्चलैर्मृदुल-चीनवीनैर्वर्णरोचिरुचितवर्णैः सिचयनिचयैः, अवनता हारवलय-भारेणेव, प्रायो भूषिताः सुरभिकोमलकुसुमविभूषणैरेव, नीता मैत्री-वेत्रवत्या, कुरुविन्दमणिमयमहामन्दिरसभाजिताः, सविधं सखी-भिरनुरञ्जिताः, सस्मितवीक्षणैर्निजराजसुतयाधिनिवेशिता निजप्रिय-सखीनामधिसंसद्, तत्रापि निजकरकलितललितकनकमालती-मञ्जुलमालिकया मुहुरवनतशिरसो मरकतमणिमयमञ्जुलमूर्तिं कामपि नगराधिदेवीं संभूष्य तयोर्मिथः शोभाविशेषोदयं निभृत-मुदीक्षितुकामाः परमाभिरामा वामा ललितानुरागा लाक्षारसारुण-तरैर्निजचरणकमलैरलङ्कुर्वन्ति रतिमन्दिरं कियन्तो विरलाः परमानिर्वचनीयचरिता रसिकशेखरशिखामणय इदानीन्तना अत एव प्रायो रूपगोस्वामिचरणैर्धीरनामानो निर्णीताः। यथा तल्लक्षणमुदाहरणञ्च रसामृतसिन्धौ—

"आश्रित्य प्रेयसीमस्य नातिसेवापरोऽपि यः।
तस्य प्रसादपात्रः स्यान्मुख्यो धीरः स उच्यते ॥"

उदाहरणं यथा—

"कमपि पृथगनुच्चैर्नाचरामि प्रयत्नं
यदुकुलकमलार्क त्वत्प्रसादाश्रयेऽपि ।
समजनि ननु देव्याः पारिजातार्चितायाः
परिजनलिखनान्तःपातिनी मे यदाख्या" ॥ इति,

अथ व्यतिरेकः—

पुराग्निकुमाराः सुतपसो मधुरिमरसमयप्रेमामृतसम्भृतमनसो रागानुगमनाभिमुखमागता अपि विधिवन्धुकामना गन्धवत्तया सैकशिरस इति परीक्षिताः परीक्षकद्वयेन, दूरादेव निवारिताः प्रतीहारैः, तत्रैव स्थिता मुहुरवनता विज्ञापिता राज्ञे, तदाज्ञया करुणावेत्रवत्या द्वारकान्तःपुरान्तः प्रवेशिताः। तदुक्तं पुराणान्तरे—

"अग्निपुत्रा महात्मानस्तपसा स्त्रीत्वमापिरे।
भर्त्तारं च जगद्योनिं वासुदेवमजं विभुम्॥"

तथैव सिद्धान्तितं श्रीरूपगोस्वामिचरणैः—

"रिरंसां सुष्ठु कुर्वन् यो विधिमार्गेण सेवते।
केवलेनैव स तदा महिषीत्वमियात्पुरे॥"

तथा पुनर्मथुरायाम्—

सैरन्ध्री त्रिवक्रा नाम परमरागार्पिताङ्गरागा श्रीकृष्णकरकमलसंसर्गप्रभावगतवक्रभावा धृष्टस्वभावा रागानुगमनान्तःपदचतुष्टयं प्रविष्टापि दृष्टा कामवासनासङ्कुचितनासापुटाभ्यां परीक्षकाभ्याम्, सशीर्षेयमिति निर्दिष्टा, सत्वरं दुरदृष्टादिभिः वहिष्कृता, तत्रैव स्थिता, कालयवनागमने मथुरापुरजनैः सह द्वारवतीं नीता।

तच्च "दुर्भगेदमयाचतेति; तत्र योग प्रभावेणेत्यादि" श्रीभागवते स्पष्टमेव। तथा प्राग् गिरिधराभिधानहरिप्रतिकृतौ कृताऽप्राकृतातिप्रीतिप्रतीतिर्गतापि रागानुगमनान्तिकमीपदीपिताऽज्ञानांशसशल्याशया सकल्याणशिरस्केति दृष्टा ताभ्यां दरभुग्नभ्रूकुटितदृष्टाभ्याम्, युद्धा प्रतीहारैर्निषिद्धा निरुद्धा च, प्रेमपाशनिबद्धा नयनघननीररचितासारा हृदयोदितविविधविप्रतीसारा गतधैर्यसारा सा राज्ञे विज्ञाय विज्ञापिता, कृपावेत्रवत्या द्वारावत्यामन्तःपुरं प्रवेशिता। अधुनातनास्तत्रैतिह्यमेव प्रमाणम्, एवं बहवः प्राक्तना इदानीन्तनाश्चेत्यलं पल्लवितेन। प्रकृत मनुसरामः॥

यत्राधर्म एव धर्मः स्थापितः ॥

इदानीं रतिकृतं वैपरीत्यं विशेषतो दर्शयति—

यत्राधर्म इति। यत्र नगरे स्थापितः स्थिरीकृतो रत्यैवेति सर्वत्रानुसन्धेयम् ॥

तदुक्तं श्रीभगवतैव गीतायाम्—

"सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥"

तत्रोदाहरणे धर्मत्यागस्य शरणगमनं प्रति कारणता दृश्यते परित्यज्येति ल्यप्प्रत्ययस्यानन्तर्य्यार्थत्वात् तत्पूर्वकमेव तत्सिद्धेः। अन्यथा मामेकं शरणं याहि सर्वधर्मान्परित्यज्येत्येवावदयत्। अतो भगवदभिमुखानां सर्वधर्मपरित्यागलक्षणोऽधर्म एव धर्मः, स्वे स्वेऽधिकारे या निष्ठेत्युक्तेः किं पुनस्तन्नगरस्थानामिति कैमुत्यम् ॥

तथैवोक्तं प्रथमे—

"[1]त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेः" इति।

त्यक्त्वेति। अत्रापि पूर्ववदेवार्थः ॥

तथैवोक्तमेकादशे—

"[2]देवर्षिभूताप्तनृणां पितॄणामिति"।

देवर्षिभूतेति। अत्रापि तथैवार्थः।

१—त्यक्त्वा स्वधर्मं चरणाम्बुजं हरेर्भजन्नपक्वोऽथपतेत्ततो यदि।
यत्र क्वाऽभद्रमभूदमुष्य किं को वार्थ आप्तो भजतां स्वधर्मतः ॥
[भा० स्क० १ अ० ५]

२—देवर्षिभूताप्तनृणां पितॄणां न किङ्करो नायमृणी च राजन्।
सर्वात्मना यः शरणं शरण्यं गतो मुकुन्दं परिहृत्य कृत्यम् ॥
[भा० स्क० ११ अ० ५]

तदुक्तं दशम उद्धवेन—

"[1]आसामहो चरणरेणुजुषामहं स्याम्" इति।

आसामिति। अत्रार्यपथपदस्य धर्ममार्गमिति तैर्व्याख्यातत्वाद्-धर्मः स्फुट एव॥

तथैवोक्तं सतीसमूहसेवितपदाब्जरजोभिः श्रीव्रज-सीमन्तिनीभिः—

"[2]यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग" इति।

यत्पत्यपत्येति। अस्य पद्यस्य लोकविख्यातस्वामिपादप्रभृति-भिर्व्याख्यातृभिर्विविधव्याख्यानैरेतदेवाभिप्रेतम्—'पत्युः शुश्रूषणम्' इत्यादिभिः पत्यादिसेवनलक्षणो धर्मस्त्वयोक्तः स सर्वत्यागपूर्वकं त्वदभिमुखमागतानां न, किञ्च 'श्रवणाद्' इति पद्येन यद्गृहे एव मम श्रवणादिकं कर्त्तव्यमित्युक्तं सोऽपि दर्शने निमेषप्रत्यूहमसहमानानां न धर्मः, उभयोः क्रमाद् वैमुख्यान्तररूपत्वात्। किन्तु परपुरुषस्य तव चरणपरिचरणमेव धर्मः, अत्रैवाधिकारात्। तदुक्तं गीतायाम्—

"श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः"॥ इति।

व्याख्यातञ्चैतत्पद्यं श्रीवल्लभाचार्य्यैः। अत्र स्वधर्मो जीवस्य सहजदासत्वाद् हरिसेवालक्षणः, परधर्मः शरीरधर्मो ब्राह्मणा-दिवर्णधर्म इति॥

१—आसामहो चरणरेणुजुषामहं स्यां वृन्दावने किमपि गुल्मलतौषधीनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम्॥
[भा० स्क० १० अ० ४७]

२—यत्पत्यपत्यसुहृदामनुवृत्तिरङ्ग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तम्।
अस्त्वेवमेतदुपदेशपदे त्वयीशे प्रेष्ठो भवान् तनुभृतां किल बन्धुरात्मा॥
[भा० स्क० १० अ० २९]

तथा पुनस्ताभिरेवोक्तम्—

"[१]यर्ह्यम्बुजाक्ष तव पादतलं रमाया:" इति ।

यर्ह्यम्बुजाक्षेति । अत्र त्वच्चरणं यर्हि अस्प्राक्ष्म तत्प्रभृति अन्यस्य पत्यादेरग्रे स्थातुमपि न पारयाम इति स्फुट एव मधुररतिकृतोऽयं विपर्ययः ॥

पुनरपि ताभिरेवोक्तम्—

"[२]का स्त्र्यङ्ग ते कलपदामृतवेणुगीतसंमोहिता" इति ।

का स्त्र्यङ्ग त इति । अत्राप्यार्यपथाद् धर्ममार्गादित्येव तैर्व्याख्यातत्वादधर्मः स्फुट एव । प्रस्तुतं समर्थयद्भिरेतैरार्षैरुदाहरणैः पूर्वोक्तं नगरस्यास्य पुराणशास्त्रादिमयप्राकारान्तर्वर्तित्वमपि स्फुटीकृतम् ॥

तथोक्तं श्रीमन्महाप्रभुपादैः—

"नाहं विप्रो न च नरपतिर्नापि वैश्यो न शूद्रो
नो वा वर्णी न च गृहपतिर्नो वनस्थो यतिर्वा ।
किन्तु प्रोद्यन्निखिलपरमानन्दपूर्णामृताब्धे-
र्गोपीभर्तुः पदकमलयोर्दासदासानुदासः ॥" इति ।

नाहमिति । अत्र निरन्तरमधुरतरभावविशेषाविर्भावाभिभूता-

१—यर्ह्यम्बुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य ।
अस्प्राक्ष्म तत्प्रभृति नान्यसमक्षमङ्ग स्थातुं त्वयाभिरमिता बत पारयामः ।
[भा० स्क० १० अ० २९]

२—का स्त्र्यङ्ग ते कलपदायतमूर्च्छितेन संमोहितार्यचरितान्न चलेत्त्रिलोक्याम् ।
त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोद्विजद्रुममृगाः पुलकान्यबिभ्रन् ॥
[भा० स्क० १० अ० २९]

न्यसमस्तस्मृतेरपि साक्षाद्भगवतः श्रीमहाप्रभोर्मानसिकोऽपि सर्वधर्मत्यागः प्रीतिभक्त्यादिरसास्वादलुब्धमनसां साधकभक्तानां तद्रसद्वारप्रवेशप्रकाशनार्थं वचसः प्रादुर्भूतः; अथवा दैन्यलक्षणात् प्रेमानुभावान्निःसृत इत्यनुसन्धेयम्। गोपीभर्तुः शृङ्गाररससर्वस्वस्य श्रीनन्दनन्दनस्येति भजनीयविशेषोक्तिः। दास्यरतिकृतोऽयं सर्वधर्मत्यागलक्षणोऽधर्मः स्फुट एव ॥

तथैवोक्तं श्रीगोस्वामिश्रीहरिवंशमहानुभावैः—

"कैशोराद्भुतमाधुरीभरधुरीणाङ्गच्छविं राधिकां
प्रेमोल्लासभराधिकां निरवधि ध्यायन्ति ये तद्धियः।
त्यक्ताः कर्मभिरात्मनैव भगवद्धर्मेऽप्यहो निर्ममाः
सर्वाश्चर्यगतिं गता रसमयीं तेभ्यो महद्भ्यो नमः ॥" इति।

कैशोराद्भुतमाधुरीति। कर्मभिः समस्तैरात्मना स्वत एव त्यक्ता न तु ते स्वतः कर्माणि संत्यजन्तीति भावः। भगवद्धर्मेऽपि श्रीभागवतोक्तेऽपि "ये वा भगवता प्रोक्ताः" इत्यादौ तत्रापि निर्ममाः—नैते धर्मा मामकीना इति तस्मिन्नपि निर्ममाः। स्पष्टमन्यत् ॥

तथोक्तं तैरेव—

"लिखन्ति भुजमूलयोर्न खलु शङ्खचक्रादिकम्,
विचित्रहरिमन्दिरं न रचयन्ति भालस्थले।
लसत्तुलसिमालिकां दधति कण्ठपीठे न वा,
गुरोर्भजनविक्रमात् क इह ते महाबुद्धयः ॥" इति।

लिखन्तीति। स्पष्टार्थमेव। एतत्पद्यद्वयमेवंविधमन्यदपि पद्यवृन्दं तेषां महानुभावानां भावाखण्डरञ्जितविमलविशालाशयाकाशप्रकाशमानस्य प्रणयप्रभाकरस्य प्रभावनिरस्तमर्यादातमसां पर-

मानुरागासवसम्भूतं पारवश्यं व्यञ्जयत्तस्या अवस्थायाः परमपुरुषार्थत्वम्, तदवस्थावस्थितानां वैरल्यं तथा सर्वधर्मान् परित्यज्येत्यत्र सर्वशब्दस्याप्यर्थं बोधयति।

तथोक्तं श्रीविश्वनाथचक्रवर्त्तिमहाशयैः दानकेलिकौमुदीटीकायाम्—

"दानकेलिकलौ लुप्तधर्म्ममर्य्यादयोर्भजे।
राधामाधवयोः कामलोभदम्भमदानृतम् ॥" इति।

दानकेलीति। अत्रलुप्तधर्म्ममर्यादयोरिति मधुररतिकृतः, तथा "कामलोभदम्भमदानृतं भजे" इत्यत्र दास्यरतिकृतस्तयोर्विपर्य्ययः स्फुट एव, कामादीनामधर्मरूपत्वात्॥

तथोक्तं श्रीप्रबोधानन्दसरस्वतीपादैः—

"कुरु सकलमधर्मं मुञ्च सर्वं च धर्मं
त्यज गुरुमपि वृन्दारण्यवासानुरोधात्।
स तव परमधर्मः सा च भक्तिर्गुरूणां
सकलकलुषराशिर्यद्धि वासान्तरायः ॥" इति।

कुरु सकलमिति। अत्र भगवतः प्रकाशविशेषे श्रीवृन्दावने रतिसामान्यकृतोऽयं तयोर्विपर्य्ययः, "वनं मे देहरूपकम्" इत्युक्तत्वात्। एवंविधानि वचनानि श्रीवृन्दावनशतके शतशः सन्ति कियन्ति लेखनीयानि॥

तथा स्कान्दे—

"धर्मो भवत्यधर्मोऽपि कृतो भक्तैस्तवाच्युत।
पापं भवति धर्मोपि तवाभक्तैः कृतो हरे ॥" इति।

तथा रेवाखण्डे स्कान्दे—धर्मो भवतीति स्पष्टार्थमेव॥

तथा पुराणान्तरे—

"यदि मधुमथन ! त्वदङ्घ्रिसेवां
हृदि विदधाति जहाति वा विवेकी।
तदखिलमपि दुष्कृतं त्रिलोके
कृतमकृतं न कृतं कृतञ्च सर्वं ॥" इति।

यदीति। अत्र विवेकी बुद्धिमान् पक्षेऽविवेकीति च्छेदः। स्पष्टमन्यत्। पद्यद्वयमिदमन्वयव्यतिरेकात्मकत्वात् प्रकरणान्ते लिखितम्। द्वयोर्दास्यरतिकृतो विपर्य्ययः॥

तथोक्तं श्रीरूपगोस्वामिचरणैः—

"वनमालां भजमानैर्गुरुरपि पोष्टापि दानपूरेण।
अलिभिरमोचि करीन्द्रो हरिसेवा धर्मतो हि वरा॥" इति।

वनमालामिति। पोष्टा दानपूरेणेत्यत्र श्लेषेण वितरणप्रवाहेण, पक्षे मदोदकेन पोषणकर्त्तापि। शेषं स्पष्टमेव॥

यथाह गोवर्द्धनः—

"आक्षेपचरणलङ्घनकेशग्रहकेलिकुतुकतरलेन।
स्त्रीणां पतिरपि हरिरिति धर्मो न श्रावितः सुतनु॥" इति।

अत्र धर्मो न श्रावित इत्यत्र तथा केलिषु तथाविधोऽधर्म एव धर्म इत्यभिप्रायो वेदनीयः। मधुररतिकृतोऽयं विपर्य्ययः प्रकट एव॥

यथा वा—

हृष्यच्चकोरनयनस्य हसन्मुखस्य
नृत्यद्भ्रुवो ! नवरसज्ञ विना रसज्ञाम्।
माधुर्य्यरङ्गमिदमङ्ग तवाङ्गमङ्ग-
मन्तर्मुहुर्वदति धर्ममधर्ममेव ॥१५॥

हृष्यदिति । वंशीस्वनश्रवणात्यन्तविवशतया समागतानां प्रियस्य रूक्षतया मनाग्विमनस्कानां तासां मध्ये काचित्प्रखरा ललितादितदिङ्गितज्ञा निजागमनप्रसन्नं तमाह—हृष्यदिति । अङ्ग हे, एकां रसज्ञां विना तव अङ्गमङ्गमधर्ममेव धर्मं वदतीति सम्बन्धः । नवरसज्ञेति सोल्लुण्ठनं सम्बोधनं विपरीतलक्षणया तत्प्रतियोगिनमेवार्थं व्यञ्जयति । कथंभूतस्य तव—हृष्यच्चकोरनयनस्य हृष्यन्तौ चकोराविव नयने यस्य अर्थादस्मदवलोकनेनैव । अत्र नयनयोश्चकोररूपकेणात्मवदनस्य चन्द्रत्वारोपः । पुनः कथंभूतस्य—हसन्मुखस्य, हसत् मुखं यस्य, अत्र मुखशब्देन निजोक्तीनां रूक्षार्थज्ञानेन तासां हृदि वैमनस्यं स्यादिति शङ्कया मुखमेव हसति न तु हृदयमिति ध्वनितम् । पुनः कीदृशस्य—नृत्यद्भ्रुवो नृत्यन्त्याविव भ्रुवौ यस्येति निशि निर्जनेऽस्मदागमनं विलोक्येत्यर्थः । आनन्दाधिक्येन भ्रुवोश्चाञ्चल्यं नृत्यत्वेनोत्प्रेक्षितम् । कथम्भूतमङ्गम्—माधुर्यरङ्गं माधुर्यस्य लावण्यविशेषस्य रङ्गस्थलम् । अन्ये माधुर्य्येणानन्दिता भवन्ति; अत्राङ्गे माधुर्यमपि परमानन्देन नृत्यतीति ध्वनितम्; तेन चाङ्गानां परमरमणीयत्वमित्यनुध्वनिः । भूषणभूषणाङ्गमितिवत् । वहिस्तव रसनैव 'भर्तुः शुश्रूषणम्' इत्यादि धर्मं वदति । तव अङ्गमङ्गं तु हर्षादिभिरनुभावैरत्रावस्थानलक्षणमधर्ममेव वदति । अत्र रसज्ञापदेन परिकराङ्कुरेण वहिर्नीरसार्थाविर्भावेऽपि अन्तः सरसार्थमयत्वं व्यज्यते, तस्या रसज्ञात्वात् । वही रूक्षार्थमयीनामपि तदुक्तीनां रसिकै रसमयप्रार्थनारूपत्वेनैव व्याख्यातत्वात् । यद्वा, द्वाभ्यामेव रसज्ञपदाभ्यां धर्मोपदेशपूर्वकं "प्रतियात ततो गृहान्" इत्यादि रूक्षमयं वचनं नर्मणैवेति व्यज्यते । यतो नर्मणैव रसज्ञात्वसिद्धिः । तदुक्तं श्रीभगवतैव नर्मोक्तिमसहमानां श्रीरुक्मिणीं प्रति—

"त्वद्वचः श्रोतुकामेन क्ष्वेल्याचरितमङ्गने ।
मुखञ्च प्रेमसंरम्भस्फुरिताधरमीक्षितम् ॥
कटाक्षेपारुणापाङ्गसुन्दरभ्रुकुटीतटम् ।" इति ।

तथैवात्रापि सिद्धान्तरहस्यम् ॥१५॥

तदुक्तं श्रीगदाधरभट्टचरणैः—

"अधर्मधर्मादि चतुर्मुखोदितं
मातः कथं सम्प्रति सत्कृतं भवेत् ।
कष्टं मुखैरष्टभिरन्यथैव यत्
कंसद्विपः शंसति वंशनिःस्वनः ॥" इति ।

वंशस्वनश्रवणसञ्जातोत्कलिका काचित्कृष्णानुरक्ता धर्ममुपदिशन्तीं कामपि सोपपत्तिकमाह—अधर्मधर्मादीति । चतुर्मुखोदितं मुखचतुष्टयालङ्कृतेन ब्रह्मणेति परिकराङ्कुरः । उदितमुक्तं वेदपुराणादिद्वारेण कथितम् ।

"ऋग्यजुःसामाथर्वाख्यान् वेदान् पूर्वादिभिर्मुखैः ।
.... ससृजे प्रियदर्शनः ॥"

इति भागवतोक्तेः । हे मातः कष्टं सम्प्रति इदानीं सत्कृतमादरणीयं कथं भवेत्, यद् यस्मात् कंसद्विपः श्रीकृष्णस्य वंशीनिस्वनो मुरलीरवोऽन्यथैव तदुक्तधर्माधर्मयोर्विपर्ययं शंसति सश्लाघं कथयति । लोके बहुमुखोद्गीतं वचः प्रमाणं भवतीति सिद्धमयमष्टभिर्मुखैस्तथा कथयन् चतुर्मुखोदितं प्रसिद्धं धर्माधर्मादिनिश्चयं व्यर्थयतीत्यर्थः । अतस्त्वया बहुशो निरूपितमपि तत्कथं करोमीति ध्वनिः । तदुक्तमथास्य वेणुकमेव करिष्यामीत्यर्थः ॥

यथा वा—

वेण एव समभूदथवेणु-
र्यो बलाद्वदति धर्ममधर्मम् ।
व्रीडयेव विदिताऽसदुदन्तः
स्वाभिधानमपिधातुमुदन्तः ॥१६॥

वंशीस्वनश्रवणनिरस्तधैर्या कापि गोपसती स्वसखीं प्रत्याह—वेणु एवेति। वेणो नाम अङ्गतनयो राजा धर्मलोपकृत् प्रसिद्धः पूर्वमासीत्, स एव सम्प्रति वेणुनामा समभूदिति गम्योत्प्रेक्षा। ननु वेणवेणवोरकारोकारकृतो महान् भेदस्तत्राह—लोकेपि विदितो विख्यातोऽसन् निन्दित उदन्तः पूर्ववृत्तं यस्य सः, अत एव व्रीडया लज्जयेवेत्युत्प्रेक्षा। स्वाभिधानं निजं नाम अपिधातुमाच्छादयितुमुदन्त उकारान्तो बभूवेति शेषः। अत इदानीमत्र वेणो राज्यमतस्तदुक्तमेव करणीयमिति ध्वनिः। तदर्थं यत्नमाचरेत्यनुध्वनिः। "वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः" इत्यमरः। एवमत्र पद्यत्रये मधुररतिकृतोऽयं धर्माधर्मयोर्विपर्ययः स्फुट एव ॥१६॥

यथा वा—

मातर्मम कुमारोऽयं सुकुमारो दुराग्रहः।
वैरिणा शिक्षितः केन कर्तुमेकादशीव्रतम् ॥१७॥

पुत्रेऽतिवत्सला व्रजेश्वरी गोकुले सर्वानेव व्रतपरानवलोक्य शैशवेनैकादशीव्रताय कृतपरमाग्रहं सुतं शिक्षयन्ती कामपि समानवयसमकस्मादागतां तत्र साक्रोशमाह—मातरिति। स्पष्टमन्यत् ॥१७॥

यथा वा—

सुगन्धतैलतप्तोदैः कुरु स्नानं गृहे सुखम्।
[1]वकोटसङ्कटं कृष्ण मा याहि यमुनातटम् ॥१८॥

सखीभिः सह श्रीयमुनायां विहरिष्यन्तं दुराग्रहं स्वसुतवत्सलरसाक्रान्तमानसा व्रजेश्वरी तमेव साम्ना समुपदिशति—सुगन्धतैलतप्तोदैरिति। स्पष्टमन्यत्। एवं पद्यद्वयेऽपि वत्सलरतिकृतोऽयं

१—बकाः कह्लाख्याः पक्षिणः, उटानि तृणानि तैः सङ्कटं सबाधम्। यद्वा, बकाः कुसुमतरुविशेषास्तेषामुटानि पर्णानि तैः सङ्कटं व्याप्तम्।

तयोर्विपर्ययः स्फुट एव । अत्रोदाहरणान्तरापेक्षा चेद्दशमे श्रीरास-पञ्चाध्याय्यां व्रजसुन्दरीः प्रति भगवद्वचनेषु 'भर्तुः शुश्रूषणम्'इत्यादि पद्यानां श्रीवैष्णवतोषिण्यां श्लेषार्थोऽनुसन्धेयः ॥ १८ ॥

यत्रासत्यमेव सत्यम् । तदुक्तं श्रीगर्गेण—

"प्रागयं[1] वसुदेवस्य क्वचिज्जातस्तवात्मजः" । इति ।

तथा—

"तस्मान्नन्दात्मजोऽयं ते नारायणसमो गुणैः ।
श्रिया कीर्त्यानुभावेन गोपायस्व समाहितः" ॥ इति ।

प्रागिति । अत्रेश्वरत्वेन वसुदेवात्मजत्वेन च जानतोऽतो मुने-र्गर्गस्य 'प्राग्' इति, 'तवात्मज' इति, 'तस्मान्नन्दात्मजोऽयन्ते' इति, 'गुणैर्नारायणसमः, किन्तु नारायणो नेत्यर्थः' इति, 'गोपायस्व समाहितः' इत्युक्तयः सत्येतरा एव । अत्र निदानं कृष्णविषयकं प्रेमैवेति ॥

तथा श्रीशुकः—

"एके तमनुरन्धाना ज्ञातयः पर्युपासते" । इति ।

एक इति । एके मुख्या अक्रूरादयः कृष्णभक्ता इति सनातन-चरणैर्व्याख्यातत्वादत्र कृष्णभक्तस्याक्रूरस्य कंससेवकस्य कपट-कृतत्वेनासत्यत्वमेव । तच्च कृष्णविषयकप्रेमकृतम् । अन्यथेतर-यादवानामिव तस्याप्यन्यत्र गमने भगवत्प्रादुर्भावसुखश्रवणं तदानी-मेव न स्यादिति प्रस्फुटमेव ॥

[1]-प्रागयं वसुदेवस्य क्वचिज्जातस्तवात्मजः ।
वासुदेव इति श्रीमानभिज्ञाः संप्रचक्षते ॥
[भा० स्क० १० अ० ८]

तदुक्तं भगवता व्रजेश्वरीं प्रति—

"नाहं भक्षितवानम्ब सर्वे मिथ्याभिशंसिनः ।
यदि सत्यगिरस्तर्हि समक्षं पश्य मे मुखम् ॥" इति ।

नाहमिति । अत्र कृतमृद्भक्षणस्य श्रीकृष्णस्य मातरं प्रति वाक्यं नाहमित्युक्तिरसत्यैव । सा च मातृविषयकसंभ्रमप्रीतिकृता । यदि च सखाय एवाकृतमृद्भक्षणेऽपि कृष्णे मिथ्याभिशापमर्पयितुमुद्यतास्तथाऽब्रुवन् तर्हि तेषां तदसत्यवचनं सख्यरतिकृतमेवेत्युभयथा असत्यमेव सत्यम् ॥

तथा व्रजकन्यकाः प्रति—

"न मयोदितपूर्वं वा अनृतं तदिमे विदुः ।
एकैकशः प्रतीच्छध्वं सहैवोत सुमध्यमाः ॥" इति ।

न मयोदितेति । अत्र मुक्तास्तास्तथैवागता वीक्ष्य दातुं प्रतिज्ञातं वस्त्राद्यदत्वैव पुनः "यूयं विवस्त्रा" इत्याद्युक्त्या पूर्ववाक्यस्यासत्यत्वमेव । एतच्च कृष्णस्य तद्विषयकरतिकृतम् ॥

तथा व्रजसुन्दरीः प्रति—

"स्वागतं[1] वो महाभागाः" इत्यादि ।

स्वागतमिति । "स्वागतं वो" इत्यारभ्य "प्रतियात ततो गृहान्" इत्यन्तेन ग्रन्थेन तासां ससंरम्भमुखनिरीक्षणाद्यर्थं कृष्णेनानृतमेवोक्तम् । तद्ग्रन्थसामान्यव्याख्याने शृङ्गाररसगलच्छेदापत्तिः, तस्माच्छृङ्गाररससर्वस्वस्य तस्य रूक्षतयोक्तिर्विपरीतलक्षणया रसपोषिका; अतोऽनृतमेवेति ॥

१—स्वागतं वो महाभागाः प्रियं किं करवाणि वः ।
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम् ॥
[भा० स्क० १० अ० २९]

तथैवोक्तं ताभिः—

"मैवं[1] विभोऽर्हति भवान् गदितुं नृशंसम्" इत्यादि।

व्रजसुन्दरीणामपि मैवं विभोऽर्हतीत्याद्युक्तयोऽपि तथैव। साहजिकोऽर्थस्तु रसाभासापादकतया रसिकैर्नाङ्गीकृतः। रसपोषकतयैव तैर्बहुधा आख्यातत्वात्।

तथैवोक्तम्—

"दैन्यं यदि प्रेयसि सुन्दरीणां
धिग् जीवितं तत् कुसुमायुधस्य।" इति॥

तथोक्तं श्रीवसुदेवेन नन्दं प्रति

"दिष्ट्या भ्रातः प्रवयस इदानीमप्रजस्य ते।
प्रजाशाया निवृत्तस्य प्रजा यत् समपद्यत॥" इति।

दिष्ट्येति। अत्र प्रवयसस्ते प्रजा समपद्यतेति दिष्ट्या भद्रं जातमित्युक्तिः सत्यप्रतियोगिन्येव, "प्रसक्तधीः स्वात्मजयोः" इति पूर्वं शुकोक्तेः॥

पुनस्तेनैवोक्तं कंसं प्रति—

"पुत्रान्[2] समर्पयिष्येऽस्या यतस्ते भयमागतम्।" इति।

पुत्रानिति। अत्र वसुदेवेन "सुता मे यदि जायेरन्" इत्यादि

१—मैवं विभोऽर्हतिभवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयान् तव पादमूलम्।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथादिपुरुषो भजते मुमुक्षून्॥
[भा० स्क० १० अ० २९]

२—न ह्यस्यास्ते भयं सौम्य यद्वै साहाशरीरवाक्।
पुत्रान् समर्पयिष्येऽस्या यतस्ते भयमागतम्॥
[भा० स्क० १० अ० १]

विचार्य 'पुत्रान् समर्पयिष्ये' इत्याद्यनृतमेवोक्तम्, कंसेप्सितपुत्रस्यादानात्।

तथैव श्रीदेवक्योक्तम्—

"नन्वहं ते ह्यवरजा दीना हतसुता प्रभो।
दातुमर्हसि मन्दाया अङ्ग मां चरमां प्रजाम् ॥" इति।

नन्वहमिति। स्पष्टम्। पद्यत्रयेऽपि वत्सलरतिकृतोऽयं व्यत्ययः॥

यथा वा—

दत्वा विदित्वा खलुतानपि स्वयं
नृशंसकंसाय पुरा यदर्जितम्।
कृष्णानुरक्तानकदुन्दुभेरहो
बभूव सत्यं तदसत्यसाधनम् ॥१९॥

दत्वेति। अत्र कृष्णानुरक्तस्यानकदुन्दुभेः स्वजन्मनि देवैर्वादितानकदुन्दुभित्वेनात्मनो भाविभगवदवतारं विदित्वा हिंसकाय कंसाय सुतान् दत्वापि यत्सत्यमर्जितं तदुक्तम्—"सोऽनृतादतिविह्वलः" इति। तद्देवक्या अष्टमगर्भजन्मनि पूर्वमेव स्वकर्तव्यतया विचारितं कृष्णगोपनादिलक्षणं यदसत्यं तस्य साधनं बभूव, तेन तत्साधयामासेत्यर्थः। तत्र हेतुः कृष्णानुरक्त इति॥ १९॥

यथा वा—

राधे मैं हूँ मोहिता पोहि सूत्रे
जो मैं दीनी तोहि सा मौक्तिकस्रक्।
स्पृष्टा दीसी मञ्जुमूंगामयीसी
दृष्टा गुञ्जामालसी लालसीति ॥२०॥

वाग्विदग्धा काचित् सहचरी कान्तप्रेषितां वियोगिनो जीवनकर्पूरशालिकां गुञ्जामालिकां कान्ताकरेऽर्पयन्ती तत्समकालमकस्मादापतितां विपत्तासर्वां वञ्चयन्ती स्वप्रियसखीं प्रत्याह—राधे इति । मैं अहमर्पीत्यर्थः । अन्या काचिदीदृगद्भुतं दृष्ट्वा मोहिता भवेदित्यपिशब्दार्थः । स्पष्टमन्यत् । देवमानुषभाषाशावल्यमत्र चित्रम् । तन्मधुररतिगर्भितस्य सख्यरतिकृतोऽयं तयोर्विपर्ययः ॥२०॥

यथा वा—

स्नेहाम्बुधीनां सुषमानिधीनां
विहाय गेहं विनयावधीनाम् ।
सुधाकरास्ये चल मानवत्या
नैवोपयास्ये भवनं भवत्याः ॥२१॥

स्नेहाम्बुधीनामिति । अत्र स्नेहाम्बुधीनामित्यादिविशेषणैः स्तुतिव्याजेन निन्दां विधाय, "मानवत्या" इति मानस्य स्नेहोत्तरकालोत्पन्नतया फलरूपत्वात् निन्दाव्याजेन स्तुतिं विधाय, "सुधाकरास्ये" इति सम्बोधनेन तन्मुखस्य स्वजीवनप्रदत्वमभिव्यज्य, "भवत्याः" इत्यादरविशेषमभिव्यज्य, भवनमुप समीपमपि नैव यास्ये इत्यत्रोपशब्दावधारणाभ्यां पूर्वोक्तलक्षणानां तासां गृहं विहाय तवैव भवनं यास्ये इति रसिकजनमनःप्रमोदपोषिकया विपरीतलक्षणया व्यञ्जितम् । अन्यथा मुख्यार्थकथने पद्यस्य नीरसत्वापत्तिः । पद्येऽस्मिन् मधुररतिकृतो विपर्ययः ॥ २१ ॥

यथा वा—

कान्तः कान्त्यैव कुरुते मदीयं हृदयं हरित् ।
कृष्णः किं नहि कण्ठस्थो महेन्द्रमणिनायकः ॥२२॥

कान्त इति । स्पष्टार्थमेव । मधुररतिकृतोऽत्रापि विपर्ययः ।

एवमेवाभिप्रेत्य प्रायो बह्वृचःश्रुत्या सत्यानृतव्यवस्थायां "पराग्वैतद्रिक्तमक्तरम्" इत्यादिना संस्तुतमनृतम्, निन्दितं सत्यम्; तथा तदर्थानुसारिणा भगवतोशनसा शिष्यसाम्राज्ये ममैवेदं सर्वमिति मतिमत्ता अत एव तत्र रतिमत्ता [दर्शिता, तथा ?] अष्टमस्कन्धे भागवते वामनाय वसुमतीं वितरितुमुद्यतं वैरोचनं प्रत्युपदिष्टम्। यथा—

"सत्यं पुष्पफलं विद्यादात्मवृक्तस्य जीवतः।
वृक्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः॥"
"पराग्रिक्तमपूर्णं वा अक्तरं यत्तदोमिति"

"तद् यत् किञ्चोमिति ब्रूयात्तेन रिच्येत वै पुमान्" इत्यादि। यत्तु महाभागवतेन तेन तद्वचनमनादृत्य तस्मै मही दत्तैव, तत्तु यत्राधर्म एव धर्म इत्यस्योदाहरणं ज्ञेयम्, वेदगुरुवचनानादरस्य धर्मस्याधर्मरूपत्वात्॥ २२॥

यत्रानाचार एवाचारः। तथा च श्रीशुकः—
"[1]काश्चिद्भन्त्योऽपास्य भोजनम्" इति।

काश्चिदिति। अत्र भोजनमपास्य चलितानां तासामाचमनानवकाशादनाचान्ता एव गता इति गम्यते, ततश्च तथा गमनमनाचार एव। स च निजनगरे मधुररत्या आचारत्वेन स्थापितः।

तथा तत्रैव—
"बिभ्रद्वेणुं जठरपटयोः शृङ्गवेत्रे च वामे
पाणौ बिभ्रन्मसृणकमलं तत्फलान्यङ्गुलीपु।

१—परिवेषयन्त्यस्तद्धित्वा पाययन्त्यः शिशून् पयः।
शुश्रूषन्त्यः पतीन् काश्चिदश्नन्त्योऽपास्य भोजनम्॥
[भा० स्क० १० अ० २९]

तिष्ठन्मध्ये स्वपरसुहृदो हासयन्नर्मभिः स्वैः
स्वर्गे लोके मिषति बुभुजे यज्ञभुग् बालकेलिः ॥" इति ।

विभ्रद्वेणुमिति । अत्र सखिमण्डले उत्थितस्य वामहस्ते निहित-दध्योदनस्य कृष्णस्य तथा भोजनं स्फुट एवानाचारः । स च सहचर-विषयककृष्णप्रेमकृतः । उपविश्य भोजने निजमुखावलोकनाभावात् सखीनां भोजनं सम्यक् न सम्पद्येतेति ॥

पुनस्तत्रैव—
"सर्वे मिथो दर्शयन्तः स्वस्वभोज्यरुचिं पृथक् ।
हसन्तो हासयन्तश्चाभ्यवजह्रुः सहेश्वराः ॥" इति ।

सर्वे इति । अत्रान्योन्यमुच्छिष्टभोजनं प्रकट एवानाचारः । सोऽपि सख्यरतिकृत एव ॥

यथा वा—
प्रेम्णा विशिष्टमुच्छिष्टं मुक्ताफलचतुष्टयम् ।
कृता रामेण भक्तानां शवरी [1]कचरीमणिः ॥२३॥

प्रेम्णेति । अत्र रामेण शवरी भक्तानां कवरीमणिः कृतेति योज्यम् । तत्र हेतुः प्रेम्णा विशिष्टत्वमेव । स तु दास्यरतिकृतः ॥२३॥

यथा वा—
कृष्णं सतृष्णमत्युष्णं पायं पायं स्वयं मुहुः ।
लीलामुग्धं पाययति दुग्धं सप्रेम गोपिका ॥२४॥

कृष्णमिति । अत्र कृष्णं बाल्येनात्युष्णमजानन्तमतः सतृष्णं पातुमतितरलमपि प्रेम्णा स्वयं पायं पायं पीत्वा पीत्वा शीतलं

१—कवरीमणिः शिरोरत्नम् ।

विज्ञाय दुग्धं पाययति। पातेर्विकर्मकत्वम्। अनाचारोऽत्र स्पष्ट एव। तत्र हेतुः सप्रेमतैव, स च वत्सलरतिकृतः ॥२४॥

यथा वा दशमे—

"इति त्रिलोकेशपतेस्तदात्मनः
प्रियस्य देव्यश्रुतपूर्वमप्रियम्।
आश्रुत्य भीता इति जातवेपथु-
श्चिन्तां दुरन्तां रुदती जगाम ह ॥" इति।

इतीति। अत्रान्ते हेत्यव्ययम्—आचारातिक्रमे इति सनातनचरणैर्व्याख्यातत्वादनाचारः स्पष्ट एव। स च कृष्णस्य रुक्मिणीविषयकसमञ्जसरतिकृतः, मुनीन्द्रस्य तु रतिविशेषकृतः ॥

तथोक्तं श्रीरूपगोस्वामिचरणैः—

"कदा बिम्बोष्ठि ताम्बूलं मया तव मुखाम्बुजे।
अर्प्यमानं व्रजाधीशसूनुराच्छिद्य भोक्ष्यते ॥" इति।

कदेति। अत्र बिम्बोष्ठीति सम्बुद्धिः कृष्णस्य बिम्बतुल्याधरमिलनलालसां बोधयति। ताम्बूलं तद्वीटिकाम्। व्रजाधीशसूनुः श्रीनन्दनन्दनः। अत्र लालसामधुररतिकृतोऽयं विपर्ययः ॥

यथा वा—

सद्भिः स क्रियया सेव्यः स कृष्णप्रियया पुनः।
प्रेम्णा सगर्वितं दत्तमत्ति ताम्बूलचर्वितम् ॥२५॥

सद्भिरिति। अत्रानाचारः स्पष्ट एव। "गण्डं गण्डे संदधत्याः प्रादात्ताम्बूलचर्वितम्" इत्यन्तस्य पद्यस्य रसिकोत्तमानां पद्यानुरोधात् प्रकर्षेण स्वयं प्रादादगृह्णादिति व्याख्यानमेवात्र प्रमाणम्, अतो नाधिकं वितन्यतेऽस्माभिर्विस्तरभिया ॥२५॥

यथा वा—

गृहीतार्द्धं दद्भिः सरभसमुभाभ्यामुभयतो
यदाच्छिद्यादातुं रहसि न च हातुं प्रभवतः।
प्रियौ पश्य प्रेम्णा प्रियसखि तथैवाथ शनकै-
र्दधाते ताम्बूलं दशनवसनाश्लेषरसिकौ ॥२६॥

गृहीतार्द्धमिति। कदाचित् काश्चित् प्रियसख्यः कलिन्दकन्यकाकूलमञ्जुलवञ्जुलकुञ्जमन्दिरान्तर्विशङ्कं विहरतोः कयोरपि गौरश्यामसुन्दरयोः कामकेलिकलाकलापकौशलं जालरन्ध्रैर्निभृतमवलोकयन्त्योऽपि प्रेमरसोत्सेकाद्वचसापि तत्परस्परं शनैरास्वादयन्त्यस्तयोः परमप्रणयावधित्वं व्यञ्जयन्ति—गृहीतार्द्धमिति। हे सखि! एतौ प्रियौ त्वं पश्येति सम्बन्धः। बह्वीष्वपि तासु एकवचनान्तमिकेयं सम्बुद्धिर्द्वयोर्द्वयोरेव द्रष्टृदर्शयितृत्वं श्रोतृवक्तृत्वञ्च बोधयति। तत्र प्रियपदं त्वं मे परमप्रेमपात्रं सखीति त्वामेव दर्शयामि, त्वया अन्यस्याः कस्याश्चित् पुरतो नैव वर्णनीयमपीति बोधयत्तयोः प्रेमविलाससललामानां सुगोप्यत्वं व्यञ्जयति। कर्मपदन्तु तयोः पारस्परिकं प्रणयातिशयं बोधयत् तत्प्रेम्णां जातिप्रमाणाभ्यां तुल्यत्वं व्यञ्जयति। क्रियापदमपि तत्केलिकौतुकं दर्शनीयमेव न तु वचनगोचरतां यातीति बोधयत्तस्याद्भुततमत्वं व्यञ्जयति। रहसीति—विशङ्कत्वे हेतुः, एकान्तं विना तथात्वासिद्धेः। उभाभ्यां प्रियाप्रियाभ्यां सरभसं ससम्भ्रमं दद्भिर्निजदशनैरुभयतः पूर्वोत्तरतो गृहीतार्द्धं गृहीतावर्द्धो यस्य तत्ताम्बूलमर्थात् ताम्बूलवीटिकामेकाम्। अथाधुनापि तथैव शनकैरेव न तु छिन्नत्वशङ्कया बलेन दधाते धारयतः। अत्रात्मनेपदं तथा धारणफलस्य सुखविशेषस्यात्मगामित्वं विशदयति। यद् यत आच्छिद्य छित्वा अर्थात् ताम्बूलार्द्धमादातुं ग्रहीतुं तथा हातुं सर्वमेव त्यक्तुञ्च न प्रभवतोऽनीशावित्यर्थः। तत्र हेतुगर्भविशेषणम्—दशनवसनाश्लेषरसिकाविति। दशनवसनयोरधरयोर्य आश्लेषस्तदेकसमयसहजसिद्धं मिलनं

तत्र रसिकौ रसविदौ तदनुभवानन्दलालसत्वादिति भावः। तथा ग्रहणे, तथा धारणे, आदानत्यागानीशत्वे च प्रेम्णोऽतिजागरूकत्वमेव निदानम्। मधुररतिकृतोऽयं तयोर्विपर्ययः स्फुट एव। एतदेवाभिप्रेत्य प्रायः स्मृतिरप्याह—"स्त्रीमुखं सर्वदा शुचि" इति ॥ २६ ॥

यत्रानादर एवादरः।

तथा च श्रीव्रजेश्वरी—

"[1]कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः"। इति।

कस्मादिति। अत्रादान्तात्मन्नित्यनादरः स्पष्टः। स च वत्सलरतिकृतत्वाद्वत्सलरसाभिज्ञजनैकवेद्यपरमस्नेहमयत्वात्परमादरादधिकः॥

तथाह श्रीशुकः—

"कृतागसं तं प्ररुदन्तमक्षिणी
कषन्तमञ्जन्मषिणी स्वपाणिना।
उद्वीक्षमाणं भयविह्वलेक्षणं
हस्ते गृहीत्वा भिषयन्त्यवागुरत् ॥" इति।

कृतागसमिति। अत्रावागुरदभर्त्सयदित्यनादरः स्पष्ट एव॥

पुनः स एव—

"तं मत्वात्मजमव्यक्तं मर्त्यलिङ्गमधोक्षजम्।
गोपिकोलूखले दाम्ना बबन्ध प्राकृतं यथा ॥" इति।

तं मत्वेति। अत्र स्पष्ट एवानादरो बन्धनरूपः। उदाहरणत्रये वत्सलरतिकृतोऽयमनादरः॥

१—कस्मान्मृदमदान्तात्मन् भवान् भक्षितवान् रहः।
वदन्ति तावका ह्येते कुमारास्तेऽग्रजोऽप्ययम् ॥
[भा० स्क० १० अ० ८]

पुनरपि स एव—

"एका भ्रुकुटिमाबध्य प्रेमसंरम्भविह्वला ।
घ्नन्तीवैक्षत्कटाक्षेपैः संदष्टदशनच्छदा ॥" इति ।

एकेति । अत्रापि स्पष्ट एवानादरः ॥

तथा च दशमे व्रजदेव्यः—

"मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्मा
स्त्रियमविकृतरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वाऽवेष्टयद् ध्वाङ्क्षवद्यः
तदलमसितसख्यैर्दुस्त्यजः तत्कथार्थः ॥" इति ।

मृगयुरिवेति । अत्रातिस्पष्ट एवानादरः, तदलमसितसख्यै-रिति तत्प्रणयकोपोक्तेः ॥

तथा—

"यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्यां चरन्ति ॥" इति ।

यदनुचरितलीलेति । अत्रापि प्रकट एवानादरः, भिक्षुचर्यां चरन्तीत्युक्तेः ॥

तथा—

"किं नस्तत्कथया गोप्यः कथाः कथयतापराः ।
यात्यस्माभिर्विना कालो यदि तस्य तथैव नः ॥" इति ।

किन्न इति। स्पष्ट एवानादरः। पद्यचतुष्टयेऽस्मिन् मधुररति-कृतोऽयमनादरः। अन्यत्तैर्व्याख्यातमेव॥

तथैवोक्तं श्रीजयदेवैः श्रीगीतगोविन्दे—

"याहि माधव! याहि केशव! मा वद कैतववादम्।
तामनुसर सरसीरुहलोचन! या तव हरति विषादम्॥" इति

याहीति। इयं समस्तैवाष्टपदी अनादरप्रचुरा। स चानादरो मधुररतिकृतः, तस्याः खण्डितोक्तिरूपत्वात्॥

तथैवोक्तं श्रीरूपगोस्वामिचरणैः—

"गोकुलकुलजरतीनां परुषा वागपि यथा प्रमोदयति।
स्तुतिरपि महामुनीनामवनतशिरसां सखे! न तथा॥" इति।

गोकुलेति। अत्र किञ्चिद्रसान्तरमिश्रितवत्सलरतिकृतोऽय-मनादरः कृष्णेनादरत्वेनैवाङ्गीकृतः॥

यथाह—

"नाथेति परुषवचनं प्रियेति दासेत्यनुग्रहो यत्र।
तद्दाम्पत्यमतोऽन्यन्नारी रज्जुः पशुः पुरुषः॥" इति।

नाथेति। अत्रानादरः स्पष्ट एव, दासेत्यनुग्रहो यत्रेत्युक्तेः॥

यथा वा कस्यापि—

"पर्यङ्कस्थितिरेव यत्र भवति प्रत्युद्गमप्रक्रिया
रे शब्दोपि भवत्पदप्रतिनिधिर्यत्र प्रसङ्गोदितः।
चेतस्तुष्यति यत्र लाभत इव द्रव्यस्य भूरिव्यया-
दद्वैतप्रतिपादकाय सुहृदोः स्नेहाय तस्मै नमः॥" इति।

पर्यङ्कस्थितिरिति। स्पष्टमेतत्॥

यथा वा—

तावन्मनो मदीयं शङ्काकुलमेव देवि ! दासेति ।

तव मृदु वचो न यावन्मानमनन्तर्गतं वदति ॥२७॥

तावदिति । अनुनीतामपि मानवतीमन्तर्निगूढमानतया अत्यादरवतीं प्रति रसिकशिरोमणिराह—तावन्मन इति । हे देवि ! यावद् 'दास' इति तव मृदु वचो मानमनन्तर्गतं हृद्गतं नेति न वदति, तावन्मदीयं मनः शङ्काकुलमेव । दासेत्युक्तिं विना त्वत्कर्तृकोऽयमादरः ममान्तःकरणे मानमेव व्यञ्जयतीत्यर्थः ॥२७॥

यथा वा—

यावत्कुलव्रतं हर्तुं यतेऽहं त्वन्मना मुनेः ।

तावत्त्वं गोप हरताद्धरतात्केलिकौशलम् ॥२८॥

यावदिति । स्पष्टमेतत् ॥२८॥

लीलालङ्कृतकाननश्चिरमसौ मात्रादिसम्माननः

किञ्चित्पिञ्जरिताननश्च भवतीमेति त्वदेकाननः ।

तत् किं तापकृशा सरोजसदृशा कर्णस्पृशा द्राग् दृशा

दूरादेव नृपाद्रियन्न सखि दृशां भङ्गीः कुरङ्गीदृशाम् ॥२९॥

कदाचित्काचिच्चतुरसहचरी कथमपि सायं श्रीवृन्दावनात् व्रजाभिमुखं दयितं दूरादेव दर्शयन्ती मनागात्मनस्तदिङ्गितज्ञतामपि व्यञ्जयन्ती प्रियतमवनगमनचिरविरहागाधासाधारणबाधापरवशतया कृशाङ्गीं श्रीराधां शनैः समाश्वासयति—लीलेति । पद्येऽस्मिन्नुत्तरार्द्धेऽपि एकदेशस्थितस्याद्यधारणस्यार्थचमत्कारसमर्थनार्थं दशधोपयोजनमनुसन्धेयम् । हे सखि ! असौ भवतीमेव पत्येव तत्तापकृशैव किमिति सम्बन्धः । तत्र सखीति सम्बुद्ध्या मिथः प्रीतिपात्रत्वं ध्वनितम् । ततस्त्वत्पुरतस्तथ्यमेव कथयामीत्यनुध्वनिः ।

तद् मम वचः सविश्रम्भमाकर्णयेति प्रत्यनुध्वनिः। असौ व्रजनवयुवराज इत्यङ्गुल्या निर्दिशति। भवतीमेव नेतरां प्रति, त्वामित्यनुक्त्वा भवतीमिति सादरोक्तिस्तस्याः प्रेमवयःशीलरूपलावण्यौदार्यचातुर्यायनन्तकल्याणगुणसम्पन्नतां व्यञ्जयति। एत्येव न संशयः, एतीति वर्तमानप्रयोगस्तु प्रियतमसङ्गमस्यातिशयसामीप्यं व्यञ्जयति, "वर्तमानसामीप्ये वर्तमानवद्वेति" स्मरणात्। ततस्तापेन विरहजेन त्वं कृशैव न प्रसादविकसद्वदना किं कथमिति प्रश्नान्ते वाक्यसमाप्तिः। असीति क्रियापदमाक्षेपलब्धं बोद्धव्यम्। भवतीमित्येवेत्यत्र हेतुगर्भविशेषणम्—यतस्त्वदेकाननस्त्वमेव एका, एकं मुख्यमद्वितीयं वा अननं जीवनं यस्येति, त्वदेकजीवनत्वादित्यर्थः। तत्र स्फुटमेवानुभावं दर्शयन्ती आह—किञ्चित्पिञ्जरितानन इति। चकारः पूर्वोक्तविशेषणसमुच्चयार्थः। किञ्चिन्मनाक् पिञ्जरितं पीतत्वं प्राप्तमाननं यस्य सः, त्वद्विरहेणैवेत्यभिप्रायः। नन्वेवं चेत्तर्हि मामपास्य अनुदिनमसौ किमिति वनमेव यातीत्यपेक्षायां पुनर्विशिनष्टि—लीलालङ्कृतकानन इति। चिरं बहुकालं लीलाभिः परमाद्भुतानन्तविविधमधुरकेलिभिरलङ्कृतं सद्यः समुदयद्दलकिसलयाङ्कुरकुसुमफलभरावनतविटपलताविटपिभिः, तथा मदमुदितमृदुनदच्चातकचकोरशुकपिकादिभिः पतत्त्रिभिः, तथा अरुणतरचरणसरसिजसंसर्गसमसमयमेव समुदयदङ्कुरनिकरहरिण्याध्वधरण्या, हरिण्यादिस्वस्वयितानुगैर्विविधहरिणादिभिश्च भूषणैरिव प्रसाधितं काननं श्रीवृन्दावनं येन स तथेति। निज गोगणजीवातुकत्वात्परमप्रीतिविषयस्य श्रीवृन्दावनस्य तथा शोभावितरणे श्रीवृन्दावनेन्द्रस्य नवजलधरसुन्दरस्य श्रीवृन्दावनचन्द्रस्य तस्यावश्यकमिति प्रत्यहं तत्रोदयमेतीति ध्वनिः, तदुदयं विना तदसिद्धेः। ननु तर्हि तूर्णं किमिति नायातीत्यत आह—चिरं मात्रादिसम्मानन इति। चिरपदं देहलीदीपन्यायेनोभयत्र योज्यम्। वत्सले मातुरेव प्राधान्याद् मात्रादीन् यशोदानन्दादीन् व्रजौकसः प्रेम्णा प्रत्युद्गतान् सम्यग् यथोचितं मानयति सत्करोतीति

तथा। इति शीलविनयादिगुणनिधेस्तस्य गुरुजनसत्कारस्यावश्यकत्वात् तत्र तत्र तद्वचयन्मन्दमन्दमेवायातीति ध्वनितम्। ननु तर्हि इतस्ततः समागता लतारन्ध्रनिहितनयनास्ता सादर किमवलोकयन्तीत्यपेक्षायां विशेषणान्तरपयसा तदीर्ष्यापावकं निर्वापयति—कुरङ्गीदृशामिति। कुरङ्गीनां दृश इव दृशो यासां तास्तासामपि अत्र कुरङ्गीदृशामिति पदं सौन्दर्यातिशयाभिव्यञ्जकत्वेन तासां स्तुतिपरमपि तन्नयनयोः कुरङ्गीदृगुपमेयत्वेन चातुर्यांशराहित्यमभिव्यज्य आत्मनः प्रकरणोपयोगि तन्निन्दापरमत्वमेवाभिव्यञ्जयति, कुरङ्गीनां पशुविशेषत्वात्। तासामपि दृशां नेत्राणां भङ्गीरवलोकनकलाकौशलानि शोणप्रान्ततया विशालतया च सरोजसदृशा कमलतुल्यया न तु त्वदनुभूतखेलनखञ्जरीटसदृशया कर्णस्पृशा कर्णौ स्पृशतीति तथा तया निजकर्णस्पृशैव न त्वद्वदनस्पृशा, एवंविशेषणविशिष्टया दृशैव न मनसा, द्रागेव न चिरम्, दूरादेव नान्तिकात्, मृषैव न तथ्यतया, आद्रियन्नादरमात्रस्यैव विषयीकुर्वन्, न स्पृहयन्निति दृशाद्यवधारणोपयोगः। अतस्त्वं प्रसादसुमुखी प्रसाधनप्रासादमासाद्य प्रसाधनसाधनाय मामाज्ञापयेति ध्वनिः। पद्येऽस्मिन् पूर्वार्द्धे प्रेम्णः प्रच्छादनेनातिवृद्धये जातिप्रमाणाभ्यां परमोन्नतानुरागालङ्कृतायास्तस्यास्तत एव तादृग्विधानुरागालङ्कृतस्य अचिरात्तदन्तिकगमनलालसानन्दितमनसोऽपि नेतुः श्रीनन्दनन्दनस्य सस्पृहमनवलोकनादिलक्षणोऽनादर एवादरः। पुनरुत्तरार्द्धे जातिप्रमाणाभ्यामुन्नतप्रणयवतीनामपि तासां प्रेम्णः प्रकाशनेनावृद्धये तत एव तादृग्विधप्रेमवतस्तदन्तिकागमनलालसालिङ्गितमनसोऽपि नेतुः श्रीनन्दनन्दनस्य सादरमवलोकनलक्षणः परमादरोऽनादर एवेत्यन्वयव्यतिरेकात्मकत्वात्पद्यस्य प्रकरणान्ते लिखनमनुसन्धेयम्।

"यद्वु वार्यते यतः खलु यत्र प्रच्छन्नकामुकत्वञ्च।
या च मिथो दुर्लभता सा परमा मन्मथस्य रतिः॥"

इति भरतोक्तेः।

"यत्त्वहं भवतीनां वै दूरे वर्ते प्रियो दृशाम्।
मनसः सन्निकर्षार्थं मदनुध्यानकाम्यया ॥
यथा दूरचरे प्रेष्ठे मन आविश्य वर्तते।
स्त्रीणां न तथा चेतः सन्निकृष्टेऽक्षिगोचरे ॥" इति भागवते श्रीभगवदुक्तेः,

"ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्"। इति गीतायां श्रीभगवदुक्तेश्च, सख्याः सख्यरतिपोषकोऽयमाविर्मधुरतिकृतो विपर्ययः ॥

यत्रासन्तोप एव सन्तोषः।
यथा तृतीये ब्रह्मणोक्तम्—
"अत्रोपसृष्टमिति चोत्स्मितमिन्दिरायाः
स्वानां धियां विरचितं बहु सौष्ठवाढ्यम्।
मह्यं भवस्य भवतां च भजन्तमङ्ग
नेमुर्निरीक्ष्य नवितृप्तदृशो मुदा के ॥" इति।

अत्रोपसृष्टमिति। अत्रासन्तोषः स्पष्ट एव शान्तिरतिकृतः, अवितृप्तदृशामित्युक्तेः ॥

यथा दशमे श्रीशुकः—
"सतामयं सारभृतां निसर्गो
यदर्थवाणीश्रुतिचेतसामपि।
प्रतिक्षणं नव्यवदच्युतस्य यत्
स्त्रिया विटानामिव साधु वार्ता ॥" इति।

सतामयमिति। अत्राप्यसन्तोषः स्पष्ट एव, प्रतिक्षणं नव्यवदच्युतस्येत्युक्तेः ॥

यथा—

"निवृत्ततर्षैरुपगीयमानाद्
भवौषधाच्छ्रोत्रमनोभिरामात् ।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात् ॥" इति ।

तथा च तत्रैव परीक्षितो निवृत्ततर्षैरित्युक्तवान् । अत्र स्वामिचरणैः "न कस्याप्यलं प्रत्ययः" इति व्याख्यातत्वादसन्तोषः स्फुटः, स च दास्यरतिकृतः ॥

यथाह सूतः—

"यद्यप्यसौ पार्श्वगतो रहोगत-
स्तथापि तस्याङ्घ्रियुगं नवं नवम् ।
पदे पदे का विरमेत तत्पदात्
चलापि यच्छ्रीर्न जहाति कर्हिचित् ॥" इति ।

यद्यपीति । अत्र समञ्जसरतिकृतोऽसन्तोषः स्पष्ट एव ॥

तथा शौनकः—

"वयं तु न वितृप्याम उत्तमश्लोकविक्रमे ।
यच्छृण्वतां रसज्ञानां स्वादु स्वादु पदे पदे ॥" इति ।

वयं त्विति । अत्रापि दास्यरतिकृतोऽसन्तोषः स्फुट एव ।

तृतीयेऽपि शौनकः—

"ता नः कीर्त्तय भद्रं ते कीर्त्तन्योदारकर्मणः ।
रसज्ञः को नु तृप्येत हरिलीलाऽमृतं पिबन् ॥" इति ।

ता न इति। अत्र प्रकट एवासन्तोषः। स च दास्यरतिकृत एव। एतत्पद्यषट्कं श्रीधरस्वामिचरणैर्व्याख्यातत्वान्न व्याख्यातम् ॥

यथा कस्यचित्—

"श्रीकृष्ण तव लावण्यं निजे वा स्तौमि लोचने।
यत् प्रतिक्षणसंवर्द्धि मे तदास्वानदायिनी ॥" इति।

श्रीकृष्णेति। कश्चित्परमप्रेमवान् श्रीकृष्णं पश्यन्नतृप्तस्तमेवाह अत्र प्रतिक्षणसंवर्द्धिलावण्यपानकृतोरपि लोचनयोः सर्वलावण्यसमावेशेप्यतृप्तिः प्रकट एवाऽसंतोषः ॥

यथा वा—

मम कृष्णातटसन्ततसङ्गतकृष्णाङ्गसङ्गमवासेः।
तदनुविचिन्तनकृष्णं मनः सतृष्णं सदा तदपि ॥३०॥

ममेति। कृष्णा यमुना तस्यास्तटे सन्ततं संगतस्य मिलितस्य कृष्णस्य अङ्गसंगस्य अवाप्तिर्यस्यास्तस्या मम मनस्तदपि सदा दर्शनाय सतृष्णमेव कथंभूतं मनः—तस्यैव श्रीकृष्णस्यैव अनु निरन्तरं यद्विचिन्तनं तेन कृष्णं श्यामं भृङ्गीकीटन्यायेन कृष्णाकारमेवेति भावः। इदं कस्याश्चित्प्रेमवत्या उद्धवं प्रति वाक्यम् ॥ ३० ॥

प्रश्नाविनय एव विनयः।

यथा श्रीशुकः—

"तां स्तन्यकाम आसाद्य मथ्नन्तीं जननीं हरिः।
गृहीत्वा दधिमन्थानं न्यषेधत्प्रीतिमावहन् ॥" इति।

तां स्तन्यकाम इति। अत्र गृहीत्वा दधिमन्थानं न्यषेधदिति प्रकट एवाऽविनयः ॥

तथा तत्रैव स एव—

"उलूखलाङ्घ्रेरुपरिव्यवस्थित-
मर्काय कामं ददतं शिचि स्थितम्
हैयङ्गवं चौर्य्यविशङ्कितेक्षणं
निरीक्ष्य पश्चात्सुतमागमच्छनैः ॥" इति ।

उलूखलाङ्घ्रेरिति । अत्र हैयङ्गवीनचौर्य्यं मर्कटेभ्यस्तद्दानञ्च धार्ष्ट्यलक्षणोऽविनय एव ॥

पुनस्तत्रैव स एव—

"संजातकोपः स्फुरितोरुणाधरं
संदश्य दद्भिर्दधिमण्डभाजनम् ।
भित्त्वा मृषाश्रुर्दृषदश्मना रहो
जघास हैयङ्गवमन्तरङ्गतः ॥" इति ।

संजातकोप इति । अत्रापि मातृविषयककोपदधिभाण्डस्फोटनाभ्यां प्रकट एवाविनयः । स च पद्यत्रयेऽपि कृष्णस्य मातृविषयकसंभ्रमप्रेमकृतः प्रीतिमावहन्नित्युक्तत्वात् ॥

यथोक्तं श्रीरूपगोस्वामिचरणैः—

"पत्नीं रत्ननिधेः परामुपहरन् पूरेण वाष्पाम्भसां
रज्यन्मञ्जुलकण्ठगर्भलुलितस्तोत्राक्षरोपक्रमः ।
चुम्बन् फुल्लकदम्बडम्बरतुलामङ्गैः समीक्ष्याच्युतं
स्तब्धोप्यभ्यधिकां श्रियं प्रणमतां वृन्दाद्दधारोद्धवः ॥" इति ।

पत्नीमिति । अत्राकृतस्य सम्यक्स्तवस्य तथा जातस्तम्भतयाऽकृतनतेरुद्धवस्य अविनयः स्फुट एव, तथापि अश्रुपुलकस्वरभेद-

स्तम्भानामुद्दीप्तत्वात् प्रणमतां विनयवतामपि भक्तानां वृन्दात् श्रियं शोभां दधारेति दास्यरतिकृतः स्फुट एवाविनयः ॥

यथा वा—

विधृतमन्थनदण्डममुञ्चतः
सदरसादरविस्मितवीक्षितैः ।
जनकयोः कमनीयशिशोरभू-
दविनयो विनयादधिकप्रियः ॥३१॥

विधृतेति । अत्र कृष्णस्याविनयः पित्रोर्वत्सलरतिकृतः ॥ ३१ ॥

यथा वा—

न दधि बिन्दुमितं मुषितं मया
न मम सुन्दरि संवृणु कन्दुकम् ।
इति गृहीतकुचस्य शिशोरभू-
दविनयो विनयादतिसौख्यदः ॥३२॥

न दधीति । अत्र शिशोस्तस्य तासां वा मिथोनिगूढरतिकृतोऽयमविनयः ॥ ३२ ॥

यथा वा—

रचितरूक्षिमसंभृतचक्षुषो
रतिमतोः सदसज्जनसंसदि ।
मिलितयोः पिहितस्मितयोरभू-
दविनयो विनयादतिसौख्यदः ॥३३॥

रचितेति । अत्र तु रचितो यो रूक्षिमा न तु साहजिकः, तेन

संभृते पूर्णे चक्षुषी ययोस्तथा। सदसज्जनसंसदि सतामसतां च संसदि सभायां च मिलितयोरत एव विहितस्मिनयोः प्रियाप्रिययोरविनयो मधुररतिकृतः विनयादपि सौख्यदोऽभूदिति ॥ ३३ ॥

यत्रानलङ्कृतिरेवालङ्कृतिः।

यथा दशमे—

"काचिद्विपर्यग्धृतवस्त्रभूषणा
विस्मृत्य चैकं युगलेष्वथापरा।
कृतैकपत्रश्रवणैकनूपुरा
नाङ्क्त्वा द्वितीयं त्वपरा स्वलोचनम् ॥" इति।

काचिदिति। अत्र पुरवनितानां कृष्णविषयकरतिकृतेयमनलङ्कृतिः ॥

पुनस्तत्रैव—

"लिम्पन्त्यः प्रमृजन्त्योऽन्या अञ्जन्त्यः काश्च लोचने।
व्यत्यस्तवस्त्राभरणा काश्चित्कृष्णान्तिकं ययुः ॥" इति।

लिम्पन्त्य इति। लिम्पन्त्योऽङ्गरागं कुर्वन्त्य इत्यर्थः। अत्र व्रजसुन्दरीणां मधुररतिकृतेयमनलङ्कृतिरलङ्कृतेरधिका ॥

तथा कस्यचित्—

"साहजिकरूपवत्या वपुषि भवत्या विभूषणं भारः।
सर्वाङ्गसौरभिन्या दमनकवत्याः किमालि कुसुमेन ॥" इति

साहजिकेति। अत्र स्फुट एव तयोर्विपर्ययः। स चार्थान्तरन्यासेन दृढीकृतः ॥

यथा वा साहित्यदर्पणकृतोदाहृतं पद्यम्—

"विदूरे केयूरं कुरु करयुगे रत्नवलयं
न वा गुर्वी ग्रीवाभरणलतिकेयं किमनया ।
नवामेकामेकावलिमपि मयि त्वं न रचये-
र्न पथ्यं नेपथ्यं बहुतरमनङ्गोत्सवविधौ ॥" इति।

विदूर इति। अत्र कान्तायाः प्रियविषयकमधुररतिकृतेयमनलङ्कृतिः ॥

यथा वा कस्यचित्—

"वदने नववीटिकानुरागो नयने कज्जलमुज्ज्वलं दुकूलम् ।
इदमाभरणं विलासिनीनामितरद्भूषणमङ्गदूषणाय ॥" इति।

वदन इति। स्पष्टार्थानलङ्कृतिरत्र ॥

यथा वा—

यावकमम्बुजसुपदां हेमसुवपुषां च भूषणं हैमम् ।
खञ्जनमञ्जुलसुदृशामञ्जनमनुरञ्जनं मनसः ॥३४॥

यावक मिति। विरहविह्वलं श्रीकृष्णं विज्ञाय राधिकान्तिकमागत्य निजभूषणादिरचनया सविलम्बां तामुपदिशन्ती सत्वरमभिसारयति। स्पष्टमन्यत् ॥३४॥

यथा वा—

वलयविभूषितमेव करद्वयं
कलय कज्जलमुज्ज्वलमम्बरम् ।
अयि न दूषय देहमदूषणं
विफलमालि न भूषय भूषणम् ॥३५॥

वलयेति कस्यचिदत्रापि सैवावतारिका अर्थानलङ्कृतिः स्पष्टैव ॥ ३५ ॥

यथा वा—

चल सखि सत्वरमसुसममानन्दय सहजसुन्दरैरङ्गैः ।
भूषयसि भूषणं चेद् व्रजभूषणमेव किं न भूषयसि ॥३६॥

चल सखीति । अत्रापि तथैव ॥ ३६ ॥

यथा वा—

सुभग नवनवोद्यन्माधुरीभिर्धुरीणां
धृतिमनुनय कान्तामागतां तामवेहि ।
प्रियपरिजनवृन्दं दृष्टिभीत्येव तस्याः
सहजसुभगमङ्गं भूषणैरावृणोति ॥३७॥

सुभगेति । विरहविह्वलं श्रीकृष्णं राधिकान्तिकादागता सखी समाश्वासयति । भीत्येवेत्यत्र हेतूत्प्रेक्षा ॥ ३७ ॥

यथा वा—

किशोरकठिनां मतिं मणिसुवर्णभूपालात
विसृज्य गुणरागिणीं विसृज मञ्जुगुञ्जामपि ।
मयैव कलिता बलादधिनिकुञ्जमेकैव सा
भवद्गलविभूषणं भवतु मालती मालिका ॥३८॥

किशोरेति । विरहविह्वलां स्वसखीं ज्ञात्वा कथञ्चिद् विलम्बमानं कृष्णं सखी सत्वरमभिसारयति । अत्र यावकेत्यारभ्य हैममित्यन्तेन प्रियाप्रियविषयकसखीजनरतिकृतेयमनलङ्कृतिः ॥ ३८ ॥

यथा वा—

हैमं हेमगुणस्यूतमेकीभूतं तनुत्विषा ।
यथार्थनामतां याति गाङ्गेयाङ्गि तवाङ्गदम् ॥३६॥

हैममिति । अत्र अर्थानलङ्कृतिः स्पष्टा ॥३६॥

यथोक्तम्—

"नृपमिव निजकान्त्या राजितं राजकीया-
स्तदमितममतोद्यत्सम्पदा दर्शनीयाः ।
सहजसुभगमङ्गं भूपणश्रेण्योऽमूः
सखि तव तनुशोभाशोभिताः शोभयन्ति ॥" इति ।

नृपमिवेति । स्पष्टमेतत् ॥

यत्र स्त्रिय एव पुरुषाः ।

तथा च दशमे—

कृष्णोऽहं[1] पश्यत गतिं ललितामिति तन्मनाः ।

कृष्णोऽहमिति । स्पष्टार्थमेव । व्रजसुन्दरीणां कृष्णविषयकमधुर-रतिकृतोऽयं स्त्रीपुंसोर्विपर्ययः ॥

इत्यादीनि तत्प्रकरणे प्रायो बहूनि उदाहरणानि ।

तथा च जयदेवः—

"मधुरिपुरहमिति[2] भावनशीला" इति ॥

१—कस्यांचित्स्वभुजं न्यस्य चलन्त्याहापरानु ।
कृष्णोऽहं पश्यत गतिं ललितामिति तन्मनाः ॥
[भा० स्क० १० अ० ३०]

२—मुहुरवलोकितमण्डनलीला । मधुरिपुरहमितिभावनशीला ॥
नाथ ! हरे ! सीदति राधा वासगृहे ॥ ध्रुवम् ॥
[गीतगो० ६ सर्ग०]

यथा वा—

कान्ते कासीति सालापां प्रेमामृततरङ्गितैः ।
लुप्तस्त्रीप्रत्ययां पश्य कुञ्जे माधव ! माधवीम् ॥४०॥

विरहाधिक्येन ध्यानबाहुल्यात् कृष्णोऽहमिति भावनाविवशां गान्धर्विकामवलोक्य, शीघ्रमागत्य, काचित्सहचरी श्रीकृष्णमभिसारयितुं कौतुकमिव कथयति—कान्ते कासीति । हे माधव कृष्ण ! श्लेषेण मधुवंशोत्पन्नत्वात्प्रियत्वात् कठिनहृदयत्वं व्यञ्जितम्, पुनस्तेनैव पदेन श्लेषेण तथा विरहविवशां तामस्मरन्तं तं लोकोक्तिरीत्या वसन्तमपि स्मारयति । कुञ्जे एकान्ते, अतिशीघ्रं गमनावसरं बोधयति । माधवीं भवतः परमप्रेयसीं माधवीमिव माधवीमिति लुप्तोपमयाऽतिशयोक्त्यैव वा श्रीराधिकाम् । यद्वा, माधवीति राधिकाया नामैव, तदुक्तं सूचके श्रीकृष्णदासकविराजमहाशयैः—

"राधे ! माधवि ! माधवप्रियतमे ! गान्धर्विके !" इत्यादि ।

राधिकास्तुतो माधवीति तत्सम्बुद्धिदर्शनात् । पश्य अवलोकय अलं विलम्बैरित्यर्थः । अत्र माधवोपदेन तस्याः परममृदुलत्वं विरहतीव्रताया असहिष्णुत्वञ्च ध्वनितम् । ततः तूर्णमभिसरेत्यनुध्वनिः । त्वद्ध्यानाधिक्येन भृङ्गीकीटन्यायेन त्वत्स्वरूपतां प्राप्तश्चेत् तदा विप्रतिसारं भजिष्यसीति प्रत्यनुध्वनिः । कथंभूताम्—कान्ते राधिके त्वं क्वासि क्व गतासीति सालापां संप्रलपितम्; यतः प्रेमामृतस्य तरङ्गितैः तरङ्गैर्लुप्तोऽदर्शनं प्राप्तः स्त्रीप्रत्ययः (ङीप्) यस्याः सा ताम् ; तस्या माधव्याः स्त्रीप्रत्ययलोपे माधवरूपेणावस्थितामिति भावः । तथा श्लेषेण लुप्तो 'अहं स्त्री' इति प्रत्ययो ज्ञानं यस्याः सा 'राधिका अहम्' इति विस्मृत्य माधवम्मन्यामित्यर्थः । अत्र तरङ्गितपदेन प्रेमामृतस्य समुद्रत्वारोपः । मधुररतिकृतोऽयं विपर्य्यय इति भावार्थः स्पष्ट एव ॥४०॥

यथा वा—

दर्शनीयतममेव मृगादृशा
रूपमद्य यदवेक्ष्य दर्पणे ।
केलिकौशलवयोगुणाधिका
राधिका दयितभावमीहते ॥४१॥

दर्शनीयतममिति । कदाचित् काचित्सहचरी नवयौवनाविर्भावितनिजमाधुर्यातिशयमादर्शे विलोकयन्तीं तत्रासक्तिमतीं तदनुभावैरनुमीय अन्तरङ्गतया तदिङ्गितज्ञानातिदूरचरं रसिकशिरोमणिं तत्राभिसरणेनानन्दयितुं मिलितां सखीमाह—दर्शनीयतममिति । अद्य तस्या मृगादृशा रूपं दर्शनीयतममेवेति सम्बन्धः । अत्र तमप्प्रत्ययः सर्वथा दर्शनीयत्वं विशदयति । पुनरवधारणेन तु अहं वर्णयितुमनीशास्मीति ध्वनितम् । तस्यागोचरत्वमनुध्वनि । नयनशीतलीकरणाय रूपामृतजीवातुकेन भवता तत्र गन्तव्यमेवेति प्रत्यनुध्वनिः । मृगादृशा इति परिकराङ्कुरद्वारा नवयौवनोद्गमं स्वभावसुलभं नयनचाञ्चल्यविशेषं व्यञ्जयति । उपलक्षणं चैतन्मन्दस्मितमृदुभाषणादीनाम् । अद्येति पूर्वतोऽपि माधुर्यातिशयं बोधयति । तथापि किञ्चिद्वर्णयेति विज्ञप्तिमतीं समासेन तदाह—यद्रूपं दर्पणे आदर्शे प्रतिबिम्बितमवेक्ष्य तत्रासक्तिमती सती दयितवत् स्वयं तदुपभोगाय दयितभावं श्रीव्रजेन्द्रनन्दनसारूप्यमीहते वाञ्छति, स्वयमेव निजमाधुर्यस्य भोगानुपपत्तेः । तत्र हेतुगर्भं विशेषणम्—केलिकौशलवयोगुणाधिकेति । कामकेलिषु यत्कौशलं दाक्षिण्यं तथा वयसा नवतारुण्यस्य ये गुणाः प्रागल्भ्यादयः तैरधिका परिपूर्णेत्यर्थः, तत्तद्गुणाभिव्यक्तपूर्तैरिति भावः । अत्र स्वस्याप्यासक्तिरिति समासेन सखीं प्रति कथनमिषेण तमेव ज्ञापयति "यो यच्छ्रद्धः स एव सः" "मनःकृतं कृतमेव" इत्यादिन्यायान्मधुररतिस्तत्रार्थं तत्पर्यवसितस्यैव ॥४१॥

यथा वा—

कस्तूरिकापङ्ककृताङ्गरागः
पीताम्बरालङ्करणाङ्कभागः ।
स कोपि बर्होर्पितभूरिभागः
पायात्सखीभिः कृतरासयागः ॥४२॥

कदाचिन्महातपसी पौर्णमासी प्रियावियोगविधुरतया श्रीवृन्दावने सखिभिः सह मनोविनोदयन्तं सविनयं कृतनमस्कृतिं व्रजनवयुवराजमाशीर्विशेषवितरणमिषेणैव संप्रति राधा प्रेमावेशविशेषपरवशतयाङ्गीकृतभवद्वेषा वंशीस्वनवशीकृतसकलकलाकलापकुशलललितादिसखीसहाया भवानिव रासं रचयतीति व्यञ्जयति; इति त्वमपि तथैवाङ्गीकृततन्मूर्तिवेषपेशलः स्वस्य स्वप्रेयस्याः सखीसमूहस्य च मनोनयनान्यानन्दयन् तत्केलिरसस्यैतावतीमेवापरिपूर्तिं परिहरेत्युपदिशति—कस्तूरिकेति। स कोपि परमानिर्वचनीयः परमाद्भुततमः श्रीराधाख्यो देवताविशेषस्त्वां वियोगाधिसम्भवात्तापात् पायात् रक्षतु। कथंभूतः—कस्तूरिकापङ्केन आत्मनः श्यामसुन्दरतासिद्धये कृतोऽङ्गरागो येन; पुनः कथंभूतः—पीताम्बरस्य अलङ्करणभूतौ अङ्कस्योर्द्ध्वाधोभागौ यस्य, तथा—बर्हेभ्यो मयूरचन्द्रिकाभ्यः शिरसा धारणेन अर्पितो भूरिभागो बहुभाग्यं येन; एवमुपलक्षणैरन्यैरपि प्रसाधनैर्भवद्वेषधरः स्वसमानवयोगुणाभिः सखीभिः नृपमण्डलीभिरिव सह कृतः रास एव यागः राजसूयाख्यो येन सः; अतः सर्वदा तद्वशवर्त्तिना व्रजराजकुमारेण राधारूपेण अवश्यं गत्वा तत्पूर्णता विधेयेति ध्वनिः। मधुररतिकृतोऽयं व्यत्ययः ॥४२॥

यत्र पुरुषा एव स्त्रियः ॥

यत्रेति। यद्यपि पूर्वोक्तेषु यत्राऽधर्म एव धर्म इत्यादिवाक्येषु वक्ष्यमाणेषु च यत्र धर्म एव अधर्म इत्यादिलक्षणो व्यतिरेकस्तु

सर्वत्र स्वत एवाऽवभासते, तदप्यत्र यथा स्त्रीणां तस्मिन्नायके प्रेमभरोद्भवविरहोत्था पुरुषम्मन्यता तथा तास्वपि तस्य तज्जातिप्रमाणकप्रेमोत्थविरहोद्भवां स्त्रीमन्यतां वक्तुमपरोक्षतया व्यतिरेकोक्तिः— यत्र पुरुषाः स्त्रियः इति। अन्यथा "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" इति भगवद्वचनासिद्धिः ॥

यथा श्रीभागवतेऽष्टमे—

"एतस्मिन्नन्तरे विष्णुः सर्वोपायविदीश्वरः।
योषिद्रूपमनिर्देश्यं दधार परमाद्भुतम् ॥" इति।

एतस्मिन्निति। अत्र प्रभोराधिकारिकभक्तदिविषद्वृन्दविषयकरतिकृतोऽयं तयोर्विपर्य्ययः ॥

तथा—

"तां[1] श्रीसखीं कनककुण्डलचारुकर्ण-" इति।

तां श्रीसखीमिति। स्वामिपादैर्व्याख्यातमेव ॥

तथा—

"ततो ददर्शोपवने परस्त्रियं
विचित्रपुष्पारुणपल्लवद्रुमे।
विक्रीडतीं कन्दुकलीलया लसद्-
दुकूलपर्यस्तनितम्बमेखलाम् ॥" इत्यादि।

ततो ददर्शेति। इदमपि तैर्व्याख्यातमेव। अत्र प्रभोर्भक्ताधिराजशशाङ्कशेखरविषयकसख्यसंवलितवत्सलरतिकृतोऽय तयोर्विपर्य्ययः ॥

---

१ तां श्रीसखीं कनककुण्डलचारुकर्णनासाकपोलवदनां परदेवताख्याम्।
संवीक्ष्य संमुमुहुरुत्स्मितवीक्षणेन देवासुरा विगलितस्तनपट्टिकां ताम् ॥
[भा० स्क० ८ अ० ९]

तथोक्तं श्रीरूपगोस्वामिचरणैः—

"मां स्नेहयति किमुच्चैर्महिलेयं द्वारकावरोधेऽत्र।
आ ज्ञातं कुतुकार्थी वनितावेषो हरिश्चरति॥" इति।

द्वारकाप्रतोल्यां स्त्रीवेषधरं श्रीकृष्णं दृष्ट्वा मोहितो नारदः प्राह—मां स्नेहयतीति। द्वारवतीप्रतोलिकायां स्त्रीवेषधरमभिमुखमायान्तं श्रीकृष्णं विलोक्य सस्पृहस्य नारदस्योक्तिरियम्। पद्यन्तु स्पष्टार्थमेव। अत्र श्रीकृष्णस्य द्वारवतीपुरजनविषयकवत्सलरतिकृतोऽयं विपर्य्ययः।

पुनरपि तैरेवोक्तं ललितमाधवे गर्भाङ्के—

"उद्गीर्णाद्भुतमाधुरीपरिमलस्याभीरलीलस्य मे
द्वैतं हन्त समक्षयन् मुहुरसौ चित्रीयते चारणः।
चेतः केलिकुतूहलोत्तरलितं सद्यः सखे मामकं
यस्य प्रेक्ष्य सुरूपतां व्रजवधूसारूप्यमन्विच्छति॥" इति।

अवलोकितनटकृतनिजप्रतिकृतिर्विस्मितमनाः श्रीकृष्णो निजान्तिकस्थितं सखायं मधुमङ्गलमाह—उद्गीर्णेति। अत्रोद्गीर्णपदं नित्यसिद्धानामेव माधुरीरूपपरिमलानामाभीरलीलायामेवाविर्भावितत्वं व्यञ्जयति। तथा परिमलपदेन माधुरीणां गन्धस्य विष्वक्प्रसरणशीलत्वं सर्वजनश्लाघनीयत्वं परमाह्लादप्रदत्वञ्च ध्वनितम्। हे सखे मधुमङ्गल! अद्वितीयस्यापि मम द्वैतं द्विरूपवत्त्वं समक्षयन् चारणः नटः चित्रीयते चित्रमद्भुतमिवाचरति, यस्य सुरूपतां प्रेक्ष्य मम चेतः केलिकुतूहलाय उत्तरलितं सद् व्रजवधूनां सारूप्यमन्विच्छति मुहुर्वाञ्छति, अहं व्रजवधूर्भूत्वा एनं माधुरीपरिमलमनुभवानीति भावः। व्रजवधूभावं विना आभीरलीलस्य ममानुभवो दुर्लभ

इति ध्वनिः । अत्र कृष्णस्य नटप्रकटितनिजसुन्दरस्वरूपविषयकरति-कृतोऽयं तयोर्विपर्य्ययः स्फुट एव । स्वस्वरूपे स्वस्यैव रतिस्तु—

"विस्मापनं स्वस्य च सौभगर्द्धेः
परं पदं भूषणभूषणाङ्गम् ॥"

इति भागवते तृतीयस्कन्धे श्रीमदुद्धवोक्तौ व्यक्तमेव ॥

यथा वा—

एकान्ते कान्त कान्तेति ब्रूते कलय कौतुकम् ।
कान्ते कान्तेन कलितं प्रेमामृतमिलावृतम् ॥४३॥

काचित्सखी निजप्रियसखीविषयकप्रेमसम्भवविरहभराद् राधिकाम्मन्यं श्रीकृष्णं कुञ्जे स्थितमालोक्य त्वरितमागता कौतुकमिव कथयन्ती तां तूर्णमभिसारयति—एकान्तेति । हे राधिके ! कान्तेन नायकेन श्रीकृष्णेन प्रेमामृतं कलितं सेवितम्, कथंभूतं प्रेमामृतम्—इलावृतम्—इलावृतमिव, इलावृतसेवनाद् यथा सद्यः स्त्रीभावो भवति तथा प्रेमामृतसेवनेन त्वद्भावं प्राप्त इत्यर्थः । अत एव एकान्ते निर्जने कुञ्जे 'हे कान्त हे कान्त' इति वीप्सया ब्रूते, तत्कौतुकं त्वं कलयेति—गत्वा त्वं पश्येति—कौतुकस्य दर्शनीयत्वं ध्वनितम् । तत्रैव नायकस्य विरहविह्वलत्वमनुध्वनिः । तत्र च त्वरितमभिसरेति प्रत्यनुध्वनिः । एकान्तपदेन नान्यस्तत्प्रलापं शृणोतीति तच्चित्तचिन्तानिरासः, तथा शीघ्रं तद्गमनावसरश्च दर्शितः ॥४३॥

यथोक्तं ललितमाधवे श्रीरूपगोस्वामिचरणैः—

"पिङ्गलामनुसृतो मणिसङ्गी
सङ्गतो युवतिवेषकलाभिः
आदरादनुमतो निशि देव्या
तामहं रमयितास्मि मृगाक्षीम् ॥" इति ।

पिङ्गलामिति। सूर्यपत्न्या संज्ञया सत्या सङ्गायै राधिकायै सामग्रीविशेषं दातुं प्रेषितां पिङ्गलाख्यां कामपि समागतामवलोक्य प्रियासङ्गमातिलालसः श्रीकृष्णो विचारयति—पिङ्गलामिति। एतां पिङ्गलामनुसृतः अनुगतोऽहं युवत्या इव वेषः कलाश्च—नेत्रचाञ्चल्य-सस्मितभाषणादयश्च—तैः सङ्गतो युक्तः सन् प्रत्यभिज्ञानिरोधिन्यां निशि देव्या श्रीरुक्मिण्या अपरिचितः तत एव आदरादनुमत आश्रम इत्यर्थः। मणिसङ्गी स्यमन्तकसहितस्तां मृगाक्षीं मृगशावक-नयनां रमयिता क्रीडयिता अस्मीति 'मनः कृतं कृतमेव' इति न्यायात् पुरुषस्यापि मधुरतिकृतोऽयं स्त्रीभावः प्रकट एव ॥

यथा वा—

लिप्तैवाहं मृगमदरसैरानयालं विलम्ब्यै-
र्नीलं चोलं कुवलयकुलैः कल्पयाकल्पमङ्गे ।
दैवादेषा रजनिरजनीत्युक्तिभिस्तद्वयस्या
याता नेतुं सुमुखि! समभूत् सस्मिता विस्मिता च ॥४४॥

विरहाधिक्येन राधिकाम्मन्यं श्रीकृष्णमभिसारयितुमागतां राधिकासखीमजानन्तं तथैव प्रलपन्तं दृष्ट्वा राधासखी दूरस्थिता यत्कौतुकमपश्यत् तद्व्रजनिवृत्तान्तं प्रातः काचित् स्वसखीं प्रति सस्मयविस्मयं वदति—लिप्तैवाहमिति। तत्प्रलापमेवाह—आत्मानं श्यामसुन्दरं विलोक्य लिप्तैवाहमिति तां प्रत्युक्तं कुवलयानां नील-त्वात् कोमलत्वात् सुगन्धत्वाच्च तैरेव आकल्पमाकल्पय रचय, विलम्बैरलम्, यतः दैवाद् भाग्योदयाद् रजनिः तामसीरात्रिः अजनि जातास्ति। सुमुखीति सम्बुद्धिस्तस्या अपि तदवस्थतां व्यञ्जयति। तद्वयस्या तस्या राधिकायाः सखी तदुक्तं श्रुत्वा सस्मिता विस्मिता चाभवत्। अत्र अहं खलु नायिकया प्रेषिता एनं नायकमभिसार-यितुमागता, अयन्तु नायिकारूपेणैव तिष्ठति, तत्र गत्वा किं करिष्य-

तीति सस्मितत्वं विस्मितत्वं च प्रेमोत्कण्ठ्यावलोकनेनैव इति। कृष्णस्य प्रियाविषयकमधुररतिकृतोऽयं तयोर्विपर्य्ययः ॥४४॥

यथा वा—

अलं नतीनां ततिभिर्न दास्ये
दधीति भीतिप्रगृहीतमौलेः।
प्रेमोन्मदस्यास्य मुहुः सुमुख्यः
सख्यः पुरो दर्पणमर्पयन्ति ॥४५॥

कदाचिद् गान्धर्विकासखी सखीं प्रति नातिदूरचरस्य रसिकशिरोमणेर्निजप्राणसखीविषयकपरमप्रेमपरिणाहपरिपाकविशेषव्याजेन अमुष्याः सौभाग्यभरमेव व्यञ्जयति—अलं नतीनां ततिभिरित्यादिना पद्येन। तच्च व्याख्यायते—कदाचिदसौ मधुरतममधुरिमरसमयपरमानुरागासवमदोन्मादपरवशतया आत्मानं निजसखीं राधामेवाभिमन्यमानो निकुञ्जमन्दिरं सहजारुणकमलाभ्यां शोभयामास। तदा मया स्वत एव कौतुकेन पुरतो निहितं ददर्शादर्शम्। तत्र दर्शनीयं निजप्रतिविम्बमवलोक्य दधिलुण्टाको व्रजराजकिशोरः पुरत एवागत इति भ्रमेण सविभ्रमं कलशीभ्रमेण निजमुकुटाग्रमग्रहीत्। पुनस्तादृग्विधं निजाभासं समीक्ष्य दधिलुब्धो रसिकशेखरः शेखरनिहितैकहस्तो मां प्रणमतीति मत्वा प्रालपत्। तत्प्रलापमेव पल्लवयति—हे धूर्त नतीनां ततिभिः श्रेणिभिरलं पूर्णताऽस्तु, मुधा मास्त्वयेत्यर्थः। निवारणार्थोऽत्रालमव्ययः। "अलं भूषणपर्याप्तिशक्तिवारणवाचकम्"। इत्यमरः।'दधि न दास्ये' अत्र दधीत्येकवचनेन अल्पमपि न दास्ये किं पुनः दधीनि—इति व्यञ्जितम्। इत्युक्त्वा इति शेषः। 'न दास्ये' इति मृदूक्त्या धृष्टोऽयं बलात् कलशीं शिरसः उन्नेष्यतीति भीत्या भयेन पूर्वतोऽपि प्रकर्षेण गृहीतः कलशीभ्रान्त्या मौलिर्येन सः; तत्र हेतुगर्भं विशेषणम्—प्रेमोन्मदस्येति, प्रेम्णा बहुधा

गुरुजनानुरोधोकिरुद्धोऽपि उद्दु उद्गतः प्रकटीभूतो मदो यस्य, अत्र मदेति पदेन प्रेम्णो माध्वीकत्वारोपः। हे सखि! इदानीन्तु सर्वा एव सख्यः मदानीतादर्शदर्शनोद्भूतप्रलापादिश्रवणदर्शनकौतुकं निपीय पुनरपि तत्सुखमेवावलोकयितुं जातकौतुकाः सत्यः मुहुर्वारंवारं, अस्येत्यङ्गुल्या निर्दिशति। अस्य रसिकशेखरस्य पुरतोऽग्रे दर्पणमादर्शमर्पयन्तीति वर्तमानपदेन तादृगवस्थायाः प्रतिसमयोद्भवं बोधयति। एवं तस्य रसज्ञतां निर्वर्ण्य तन्मिषेण निजप्रियसखीसौभाग्यमेव व्यञ्जितम्। मधुररतिकृत एवायं तयोर्विपर्ययः इति रसशास्त्रविद्भिः सम्यगनुभूतमेव नातोधिकमत्र वितन्यते ॥४५॥

यथा वा—

कस्तूरिकाकुङ्कुमलेपपेशलौ
प्रियप्रियावेषधरौ प्रियाप्रियौ।
शङ्केतकुञ्जे सहजेऽपि सौरते
व्यत्यस्तसम्भोगसुखं समीयतुः ॥४६॥

निरन्तरं परमप्रेमामृतसम्भृतयोर्विनयव्रीडाभरजतयोस्तयोः कयोरपि गोरश्यामलकिशोररसिकयोर्निभृतमेव रसविशेषमयकुञ्जकेलिरसपोषकप्रेमभरसपूर्णया पौर्णमास्याख्यया कयापि तापस्या रजनिवृत्तान्तं पृष्टा कापि सहचरी व्यञ्जितस्वविक्रमं तत्संगमसुखविशेषं वर्णयति—कस्तूरिकेति। कस्तूरिकाकुङ्कुमाभ्यां यथोचितं लेपेन अङ्गरागेण पेशलो सुन्दराविति दुर्जनमोहनार्थं सहजाङ्गवर्णविपर्य्ययः, तथा प्रियप्रियावेषधराविति वसनाभरणादिविपर्य्ययः; एवंभूतो प्रियाप्रियौ सङ्केतकुञ्जे तत्र सङ्गताविन्यर्थः। सहजेऽपि सौरते। सुरतशब्दात्स्वार्थे तद्धितः। तत्र व्यत्यस्तो विपरीतो यः सम्भोगः तस्यैव सुखं समीयतुः। मनसि तथा भावनयापीति संशब्दार्थः, तथा भावनयैव तयोस्तत्सुखावाप्तेः। एवं भवदुपदेशानुगामि-

न्या मया निजसखीसहायया यत्नप्रपञ्चैस्तयोः सङ्गमः सम्पादितः इति निज विक्रमः सूचितः। तथा त्वदनुग्रहात्तत्सङ्गमे सुखविशेषोऽपि जालरन्ध्रैर्मयैवानुभूतो न तु भवत्यापीति व्यञ्जितम्। अस्य पद्यस्यान्वय-व्यतिरेकात्मकत्वात् तदुभयप्रकरणान्ते पतितमित्यवधेयम् ॥४६॥

यथा वा—

माधुर्य्यौको नाधुना वर्णनीयं
रूपं यूनोरीहते यत्समीक्ष्य।
रत्नादर्शे हन्त कृष्णः सतृष्णं
राधाभावं राधिका कृष्णभावम् ॥४७॥

काचित्सखी प्रियाप्रिययोर्नवयौवनागमस्वभावसुलभं परमोपचयमुपगतं यथावद् वर्णयितुमनीशा तयोरिङ्गितज्ञतया तन्मनोरथं कथयन्तो तयोर्माधुर्य्यातिशयं व्यञ्जयति –माधुर्य्यौक इति। तयोर्यूनोर्यौवनेन सेवितयोः रूपं पूर्ववद् अधुना साम्प्रतं न वर्णनीयम्, तस्य गोगोचरत्वाभावात्। केवलमवलोकनीयमेवेति ध्वनिः। रूपातिशय इत्यनुध्वनिः। कथंभूतं रूपम्–माधुर्य्यौकः माधुर्य्याणां लावण्यविशेषाणामोक आस्पदम्। तथापि मत्सुखार्थं संक्षेपेणापि किञ्चित् कथयेति वदन्तीं तामाह—तौ पृथक् निजं निजं रूपं रत्नदर्पणे समीक्ष्य सम्यक् सादरमवलोक्य कृष्णः सतृष्णं यथा स्यात्तथा स्वमाधुर्य्योपभोगाय राधिकाभावमीहते इच्छति, राधिकाऽपि निजमाधुर्य्यं समीक्ष्य कृष्णभावं तत्सारूप्यमीहते। तत्तद्भावं विना तत्तन्माधुर्य्यस्य स्वयं रूपेणानुभवितुमशक्यत्वादिति भावः। हन्त इत्याश्चर्ये। एवं समासतः कथयन्ती तन्माधुर्य्यातिशयमेव व्यञ्जयति, निजनिजमाधुर्य्यासक्तौ तदनुभवलालसायाञ्च स्वस्यैव माधुर्य्यातिशयैकनिदानत्वात्। एवं मधुररति हेतोऽयं तयोर्विनिमयः प्रकट एव। एवमेतदन्वयव्यतिरेकात्मकत्वात् पूर्ववदेवात्रलिखितम् ॥४७॥

यथा कस्यचित्—

"अपरिकलितपूर्वः कश्चमत्कारकारी
स्फुरति मम गरीयानेष माधुर्य्यपूरः।
अयमहमपि हन्त प्रेक्ष्य यं लुब्धचेताः
सरभसमुपभोक्तुं कामये राधिकेव॥"

सौन्दर्यसागरो रसिकशिखामणिः कदाचिद्रत्नदर्पणे स्वरूपमवलोक्य विस्मिततमः स्वयमेवाह—अपरिकलित इति। अयं दर्पणे प्रत्यक्षतो दृश्यमानः कोऽसाधारणः परमाद्भुतोऽनिर्वचनीयः निरुपमो मम मदीयो माधुर्यपूरः माधुर्याणां लावण्यविशेषणां पूरः प्रवाहः। अत्र पूरशब्देन माधुर्याणां तदीयत्वारोपेण प्रतिक्षणं नवनवरसोद्वहनशालित्वम्, धैर्यधर्मादीनां निमज्जनशीलत्वम्, मनोनयनाद्यपवाहनकर्तृत्वञ्च ध्वनितम्। स्फुरति प्रकाशते। कथम्भूतः—अपरिकलितपूर्वः पूर्वं न परिकलितः—देशेऽस्मिन् देशान्तरेऽपि चित्रादौ स्वप्नेऽपि ममाप्यदृष्टचरः, तथा लोकेऽस्मिन् परत्र वा पुरन्दरादिवद् अतीतानागतविदां गर्गादिमुनीनां मुखादपि मया अश्रुतचरः, किमुतान्यैः कुतः पुनर्दृष्टचरः, तथा ध्याने मनोरथे च मनसाप्यननुभूतचरः। मया, किमुतान्यैरित्याद्यर्थत्रयं कलतिधातोः कामधेनुत्वात्। पुनः कथम्भूतः—चमत्कारकारी ममापि चमत्कारं करोतीति तथा, किमुतान्येषाम्। पुनः कथम्भूतः—गरीयान् गुरुतरः, गिरिवरधारिणापि मया यथाकथञ्चिदेव वोढुं शक्यः, प्रायो मम मूर्तेस्त्रिभङ्गललितत्वापादकः। यं माधुर्यपूरं ससम्भ्रमं प्रेक्ष्य अहम्—यस्यायं प्रतिबिम्बः स बिम्बरूपोऽपि—ससंभ्रमं लुब्धचेता भवितुं योग्यमयौग्यम्, उचितमनुचितञ्चेत्यादिविचारं विनैव लुब्धं लोभाभिभूतं चेतो यस्य तथाभूतः सन् सरभसं ससंभ्रममेव राधिकात्वं तपोभिः प्राप्य, उपभोक्तुं सरभसमेव कामये। एवमेकस्यैव क्रियाविशेषणस्य चतुर्धा सम्बन्धः। यथा मम माधुर्यपूरं राधिका मधुरस्नेहमय-

मनस्तया ससम्भ्रमं यथावदुपभुङ्क्ते, तथा स्वमेव माधुर्यं तद्रूपः सन् भोक्तुं कामय इति भावः। तस्या एव यथावन्मम माधुर्योपभोगयोग्यत्वात्। स्वस्यैव रूपे स्वस्यासक्तिरित्यत्र प्रमाणं तु पूर्वं लिखितमेव, अतो नात्र पुनर्लिख्यते। एवं स्वप्रतिबिम्बविषयकमधुररतिकृतोऽयं तयोर्विपर्ययः॥

यत्राज्ञानमेव ज्ञानम्। यथा दशमे—

"जानन्त एव जानन्तु किं बहूक्त्या न मे प्रभो।
मनसो वपुषो वाचो वैभवं तव गोचरः" ॥

जानन्त इति। तैर्व्याख्यातमेव। अत्र दास्यरतिकृतोऽयमज्ञानज्ञानयोर्विपर्ययः प्रकट एव॥

यथोक्तं श्रीवराहं प्रति ब्रह्मणा तृतीये—

"[1]एष ते देव देवानाम्" इत्यारभ्य "[2]अधुनैषोऽभिजिद् नाम" इत्युक्त्वा, "[3]न यावदेष वर्द्धेत" इत्याद्यनन्तरं "[4]एषा घोरतमा सन्ध्या" इत्याद्युक्त्वा, "[5]विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि"। इति।

१—एष ते देवदेवानामङ्घ्रिमूलमुपेयुषाम्।
विप्राणां सौरभेयीणां भूतानामप्यनागसाम्॥

२—अधुनैषोऽभिजिन्नाम योगो मौहूर्तिको ह्यगात्।
शिवाय नस्त्वं सुहृदामाशु निस्तर दुस्तरम्॥

३—न यावदेष वर्द्धेत स्वां वेलां प्राप्य दारुणः।
स्वां देव मायामास्थाय तावज्जह्यघमच्युत॥

४—एषा घोरतमा सन्ध्या लोकच्छम्बट्करी प्रभो।
उपसर्पति सर्वात्मन् सुराणां जयमावह॥

५—दिष्ट्या त्वां विहितं मृत्युमयमासादितः स्वयम्।
विक्रम्यैनं मृधे हत्वा लोकानाधेहि शर्मणि॥ [भा० स्क० ३ अ० १८]

एष इति । अत्र देव ! अच्युत ! प्रभो ! विश्वात्मन् ! इत्यादिसम्बोधनैस्तमीश्वरं जानतो ब्रह्मणस्तथोक्तिः "अनिष्टाशङ्कीनि बन्धुहृदयानि" इति न्यायेन प्रेम्णैव, अज्ञानप्रचुरापि ज्ञानाधिका । अत एव मैत्रेयेणापि अग्रत एवोक्तम्—"प्रहस्य प्रेमगर्भेण तदपाङ्गेन सोऽग्रहीत् ।" इत्यपाङ्गेन भगवताङ्गीकृतं तद्वद् अत्र प्रेमगर्भेणेत्यपाङ्गविशेषणं तद्वचसः प्रेमगर्भत्वं व्यञ्जयति, "ये यथा मां प्रपद्यन्ते" इति भगवदुक्तेः । दास्यरतिकृतोऽयं तयोर्विपर्य्ययः । अत्र विश्वात्मन्निति सम्बुद्धिः मम प्रणयसंभिन्नतया एवमुक्तिरिति त्वं विश्वात्मतया जानास्येवेति साभिप्राया ॥

तथा च दशमे—

"शृङ्ग्यग्निदंष्ट्र्यसिजलद्विजकण्टकेभ्यः
क्रीडापरावतिचलौ स्वसुतौ निषेद्धुम् ।
गृह्याणि कर्त्तुमपि यत्र न तज्जनन्यौ
शेकात आपतुरलं मनसोऽनवस्थाम् ॥" इति ।

शृङ्ग्यग्निरिति । अत्र व्रजेश्वर्य्या मनसश्चाञ्चल्यं पुत्रविषयकरतिकृतत्वादज्ञदृष्ट्याऽज्ञानमेव; परन्तु ज्ञानिनां ज्ञानं व्रजवासिनामेवंविधाऽज्ञानोपरि निर्मञ्छनीक्रियते—इति श्रीशुकदेवाभिप्रायः, अस्य पद्यस्य श्रीव्रजेश्वरीयशोदास्तुतिप्रकरणे लिखितत्वाद् व्रजवासिनां संसारस्य कृष्णमयत्वाच्च ॥

यथा वा—

प्रौढप्रेममयं भाति यद् व्रजे व्रजवासिनाम् ।
अज्ञानं तद्भिज्ञानां विज्ञानादधिकं मतम् ॥४८॥

कश्चिद् गुरुतरगुरुचरणकरुणया युगलचरणकमलपरिचरणपरायणः श्रीव्रजजनचरणरेणुसर्वस्वः परमानन्दो निजान्तेवासिनं

विमुखदेशविशेषनिवासिनमत एवासत्सम्प्रदायाऽशुद्धसिद्धान्तनिबद्धश्रद्धाभरं पारमार्थिकसम्बन्धसम्भवस्नेहनिबन्धनया करुणया वहिर्मुखजनसङ्गसम्भूतमुखरतापरिरम्भितं भ्रान्ततयाऽसाध्यमपि । शनैरुपदिशति—प्रौढप्रेममयमिति । हे महापण्डित ! प्रौढं ज्ञानवैराग्यादिसहायानपेक्षतया परमसमर्थं तत्प्रेम च तन्मयं प्रौढप्रेममयमित्यर्थः । प्रौढप्रेमात्मकं सिताक्रीडनकवद् यद्व्रजवासिनामज्ञानं भाति प्रकाशते, तद् बालदृष्ट्या शास्त्रदृष्ट्या वा अहन्ताममतात्मकत्वेन अज्ञानमिव भासमानमप्यभिज्ञानां न तु त्वद्विधानां विज्ञानामपरोक्षब्रह्मज्ञानादधिकं मतं सम्मतम् ।

तथा श्रीभागवते एकादशस्कन्धे—

"तस्मान्मद्भक्तियुक्तस्य योगिनो वै महात्मनः ।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह ॥"

तथा च श्रीभक्तिरसामृतसिन्धौ—

"ब्रह्मानन्दो भवेदेष चेत्परार्द्धगुणीकृतः ।
नैति भक्तिसुखाम्भोधेः परमाणुतुलामपि ॥"

यथा च श्रीहरिभक्तिसुधोदये—

"त्वत्साक्षात्करणाह्लादविशुद्धाब्धिस्थितस्य मे ।
सुखानि गोष्पदायन्ते ब्राह्माण्यपि जगद्गुरो ॥"

तथा च भावार्थदीपिकायाम्—

"त्वत्कथामृतपाथोधौ विहरन्तो महामुदः ।
कुर्वन्ति कृतिनः केचिच्चतुर्वर्गं तृणोपमम् ॥" इति ।

तथा च "नायं सुखाय" इत्यादिबहूनि वचनानि ततः "शब्दब्रह्म परब्रह्म ममोभे शाश्वती तनू ।" इति षष्ठे चित्रकेतुं प्रति श्रीमदनन्तोक्तेः । तथा "यस्य प्रभा" इत्यादिब्रह्मसंहितादिवाक्यैर्भगवतः श्रीकृष्णस्य सूर्यसमत्वं तदुक्तस्य ब्रह्मणस्तत्प्रभात्वं प्रसिद्धमेव । अतो वहिर्मुखजनोपदिष्टमसत्सम्प्रदायश्रद्धाभरमपास्य भक्तजनोपास्यतमं तमअनन्तविषं विशङ्कं सततं भजेति निष्कर्षः । अत्र मत्याह्वयसञ्चारि-

भावसंवलितशिष्यविषयकवत्सलरतिकृतोऽयं तस्यानन्यरसिकस्य मनस्युद्भूतस्तयोर्विपर्ययः ॥४८॥

यथा वा—

अङ्गालङ्कृतभूषणे रतिपतेरङ्गप्रभादूषणे
घृष्णेर्वंशविभूषणे रसमये कृष्णे परब्रह्मणि।
लोके गोकुलवासिनां प्रविलसन्नानानुरागात्मिका-
विद्योद्योतमवेत्य हन्त मुनयः शोचन्त्यविद्योज्झिताः॥४९॥

कदाचिद् भक्ताधिराजेन श्रीगोविन्दपदारविन्दमकरन्दलुब्धमधुव्रतेन श्रीमदुमावल्लभेन निखिलसंसारिजनवृजिननिरसनायाङ्गीकृतसततपरिभ्रमसुलभो निरन्तरं वल्लकीवल्लभो निजरमण गुणानरसमहासारवारिदो नारदो गोकुलपालकबालकस्य मत्प्रभोः किञ्चिद्वृत्तान्तं कथयेति सम्पृष्टः प्रेमामृतसिन्धुप्रविष्टोऽसौ जीवनमुक्तानामनुतापवर्णनव्याजेन तस्य प्रभोरानन्दप्रदत्वादिगुणवर्णनपूर्वकं घोपनिवासिनां प्रेमपरमोन्नतेः परमपुरुषार्थतां व्यञ्जयति—अङ्गालङ्कृतभूषण इति। कृष्णे भुवनत्रयस्य परमानन्ददानाय सच्चिदानन्दमयसर्वचित्ताकर्षकरूपे तमालश्यामलत्विषि यशोदानन्दने व्रजवासिनां श्रीयशोदानन्दप्रभृतीनां सर्वेषामेव प्रविलसन्नानानुरागात्मिकाविद्योद्योतं प्रकर्षेण लसन्तः ज्ञानयोगादिभ्योऽपि विराजमाना ये नानाविधा अनुरागप्रेमपर्य्यायाः तदात्मिकाः तद्रूपा या अविद्या अज्ञानं तस्या उद्योत आतपः तमवेत्य ज्ञात्वा, न तु दृष्ट्वा, तेषां तादृशभाग्याभावात्। हन्त इति खेदे। मुनयो जीवनमुक्ताः शोचन्ति पश्चात्तापं कुर्वन्ति, तादृग्विधप्रेमाभावात्। तेषां मनस्यनुतापेनाविर्भूतमिति भावः। कीदृशास्ते—अविद्योज्झिता अविद्यया अज्ञानेनोज्झितास्त्यक्ताः। इदानीं तदज्ञानं यदि परावृत्यागतं स्यात्तदानुगतव्रजवासिजनकरुणया मनोभिलषितं कदाचित्स्यादिति भावः। अत-

स्तदज्ञानं निजज्ञानादधिकं मत्वा बन्धुमिव शोचन्ति। अथ पूर्वोक्तं परमानन्दप्रदत्वं षड्भिर्विशेषणैर्विशदयति। कीदृशे कृष्णे—अङ्गालङ्कृतभूषणे अङ्गैरलङ्कृतानि भूषणानि येन स तस्मिन्निति ध्वनितेन परमसौन्दर्य्येण सामान्यतः सर्वचक्षुष्मतां दर्शनीयतमत्वेन परमानन्दप्रदत्वमुक्तम्। पुनः कीदृशे—रतिपतेः कन्दर्पस्याङ्गप्रभादूषणे अङ्गप्रभां दूषयतीति तथा तस्मिन्निति ध्वनितेन लावण्यातिशयेन त्रिभुवनभुवामनन्तनतभ्रुवां चित्ताकर्षकत्वेन परमानन्दप्रदत्वं प्रोक्तम्। पुनः कीदृशे—वृष्णिवंशस्य गोपयदुकुलस्य विभूषणे परमशोभाप्रदे, एतेन ध्वनितेन सकलकल्याणगुणनिलयत्वेन गोपानां यदूनाञ्च निजवंशोत्तमत्वेन परमानन्दप्रदत्वमुक्तम्। पुनः कीदृशे—परे परमेश्वरे, एतेन सकामनिष्कामाणां प्रीतिभक्तिमतां सर्वपुरुषार्थप्रदत्वेन परमपुरुषार्थत्वेन च परमानन्दप्रदत्वमुक्तम्। पुनः कीदृशे—ब्रह्मणि परमात्मनि, एतेन ब्रह्मविदां शान्तभक्तिमतां सौन्दर्यानुभवेऽपि परमात्मत्वेनैव परमानन्दप्रदत्वमुक्तम्। एवं हे चन्द्रशेखर! तव प्रभोः नन्दनन्दनस्य माधुर्यादिभिः समस्तं जगत् परमानन्दमवाप, किन्तु जीवन्मुक्ता एव तापेन शोचन्ते। तस्माद् गोकुलवासिनामज्ञानमेव ज्ञानमिति सिद्धम्। अत्र श्रीदेवपर्दास्यरतिकृतोऽयं विपर्य्यय। ॥४६॥

यत्र पराजय एव जयः। यथा तृतीये—

"येनेदृशीं गतिमसौ दशमास्य ईश!
संग्राहितः पुरुदयेन भवादृशेन।
स्वेनैव तुष्यतु कृतेन स दीननाथः
को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात् ॥"

येनेदृशीमिति। पुरुदयेन परमकृपालुना येन भवता ईदृशीं सामाविकस्वविषयकप्रीतिभक्तिमयीं गतिं संग्राहितः सम्यक्प्रकारेण हृदि

नैसर्गिकदास्यभावनापूर्वकमिति संशब्दार्थः । कीदृशेन येन—भवादृशेन भवानेव भवत्सदृशो नान्य इति व्यञ्जितेनानन्वयालङ्कारेण निरुपमत्वं ध्वनितम् । स दीननाथः अस्मद्विधानां परिपालकः स्वेन कृतेनैवोपकारेण तुष्यतु, अञ्जलिं विना । नाम इति प्रसिद्धार्थकमव्ययम् । कः प्रतिकुर्यात् प्रत्युपकारं कुर्यात् । तदेवं गर्भगतस्य जीवस्य तस्य अविद्यागर्भगतस्यात्मनो निखिलजीवसङ्घस्य च भवत्करुणाप्रथमांशस्फुरितया जीवस्य स्वाभाविकभगवद्विषयकदास्यरत्या दैन्येन तत्सेवासाधनसामर्थ्यसम्भावनातिरस्कारेण निजपराजयमननं जयादधिकम्, तथैव क्रमेण भगवद्वशीकृतिसिद्धेः । दास्यरतिकृतोऽयं विपर्य्ययः ॥

यथा दशमे श्रीभगवद्वाक्यम्—

"दूतस्त्वयात्मलभने सुविविक्तमन्त्रः
प्रस्थापितो मयि चिरायति शून्यमेतत् ।
मत्वा जिहास इदमङ्गमनन्ययोग्यं
तिष्ठेत तत्त्वयि वयं प्रतिनन्दयामः ॥" इति ।

दूत इति । वयं प्रतिनन्दयाम इति वयं प्रतिनन्दनं श्लाघनं तन्मात्रे समर्थाः, न तु तथा प्रतिकर्त्तुमिति आत्मनः पराजयमननं जयादधिकम् । अन्यद्व्याख्यातमेव श्रीधरस्वामिभिः ॥

तथा दशमे भगवद्वाक्यम्—

"न पारयेऽहं निरवद्यसंयुजां
'स्वसाधुकृत्यं' विबुधायुषापि वः ।
या माऽभजन् दुर्जरगेहशृङ्खलाः
संवृश्च्य तद्वः प्रतियातु साधुना ॥" इति ।

न पारयेऽहमिति। वो युष्माकं स्वसाधुकृत्यं भवतीभिः कृतं निरवद्यप्रेमलक्षणमसाधारणमुपकारमहं कर्त्तुं न पारये न समर्थोऽस्मि, ततः भवत्कृतं तद् वो युष्माकमेव साधुना तेनैवोक्तकृतेन प्रतियातु प्रतिकृतं भवतु; तथा कर्त्तुं वयं न प्रभवाम इत्यर्थः। अत्र सर्वसामर्थ्यवतोऽपि भगवतस्तथोक्तिः व्रजसुन्दरीविषयकमधुररतिकृतत्वात्, तत्र पराजयमननमपि जयादधिकम्, परमप्रेम्णस्तथैव स्वभावात्॥

यथा कस्यचिन्महानुभावस्य—

"त्वय्यैव जीर्णतां यातु यत्त्वयोपकृतं कपे।
नरः प्रत्युपकारार्थी विपत्तिमभिकाङ्क्षति॥" इति।

त्वयीति। अत्रापि हे कपे! इति सम्बुद्धिः श्रीरामचन्द्रस्याञ्जनीसुतं प्रति तत्र यत्त्वयोपकृतं तत्त्वय्येव तिष्ठतु, नाहं मनसा स्मरामि; यतः प्रतिकर्त्तुमक्षम इत्येवार्थः। 'नरः प्रत्युपकारार्थी' इत्युत्तरार्द्धन्तु युक्तिमात्रकथनं पूर्वार्द्धार्थपोषणार्थमेव; ततः पूर्ववदात्मनः पराजयमननं जयादधिकमिति तथैव परमकृपालुता संवलितभगवत्तासिद्धेः। श्रीरघुवरस्य भक्तविषयकवत्सलरतिकृतोऽयं तथा श्रीजानक्यां मधुररतिकृतोऽयं विपर्य्ययः॥

यथा वा कस्यापि—

"भिन्नवीरवलयोऽपि नाशकद्गन्तुमेष सुहृशो भुजान्तरात्।
वेणुपर्व मधुपेन भिद्यते न क्वचित्कमलकुड्मलं पुनः॥" इति।

काचित्सहचरी स्वप्रियसखीपुरतः शिरीषकुसुमसुकुमार्य्या अपि निजसख्या विक्रमं कथयन्ती नायकशिरोमणे रसवत्तामेव व्यञ्जयति—भिन्नवीरवलयेति। मल्लयुद्धकौतुके सुबलादिभिर्निजभुजवलनियद्धेनापि येन भिन्नं निजाङ्गाद् बलेनापसारितं वीराणां तेषां सखीनां वलयमण्डलं येन तथा सुविक्रमोऽपि एष श्रीनन्दनन्दनः सुदृशः

चपलनेत्रायाः कुमार्य्या अपि मम सख्या भुजान्तराल् बाहुमध्याद् गन्तुं नाशकद् न समर्थो बभूवेति प्रकट एव पराजयः। स च रसविशेषोदयाज्जयादधिक इति रसविदां स्फुट एव । उत्तरार्द्धे—अर्थान्तरन्यासार्थः स्फुट एव। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः। कदाचिद्रसावेशविशेषोदयात्तया दयितो भुजाभ्यां गृहीत इति ज्ञेयं विधृताः प्रियस्य केशा इतिवत् ॥

यथाह गोवर्द्धनः—

"असाद्य भङ्गमनया द्यूते विहिताभिरुचितकेलिपणे ।
निस्सारयताद्यानिति कपटरुषोत्सारिताः सख्यः ॥" इति।

आसाद्येति । विहितोऽभिरुचिता केलिरेव पणो यस्मिन् तद् द्यूतं तस्मिन् जयमासाद्य प्राप्य। शेष स्पष्टम् । अत्राभिरुचितकेलिसम्पादकत्वात्पराजयोऽयं जयादधिकः। मधुररतिकृतोऽयं विपर्य्ययः ॥

यथा वा—

विशङ्कमस्याः पिबतः स्वनिर्जयात्
समानमानन्दितमाननाम्बुजम् ।
द्यूते मुकुन्दस्य विनोदमोदभूः
पराजयोऽभूदपराजयादपि ॥५०॥

दीपमालिकारजन्यां मुख्यसखीसहाययोस्तयोर्द्यूतकौतुकमवलोक्य काश्चन सख्यो नातिदूरस्थितास्तत्सुखमन्योन्यमास्वादयन्ति—विशङ्कमिति। हे सखि ! पश्य पश्य अस्मिन्द्यूते मुकुन्दस्य परमानन्दप्रदस्य सखीसहायया तया कान्तया जितस्यापि स पराजयः अपराजयात्तत्प्रतियोगिनो विजयादपि विनोदमोदभूः—विनोदः कौतुकं मोदो महानन्दस्तयोर्भूः क्षेत्रमास्पदमिति यावद्—अभूद् बभूव। कीदृशस्यास्येति कान्तामङ्गुल्या निर्दिशति—आननाम्बुजं मुखकमलं पिबतः

सादरमवलोकयत इत्यर्थः। अत्र मुखस्याम्बुजरूपकेण पिबत इति पदेन च कान्तनयनयोर्मधुपत्वं मुखशोभाया मधुत्वञ्चारोपितम्। कीदृशमाननाम्बुजम्—स्वनिर्जयात्स्वकर्तृकस्य कान्तकर्मकनिर्जयादानन्दितम्। पुनः कीदृशं तत्—समाने द्यूतकेलिवित्तया विख्यातोऽपि असौ मया जित इति सगर्वम्, तत एव विशङ्कं व्रीडापरित्यागोद्भूतललितादिप्रखररसखीशृङ्गारहितम्। एवं कान्ताविषयककान्ताश्रयमधुरत्वतिकृतोऽयं जयपराजययोर्विपर्य्ययः ॥५०॥

यत्र सुखमेव दुःखं। यथा तृतीये चतुस्सनः—

"नात्यन्तिकं विगणयन्त्यपि ते प्रसादं
किन्त्वन्यदर्पितभयं भ्रुव उन्नयैस्ते।
येऽङ्ग त्वदङ्घ्रिशरणं भवतः कथायाः
कीर्त्तन्यतीर्थयशसः कुशला रसज्ञाः॥" इति।

नात्यन्तिकमिति। अत्र रसज्ञाः कुशला अर्थादेकान्तभक्ता आत्यन्तिकं ते प्रसादं परमानन्दमयं मोक्षं सुखत्वेन न गणयन्ति नाद्रियन्त इति तदानन्दस्य दुःखरूपत्वमेवोक्तम्, तस्यात्यन्तिकप्रलयरूपत्वात्; भक्तानां तदेकदर्शनजीवातुकत्वाच्च। ततो युक्तमेवोक्तम्—"यत्र सुखमेव दुःखम्" इति॥

पुनस्तत्रैव देवान्प्रति ब्रह्मणोक्तम्—

"वैमानिकाः सललनाश्चरितानि विष्णो-
र्गायन्ति लोकशमलक्षपणानि भर्त्तुः।
अन्तर्जलेऽनुविकसन्मधुमाधवीनां
गन्धेन खण्डितधियोऽप्यनिलं क्षिपन्तः॥" इति।

अत्र सुखदमप्यनिलं श्रीभगवद्गुणगानविक्षेपकतया दुःखदु-

क्त्या क्षिपन्तस्तिरस्कुर्वन्तः । एवमेवाभिप्रेत्य तैर्व्याख्यातम्—"अनेन भगवद्भक्तानां निरतिशयविषयसुखेऽपि भगवद्भजनानन्दशक्तिर्दर्शिता" इति ॥

चतुर्थे यथा—

"या निर्वृतिस्तनुभृतां तव पादपद्म-
ध्यानाद्भवज्जनकथाश्रवणेन वा स्यात् ।
सा ब्रह्मणि स्वमहिमन्यपि नाथ ! मा भूत्
किन्त्वन्तकासिलुलितात्पततां विमानात् ॥" इति ।

या निर्वृतिरिति । अत्र तव पादपद्मध्यानात् त्वज्जनकथाश्रवणाच्च या निर्वृतिः परमानन्दः स्यात्, सा स्वमहिमनि स्वस्य भगवतो महिमनि व्यापकरूपे ब्रह्मणि निर्विशेषे मा भूद् न स्याद् इत्येकान्तिनां तत्सेवासुखमेव सुखतया जानतां तद् ब्रह्मसुखं दुःखमेवेति। सेवासुखमयमधुरामृतसिन्धुनिमग्नानां ब्रह्मसुखस्य क्षाराब्धिरसतुल्यत्वादिति भावः ॥

यथा दशमस्कन्धे नागपत्न्यः—

"न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
वाञ्छन्ति यत्पादरजःप्रपन्नाः ॥" इति ।

न पारमेष्ठ्यमिति । अत्रापि पूर्ववदेव प्रपत्तिमात्रेणैव तत्सुखापेक्षया पारमेष्ठ्यादिसुखमपवर्गसुखञ्च दुःखरूपमेव मत्वा न वाञ्छन्ति रसज्ञा माधुर्यतत्पराः । एवं पद्यचतुष्टये प्रीतिरतिष्ठतोऽयं विपर्ययः ॥

यथा वा—

ध्यायन्तु ते सुखधिया परमात्मतत्त्वं
यत्त्वं ब्रवीषि सुधियोऽनुगतस्वभावाः।
एता वयं मधुपकान्तिसुधातिसान्द्रं
वृन्दावनेन्दुवदनेन्दुचकोरनेत्राः ॥५१॥

तासां प्रेमपरीक्षार्थं रसिकशेखरेण विलिख्य प्रेषितमात्मतत्त्वमुपदिशन्तमुद्धवं व्रजसीमन्तिन्यः सहासाधिक्षेपं प्रतिवदन्ति—ध्यायन्त्विति। ते प्रसिद्धाः सुधियः, अर्थाद्वयन्तु न तथा, यत्त्वं ब्रवीषि तत्परं श्रेष्ठमात्मतत्त्वं सुखधिया सुखबुद्ध्या ध्यायन्तु तस्य दर्शनयोग्यत्वाभावाद् ध्यानमात्रं कुर्वन्तु। कीदृशास्ते—अनुगतस्वभावा अनुगतो हृदि संलग्नो शास्त्रोक्तदुःखे च सुखमानिन एतल्लक्षणः स्वभावो येषान्ते तथा। हे मधुप! श्लेषेण मधुपेति साक्षेपसम्बुद्ध्या सहासाधिक्षेपं तन्मन्दतां व्यञ्जयति। एता वयं कान्तिरेव सुधा तयातिसान्द्रो घनीभूतो यो वृन्दावनेन्दोर्वृन्दावनचन्द्रस्य वदनमेव इन्दुस्तस्य चकोरा इव तद्दर्शनैकजीवना नेत्राणि यासां ताः, ततोऽस्माकं तन्मुखदर्शने एव सुखबुद्धिः, तत्र तु दुःखबुद्धिरेवेति ते एव तदुपदेशाधिकारिणः, न तु वयमिति भावः। मधुररतिकृतोऽयं तयोर्विपर्य्ययः ॥५१॥

यथोक्तं श्रीरूपगोस्वामिचरणैः—

"अङ्गस्तम्भारम्भमुत्तम्भयन्तं
प्रेमानन्दं दारुको नाभ्यनन्दत्।
कंसारातेर्वीजने येन साक्षा-
दक्षोदीयानन्तरायो व्यधायि॥" इति।

अत्र कश्चित्कृष्णे सेवारसिकोऽनन्यभक्तो दारुकदृष्टान्तेन भगव-

रसेवायां महासावधानतां नवनिजशिष्यायोपदिशति—अङ्गस्तम्भारम्भमिति । अरे, दारुकः सततं कृष्णसेवाभिज्ञोऽपि प्रेमानन्दं तन्मुखमाधुर्यामृतपानसम्भवं प्रेमहेतुकमानन्दं नाभ्यनन्दद् नादृतवान्, यतो येनान्देन कंसारातेः कंसशत्रोः । कंसारातिपदेन मातुलस्यापि अपराधिनो दण्डप्रदत्वेन भयसम्भावना बोधिता । वीजने ग्रीष्मे व्यजनचालनसेवायां तत्रापि साक्षात् न तु प्रस्वापादितद्दृक्परोक्षेऽपि अक्षोदीयान् अत्युरुणतमो महानित्यर्थः, अन्तरायः प्रत्यूहो व्यधायि कृतः। तत्र हेतुगर्भं विशेषणम्—अङ्गस्तम्भारम्भमुत्तम्भयन्तमिति, अङ्गे स्तम्भः स्तम्भादिसात्त्विकरूपः तस्यारम्भस्तमुत्तम्भयन्तमुत्थापयन्तं वर्द्धयन्तमित्यर्थः । एवं तस्यानन्दस्य भयलज्जांशजनकत्वेन स्तम्भोत्तम्भकत्वेन च प्रीतिभक्तौ रसाभासापादकत्वात् तदानन्दं सुखबुद्ध्या नाभ्यनन्दत्, किन्तु तत्प्रतियोगिन्या बुद्ध्या नादृतवानित्यर्थः । एवं दास्यरतिकृतोऽयं तयोर्विपर्य्ययः ॥

यथा वा कस्यचित्

"गोविन्दप्रेक्षणाक्षेपिवाष्पपूराभिवर्षिणम् ।
उच्चैरनिन्ददानन्दमरविन्दविलोचना ॥" इति ।

गोविन्देति । अत्र मधुररतिकृतोऽयं तयोर्विपर्य्ययः । अर्थस्तु स्फुट एव ॥

तथोक्तं प्रथमे श्रीधर्मराजमात्रा कुन्तिदेव्या—

"विपदः सन्तु नः शश्वत् तत्र तत्र जगद्गुरो ।
भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम् ॥" इति ।

विपद इति । अत्र सुखदसम्पदामपि कृष्णदर्शनं विना दुःखस्वरूपमेवाभिप्रेतम् । एवं वात्सल्यांशसंवलितप्रीतिरतिकृतोऽयं सुखदुःखयोर्विपर्य्ययः स्फुट एव ॥

यथा वा

मां वीक्ष्य दयितपुरतो रसिकोत्तंसस्तवागतोऽयमिति ।
देवि वचो भवदीयं मदीयमनिशं मनस्तुदति ॥५२॥

एतत्सन्दर्भकर्तुः कवेः "रसिकोत्तंसो हरिर्जयति" इति पद्यं विधाय, भगवति समर्प्य, सुप्तस्य सहसा स्वप्नमभूत् । तत्र विराजमानयोः प्रियाप्रियतमयोरन्तिकमागतं मामवलोक्य शनैः प्रियया प्रियं प्रत्युक्तम्—"तवायमागतो रसिकोत्तंसः" इति तन्निशम्य जातजागरः प्रातस्तां सविनयं सखेदं विज्ञापयति—मां वीक्ष्येति । अत्र चेटकभावस्य ममागमने तथोक्तिः मदुपरि कृपयैवेति सुखप्रदत्वेऽपि त्वदीयोऽयं न तु मदीय इति व्यञ्जनया हे देवि ! अलौकिकदिव्यमङ्गलविग्रहे ! मदीयस्वामिनि ! श्रीराधे ! भवदीयं तद्वचो मदीयं मनस्तुदति व्यथयतीत्यर्थः, न ममायमित्यनङ्गीकारव्यक्तेः । अतः कारणात् सुखमपि दुःखमेवेति स्फुट एव तयोर्विपर्य्ययः ॥ एतन्नामधेयप्राप्तिकारणञ्च स्वप्ने तस्यास्तथोक्तिरेवेति निर्णीतमवधेयम् । दास्यरतिकृतोऽयं विपर्य्ययः ॥५२॥

यथा वा

मामागतस्य नेतुं मम पितुरर्थनमुरीकृतं गुरुभिः ।
हन्त नमामि विधातर्नाथस्तत्रानुमोदयतु ॥५३॥

मामागतस्येति । अत्र पितृगृहगमनं सुखमपि कृष्णासक्तायाः कस्याश्चिद् दुःखमेव । नाथः पतिम्मन्यः । अत्र मधुररतिकृतो विपर्य्ययः स्फुट एव ॥५३॥

यथा वा—

पीतैरन्यसखीजनैरपि समं कान्तस्य रूपामृतै-
र्माधुर्य्योक्तिसुधारसैरपि धियं धिन्वन्तु धन्याः स्त्रियः ।

स्वान्तं स्नेहरसोज्झितं मम तु तैर्वान्तैरिवालङ्कृतं
रोषामर्षविषादवह्निविषमज्वालाजटालङ्कृतम् ॥५४॥

पीतैरिति। अत्र सखीभिः सह कान्तदर्शनतद्वचःश्रवणैः सुखमेव भवति तथापि मधुररतिस्वभावसुलभम्—एताः किमिति मम प्रियं पश्यन्ति वदन्ति चेति—स्त्रीणामसूयाग्रस्तत्वं दुःखमेवेति कृतस्तयोर्विपर्य्ययः ॥५४॥

यत्र दुःखमेव सुखम्। यथा दशमे व्रजसुन्दरीणामुक्तिः—

"सिञ्चाङ्ग नस्त्वदधरामृतपूरकेण
हासावलोककलगीतजहृच्छयाग्निम्।
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा
ध्यानेन याम पदयोः पदवीं सखे! ते॥" इति।

सिञ्चाङ्ग न इति। अङ्ग भोः, त्वदधरामृतपूरकेण तवैवाधरामृतस्य पूरकेण प्रवाहेण। स्वार्थे कः। हासावलोककलगीतजहृच्छयाग्निम्, अर्थात्तवैव यो हासावलोकः फलं मधुरगीतं ताभ्यां जातो यो हृच्छयाग्निः कामाग्निस्तं सिञ्च। अत्र पूरकेणेति पदेन, सिञ्चेति पदेन च हृच्छयाग्नेर्बाहुल्यं व्यञ्जितम्। नो चेद् यदि न सिञ्चसेस्तर्हि विरहजाग्न्युपयुक्तदेहाः, अर्थात् तव विरहादुत्पन्नो यो हृच्छयाग्निस्तेनोपयुक्त उपयोगं नीतो देहो यासान्ताः प्रायो दशमीमवस्थां प्राप्ताः, अत एव तव सम्यग् वृतम्। परन्तु त्वद्विरहेण त्वद्ध्यानेनैव मरणे पुनर्जन्मान्तरेऽपि महाकितवस्य तव कदाचिद्दर्शनं स्यादिति भिया महाविपद्गताः। नायं मनुष्यः, किन्तु भगवान्, एतत्पदध्यानेन मुनयो मुक्तिं यान्तीति भगवतोवचनं श्रुतम्। तत्र मनुष्यत्वन्तु त्वयि प्रत्यक्षमेव दृष्टम् ततस्तस्या वचने विश्वासविशेषोदयाद्। इदानीं भगवनस्तव पादयोर्ध्यानेन त्वत्पादसम्बन्धिनीं गतिं साधारणीं सायुज्याभिधां याम यथा बहिरन्त-

रसितस्य तत्र पुनः सम्बन्धगन्धोऽपि न स्यादिति परमप्रणयकोपोक्तिः। याम इति प्रार्थनायां लोट्। तत्र हेतुः 'सखे' इति सम्बुद्धिः। भवतोऽपि सख्यांशेन कदाचित्करुणयापि पुनर्विप्रतिसारः स्यादिति मुधा भयेन प्रार्थयाम इति भावः। एवं तत्सङ्गस्य दुःखरूपत्वेन आत्यन्तिकप्रलयस्य सामान्यभक्तानामपि विषभक्षणादिवद् अनभीप्सितस्य सुखतया ताभिरङ्गीकारलक्षणो मधुररतिकृतो दुःखसुखयोर्विनिमयः स्फुट एव॥

पुनस्तत्रैव ताभिरेवोक्तम्—

"श्रीर्यत्पादाम्बुजरजश्चकमे तुलस्या
लब्ध्वापि वक्षसि पदं किल भृत्यजुष्टम्।
यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयास-
स्तद्वद् वयं च तव पादरजःप्रपन्नाः॥" इति।

श्रीरिति। अत्र तुलस्या सह सापत्न्यं भृत्यजुष्टतया समदं दुःखमपि सुखमेव मत्वा श्रीर्यत् कामयते, तथा वयमपि तत्त्रितयं दुःखमपि सुखं मत्वा तव पादरजःप्रपन्ना इति मधुररतिकृतोऽयं विपर्ययः॥

यथोक्तमुज्ज्वले—

"तीव्रार्कद्युतिदीपितैरसिलताधाराकरालाश्रिभि-
र्मार्तण्डोपलमण्डलैः स्थपुटितेऽप्यद्रेस्तटे तस्थुषी।
पश्यन्ती पशुपेन्द्रनन्दनमसाविन्दीवरैरास्तृते
तल्पे न्यस्तपदाम्बुजेव मुदिता न स्पन्दते राधिका॥" इति।

काश्चित् सख्यः कान्ताया रागदशां प्राप्तं कान्तविषयकं प्रेम परस्परं सानुरागमास्वादयन्ति—तीव्रार्कद्युतीति। हे सखि! पश्य मार्तण्डोपलमण्डलैर्मार्तण्डोपलानां सूर्यकान्तमणीनां मण्डलैः समूहै-

स्थपुटिते नोन्नतीभूतेऽद्रेः श्रीगोवर्द्धनस्य तटे निकटस्थले तस्थुषी संस्थिताऽसौ प्रत्यक्षतो दृश्यमाना राधिका न स्पन्दते। कीदृशैर्मार्तण्डोपलमण्डलैः—तीव्रार्कद्युतिदीपितैः तीव्रो वृषराशिस्थितो मध्याह्नगतो योऽर्कस्तस्य दीप्तिभिरातपैर्दीपितैः सन्तापितैरपि। पुनः कीदृशैः—असिलताधाराकरालाश्रिभिः असिरेव लता तस्या धारा तद्वत् कराला अश्रयः कोटयोऽग्रभागा येषां ते तैः। अत्र हेतुगर्भं विशेषणं कीदृशी राधिका—पशुपेन्द्रनन्दनं पशुपानामिन्द्रः श्रीनन्दस्तस्य नन्दनस्तं व्रजनवयुवराजचन्द्रं शेखरीकृतशैलराजं श्रीकृष्णचन्द्रं पश्यन्ती, अत एव मुदिता। का इव इन्दीवरैरिति रात्रिविकाशितया दिनकरकरनिकरपरामर्शाभावाद् अन्यनीरजापेक्षया अतिशीतलैरास्तृते रचितास्तरणे तल्पे शय्यायां न्यस्ते पदकमले यया तादृग्विधेव। एवं प्रियमुखावलोकनसुखेन विस्मृतनिजाङ्गसखीगुरुजनसमूहा मुदिता किञ्चिदपि न चलतीति मधुररतिकृतो दुःखसुखयोर्व्यत्ययः स्पष्ट एव ॥

तथा रसामृतसिन्धौ—

"गुरुरपि भुजगाद्भीस्तक्षकात्प्राज्यराज्य-
च्युतिरतिशयिनी च प्रायचर्या च गुर्वी ।
अतनुत मुदमुच्चैः कृष्णलीलासुधान्त-
र्विहरणसचिवत्वादौत्तरेयस्य[1] राज्ञः ॥" इति ।

गुरुरपीति। अत्र परीक्षितस्तक्षकाद् भयं तथा राज्यभ्रंशः प्रायचर्या अनशनमेतत्त्रयं दुःखदमपि मुदं सुखमेव ततान। तत्र हेतुः कृष्णलीलासुधान्तर्विहरणसचिवत्वादिति। दास्यरतिकृतोऽयं विपर्ययः ॥

१—उत्तराया अपत्यं पुमान् औत्तरेयः "स्त्रीभ्यो ढक्" इति ढक्। तस्य-औत्तरेयस्य परीक्षिन्नृपस्य।

यथा वा—

पश्यालि ! विष्वग् गुरवः ससंभ्रमं
भ्रमन्ति दावानलभीतचेतसः।
तदातपे राधिकया स्वसंमुखं
मुखं मुकुन्दस्य सुखं समीक्ष्यते ॥५५॥

काचित् सहचरी कान्ताकान्तयोर्निरवद्यमनन्य[1]थवेद्यं परमप्रेष्ठतमं यत्प्रेम तल्लक्षणं दूरादवलोक्य निजसखीपुरतोऽनुवर्णयति—पश्यालीति। हे आलि! पश्य, गुरवः सर्वे गुरुजना विष्वक् समन्ततः ससम्भ्रमं सवेगं यथा स्यात्तथा भ्रमन्ति—इतस्ततो धावन्ति। कीदृशा गुरवः—दावानलभीतचेतसः कालीयदमनानन्तरं ग्रीष्मातपनीरसे कालिन्दीरोधसि निशीथे सहसोद्भूतेन दावानलेन भीतानि चेतांसि येषान्ते। राधिकया तु भयानकेऽपि तस्मिन् समये मुकुन्दस्य परमानन्दप्रदस्य निजप्रियतमस्य मुखं तदातपे तस्य दावानलस्य परमप्रकाशे सुखं गुरुजनभयाभावेन यथेच्छं यथा स्यात्तथा समीक्ष्यते सं सम्यग् ईक्ष्यते विलोक्यते। कीदृशं मुकुन्दस्य मुखम्—स्वसंमुखमिति विशेषणं तस्यापि तस्यां तादृशप्रेम्णा निभृतं तन्मुखावलोकनलालसां बोधयति। एवं तस्मिन्नतिदुःखमये समये तयोः परं सुखमेवाभूदिति दुःखसुखयोर्विपर्ययो मधुररतिकृतः स्फुट एव ॥ ५५ ॥

यथा वा—

आयातु पातु मथुराधिपतिः स्वगोष्ठं
किं नोऽधुना मधुप! तेन सुसाधुनापि।
यत्तस्य हन्त विविधैर्विनयैरुपेता-
स्त्वेता वयं दयितनेत्रचकोरचन्द्राः ॥५६॥

१—निरवद्यमनन्यवेद्यम्—इति वा पाठः स्यात्।

काचित् परमाभिरामा वामा व्रजरामागणमणिः "मधुप ! कितव बन्धो ! मा स्पृश" इत्यादिमधुरनिजप्रणयोन्मादप्रलपितामृतपान-सञ्जातमहोदयं निजभावविशेषलाभसम्भावनाभावभावनानिरुद्धवि-शुद्धबुद्धिमुद्धवं 'तमद्यागतमेव जानीत नीतिनिरतमस्मत्प्रभुम्' इति मुहुः प्रलपन्तं विप्रयोगविवशापि स्वभावपरवशा मधुपापदेशेन सवाम्यमेव आक्षिपति- आयात्विति । मथुराधिपतिरिदानीमेवं-प्राप्तमथुराधिपत्यत्यक्तव्रजाधिपत्य इति ध्वनिः । सुखं यथेच्छमायातु । पितृपितामहीयत्वेन निजप्रजात्वेन वा स्वं स्वकीयं गोष्ठं गोकुलं पातु पालयतु । परन्तु हे मधुप ! इति श्लेषेण साक्षेपसम्बुद्धिः तेनाधुना साधुना नृपत्वेन निरस्तपूर्वस्वभावत्वेन—प्रीत्यादिनिरतेनापि नो-ऽस्माकं सर्वासामेव न किञ्चिदपि प्रयोजनमित्यर्थः, कुतः यद् यस्मा-त्तस्य गोकुलयुवराजस्य । हन्त इति खेदे । विविधैर्बहुप्रकारकैस्तत्पु-रतो वक्तुमप्यशक्यैर्विनयैः प्रणामादिलक्षणैरुपसमीपमर्यात्तस्यैव इताः कदाचित् कथमपि पूर्वं सविधमात्रं प्राप्तास्ता एता वयन्तु तस्यैव दयितस्य नेत्रे एव चकोरौ तयोश्चन्द्राः । चकोरयोश्चन्द्र इव तन्नेत्रयो रस्मन्मुखावलोकनमित्यर्थः। अयं भावः—तस्य पूर्ववदेवा-स्मद्दयितत्वं तदैव स्याद् यदा तन्नेत्रयोरस्म-न्मुखावलोकनजीवनत्वं पूर्ववदेव स्यात्तथा विविधविनयादिकर्त्तृत्वञ्च स्यात् तदैवास्मत्प्र-योजनसिद्धिः । इदानीन्तु मथुरापुरपुरन्दरस्य नीतिनिरतस्य तथात्वं कथमपि न सम्भवतीति तेन किं प्रयोजनमिति । एवं तस्य सम्प्रति स्वगमनादितेन तथात्वेन तत्सङ्गमसुखापेक्षया एतद्विरहदुःखमेव अस्माकं तस्य पूर्वरूपस्य यथावद् ध्यानसम्पादकत्वात् परमसुखमिति मधुररतिकृतोऽयं दुःखसुखयोर्विपर्य्ययः ॥६॥

यथा वा—

शृण्वन्तु सख्यः सुखमेकमद्य
श्रीकृष्णसौन्दर्य्यसुधां निपीय ।

अहं यथा यूयमहो महोग्रा
मन्दा ननान्दाऽपि भृशं ननन्द ॥५७॥

कदाचित्कृष्णदयिता सखीसंसदि किमप्यपूर्ववृत्तान्तं दृष्ट्वा सानन्दमाह—शृण्वन्त्विति। हे सख्यः एकमपूर्वं सुखं शृण्वन्तु श्रीकृष्णस्य सर्वचित्ताकर्षकस्य सौन्दर्यमेव सुधा तां निपीय सादरमवलोक्य। अत्र सुधापदेन श्रीकृष्णस्य चन्द्रत्वारोपः। अहो इत्याश्चर्ये। महोग्रा अतिभयप्रदाः। मन्दा रसानभिज्ञापि ननान्दा अर्थान्मम। यथा अहं ननन्द, यथा यूयं ननन्द, तथा सापि भृशं ननन्द। अत्र पद्ये टुनदि धातोः प्रथमपुरुषैकवचनं मध्यमपुरुषबहुवचनमुत्तमपुरुषैकवचनं ननन्देत्येकेन पदेनोक्तमिति व्याकरणचित्रमवधेयम्। प्रियस्यान्यथा कृतमवलोकनं प्रेयसीनां दुःखमेव। अत्र तु तदेव सुखमिति मधुररतिकृतोऽयं तयाविपर्ययः ॥५७॥

यथा वा—

सुखदा कदापि तस्मिन् ममेव दयितस्य मयि रतिर्मास्तु।
इममेव देव! सवितर्वितर मे वरं कृपया ॥५८॥

"रतिरनिशनिसर्गोष्णप्रबलतरानन्दसान्द्ररूपैव ।
उष्माणमपि वमन्ती सुधांशुकोटेरपि स्वाद्वी॥
पीडाभिर्नवकालकूटकटुतागर्वस्य निर्वासनो
निष्यन्देन मुदां सुधामधुरिमाहङ्कारसङ्कोचनः।
प्रेमा सुन्दरि नन्दनन्दनपरो जागर्ति यस्यान्तरे
ज्ञायन्ते स्फुटमस्य वक्रमधुरास्तेनैव विक्रान्तयः॥'

इति महानुभावश्रीरूपगोस्वामिवचनानुसारेण कृष्णरतेरात्यन्तिकदुःखसुखयोराधारतया दुस्सहप्रियवियोगबाधामगाधाशयतया अन्तरेवानुभवन्ती परमासाधारणनुरागवती राधा निबद्धाञ्जलिः प्रसारिताञ्चला निजेष्टदेवं भास्करमयाचितचरं परमसुलभमभियाचते—

सुखदेति । तस्मिन्नवकुवलयदलकोमलकमनीयकलेवरे दयिते ममेव यथा मम रतिस्तथा दयितस्य प्राणादधिकप्रियस्य तस्य मयि यद्यपि रतिर्मास्तु, इममेव नान्यं वरं मम वितर देहि । किम्भूता रतिः— सुखदापि, अपि शब्दस्यात्रापि सम्बन्धः । यद्यपि प्रियस्य प्रियायामतिप्रीतिस्तस्याः सुखप्रदा, तथापि सा मयि मास्तु । तेन सुखेन ममालमिति भावः । यद्वा, हेतुगर्भमिदं विशेषणम , यतः सुखदा मत्यनुभूयमानसुखप्रदेति विरुद्धलक्षणयात्यन्ततिरस्कृतवाच्यध्वनिना विरहदुःखप्रदेति तत्प्रतियोगिनमेवार्थं व्यञ्जयति । यद्वा, यतः सुखदा सुखं सर्वमेव सर्वदैव द्यति खण्डयतीति तथा । "दोऽवखण्डने" इत्यस्मात् । ननु वरस्त्वयायमयाचिताऽदत्तचरः कथं प्रार्थ्यते ? इत्यपेक्षायां वरं विशिनष्टि—मे वरमिति । ममायमेव प्रवरो वर इति भावः । "देवा भक्तेप्सितप्रदाः" इत्यनुस्मारयन्ती सम्बोधयति—हे देवेति । तत्र 'कृपया' इत्युक्त्या निजेप्सितस्य देवोत्तमकरुणैकसाध्यत्वं विशदयन्त्या दुर्घटत्वं ध्वनितम । तस्य रसवत्त्वम्, गुणवत्त्वम्, फलवत्त्वम्, प्रेमवश्यत्वावश्यकत्वञ्चानुध्वनिः । आत्मनः प्रेमगुणमाधुर्यादिगर्वितात्वं मन्यनुध्वनिः । तस्मिन्मम इव यदि मयि तस्य रतिरभविष्यत्तदाऽहमिव सोऽपि विरहवेदनामन्वभविष्यदिति भावः । अत्रापि मधुररतिरुक्तो विपर्य्ययस्तयोरिति स्फुटमेव ॥५८॥

यत्र निकृष्टत्वमेवोत्कृष्टत्वम् ।

यथा तृतीये श्रीसनकादयः—

"कामं भवः स्ववृजिनैर्निरयेषु नः स्ता-
च्चेतोऽलिवद्‌ यदि नु ते पदयो रमेत ।
वाचश्च नस्तुलसिवद्यदि तेऽङ्घ्रिशोभाः
पूर्य्येत ते गुणगणैर्यदि कर्णरन्ध्रः ॥" इति ।

काममिति । अत्र ब्रह्मानन्दानुभविनां तेषां तत्सुखापेक्षया

इतरानन्दानां निकृष्टत्वमेवेति निर्णयः, तथापि भवत्कृपया सञ्जातस्वरूपदर्शनानां पूर्वसुखादपि निरयादिनिवासेऽपि भजनानन्दस्योत्कृष्टत्वेन मनसि मननमिति स्फुट एव निकृष्टत्वोत्कृष्टत्वयोर्विपर्य्ययः। स च ज्ञानिवराणां भगवत्कृपालेशसञ्जातदर्शनोद्भूतः शान्तिरतिलेशकृतः। अन्यत्तैर्व्याख्यातमेव ॥

तथा दशमे ब्रह्मणोक्तम्—

"तदस्तु मे नाथ! स भूरिभागो
भवेऽत्र वान्यत्र तु वा तिरश्चाम्।
येनाहमेकोऽपि भवज्जनानां
भूत्वा निषेवे तव पादपल्लवम्॥" इति।

तदस्त्विति। अत्र परमोत्कृष्टेऽपि पारमेष्ठ्यपदे स्थितो ब्रह्मा तिर्य्यग्योनावपि तत्पादपल्लवसेवनं भूरिभाग्यत्वेन प्रार्थयतीति प्रीतिरतिकृतोऽयं तयोर्विपर्य्ययः। अन्यत्स्वामिभिर्व्याख्यातमेव ॥

तथा तत्रैव—

"तद् भूरिभाग्यमिह जन्म किमप्यटव्यां
यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम्।
यज्जीवितन्तु निखिलं भगवान्मुकुन्द-
स्त्वद्यापि यत्पदजः श्रुतिमृग्यमेव॥" इति।

तद् भूरिभाग्यमिति। अत्रापि परमेष्ठिनोऽपि तस्य गोकुलवासिनां मध्ये यस्य कस्यापि चरणरजोऽभिषेकलक्षणं भूरिभाग्यमर्थयतः प्रकट एव निकृष्टत्वोत्कृष्टत्वयोर्विनिमयः॥

तथा दशमे उद्धवोक्तिः—

"आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।

या दुस्त्यजं स्वजनमार्य्यपथञ्च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ॥" इति ।

आसामिति । अत्रापि—"नोद्धवोऽण्वपि मन्न्यून." इत्यादिभिः श्रीमुखसंस्तुतस्यापि तस्य श्रीकृष्णे परमानुरागवतीनां श्रीव्रजसुन्दरीणां चरणरेणुजुषां लतौषधीनां मध्ये यत्किञ्चिज्जन्मप्रार्थनलक्षणस्तयोर्विपर्य्यय स्फुट एव । स च मधुररतिशवलितदास्यरतिकृत ॥

प्रथमे स्तोक्तिः—

"सारथ्यपारिषदसेवनसख्यदौत्य-
वीरासनानुगमनस्तवनप्रणामम् ।
स्निग्धेषु पाण्डुषु जगत्प्रणतिश्च विष्णो-
र्भक्तिं करोति नृपतिश्चरणारविन्दे ॥" इति ।

सारथ्येति । अत्रापि जगत्प्रणतस्यापि श्रीकृष्णस्य सारथ्यादिसामान्यकर्मकर्त्तृत्वं निकृष्टत्वमेव, तदपि भक्तिं करोतीत्युत्कृष्टत्वमेवोपपादितम् । एवं तस्य युधिष्ठिरादीनाञ्च वात्सल्यसख्यदास्यादिसम्भवयथोचितभक्तवात्सल्यादिरतिकृतोऽयं स्फुट एव तयोर्विपर्य्यय ॥

यथा वा—

कृष्णस्त्वया यो नयनाञ्जनीकृतो
हारीकृतो नीलमणीन्द्रमञ्जुलः ।
मानिन्ययं सम्प्रति गन्तुमीहते
प्रियोनुरक्तः पदयोरलक्तताम् ॥५६॥

काचित्सखी यत्नसहस्रैरपि गुरुमानवतीं कान्तामनुनेतुमनीशा कान्तमेव तदन्तिकमानीय सोऽय चरणतल शिरसा स्प्रष्टुमिच्छति

तत्कृपया वितरेति मानिनीं दाक्षिण्यविशेषेणार्थयति—कृष्णस्त्वयेति। हे मानिनि! अयं पुरतोऽञ्जलिं बद्ध्वा स्थित इत्यङ्गुल्या निर्दिशति। पादयोः अर्थात्तवैव अलक्तां यावकत्वं गन्तुं प्राप्तुमीहते वाञ्छति। कीदृशोऽयम्—यस्त्वया नयनाञ्जनीकृतः नयनयोरञ्जनतां नीतः। अत्र नयनपदान्ते कमलादिरूपकानुक्तिः अनन्वयेन निरुपमत्वं बोधयति। यतः कृष्णः श्यामसुन्दर, तथा हारीकृतो हृदयहारतां नीतः, हृदयेन सादरमलङ्कृत इत्यर्थः। यतो नीलमणीन्द्रमञ्जुलो नीलश्चासौ मणीन्द्रस्ततोऽपि मृदुलाङ्गत्वेन मञ्जुल इति पञ्चमीतत्पुरुषः। तत्र तद्भाव इति। पुनः कीदृशोऽयम्—सम्प्रति इदानीन्त्वनुरक्तोऽतीवानुरागवान् अत एव यावकत्वमिच्छतीत्ययं भावः। बहिरन्तः श्यामतामस्य विजानन्त्यापि त्वयैव न तु सख्यादिशिक्षया प्रष्टव्योऽयम्। "सर्वं वाक्यं सावधारणम्" इति न्यायेनैवं व्याख्यातम्। नेत्रकण्ठैरलङ्कृत्य परमादृतः अत एवेदानीमागतवैयात्यः परमानुरक्तः सन् यावकवत् पादतलसंलग्नतयात्मानं शोभयितुमिच्छति। तथा मम तव चरणसंलग्नत्वमेव यथा सदैव स्यात्तथैवाधुनाऽनुग्रहो विधेय इति प्रच्छन्नप्रार्थनया सदैव मानाभावं प्रार्थयति। एवं नेत्रहृदयनिवासिनस्तस्य पदयावकत्वप्रार्थनरूपपराजयः स्फुट इति तयोर्मधुररतिकृतोऽयं विपर्य्ययः ॥५४॥

यत्र तम एव प्रकाशः। यथोक्तं श्रीरूपगोस्वामिचरणैः—

"हरिमुद्दिशते रजोभरः पुरतः सङ्गमयत्यमुं तमः।
व्रजवामदृशां न पद्धतिर्विदिता सर्वदृशः श्रुतेरपि॥" इति।

कञ्चन पाण्डित्याभिमानिनं किञ्चिच्छ्रीवृन्दावननिवासादिप्रभावोदितमृदुश्रद्धतया निजान्तिकमागतं तत्र रजस्तमोभ्यामसम्भिन्नशुद्धसत्त्वात्मके मनसि भगवत्प्रादुर्भावो नान्यथेति श्रुतिशास्त्रादिवचनैर्वावदूकतया तथैव सिद्धान्तं समर्थयन्तं कश्चित्

श्रीवृन्दावननिवासैकजीवनः परिणतानन्यरसिको निजरसमयालङ्कारिकरीत्यैव तन्मतमव्याप्तिग्रस्ततयाऽऽदिपन् कृपालुतया किञ्चित्स्वरहस्यमप्युपदिशति—हरिमिति । हे महापण्डित ! शृणु, व्रजवामदृशामस्मत्सम्प्रदायाचार्य्यरूपाणां श्रीव्रजसुन्दरीणाम्। तासामाचार्य्यत्वञ्च श्रीमदुद्धवेनोक्तम्—"भक्तिः प्रवर्त्तिता दिष्ट्या मुनीनामपि दुर्लभा ।" इति । तासां पद्धतिः पदवी भगवत्प्राप्त्युपायः सर्वदशः सर्वज्ञायाः श्रुतेरपि किमुत शास्त्रादेः किमुत सुतरां पुनस्तव विदिता ज्ञानगोचरा, यतः तासां सम्प्रदाये रजोभरो रजसः—गोरजसः श्लेषेण रजोगुणस्य भरो हरिमुद्दिशति—आगतं कथयति । तथा तमोऽन्धकारः श्लेषेण तमोगुणः, अमुं श्रीकृष्णं पुरतः अग्रतः साक्षादित्यर्थः, सङ्गमयति तत्सङ्गमं सम्पादयति । अतो रजस्तमोभ्यामेव साक्षात्प्राप्तिरिति भवद्वचसोऽव्याप्तिग्रस्तत्वमेवेति । किञ्च प्राचीनैरप्युक्तम्—

"श्रुतयः पलालकल्पाः किमिह वयं साम्प्रतं विचिनुमः ।
आह्रियत पुरैव नयनैराभीरीभिः परं ब्रह्म" ॥

इत्यादि बहुशः । ततः पूर्वश्रद्धासङ्कोचपूर्वकमेतन्मतानुसरणमेव वरमिति । तासां कान्तविषयकमधुररतिकृतोऽयं प्रकाशतमसोर्विपर्य्ययः स्फुट एव । अतो नाधिकं वितन्यते ॥

तथोक्तं श्रीगोस्वामिगोपालकृष्णैः—

"नक्तं प्राक् पुनरम्बुवाहनिवहैर्व्योमावृतं सर्वतो
भूयः क्ष्मातलचुम्बिभिर्द्रुमचयैर्वृन्दावनं गह्वरम् ।
राधे ! ताम्यसि किं भियान्धतमसि कृष्णो न दृश्योऽधुना
दैवाद् द्रागचिरद्युतिः स्फुरति चेत्त्वं नैव दृश्या जनैः ॥" इति ।

काचिच्चतुरसहचरी निकुञ्जे कान्तविरहविवशां विलोक्य

कान्तामभिसारयितुं त्वरितमागता तत्र तां निजाभिजात्येन गोकुल-लोकावलोकनशङ्कया किञ्चिन्मन्थरायमाणामाज्ञाय सोपपत्तिकेन वचसा तत्र भयाभावमेव समर्थयन्ती तदङ्गकान्त्योरेवाद्भुततां व्यञ्जयति—नक्तं प्रागिति। —हे कान्ते! शृणु, प्राक् पूर्वमिदानीन्तु नक्तं रात्रिमुखम्। तेन प्रतिक्षणमन्धकारबाहुल्यं व्यञ्जितम्। सा च तामसी तत्रापि अम्बुवाहानां रससम्भृततयाऽतिश्यामानां निवहैः समूहैः न तु विरलैः सर्वतः सर्वतोदिशं व्योम आवृतं व्याप्तमिति घनविघनविघटनशङ्कानिरासपूर्वकं तमसो गाढतमत्वमुक्तम्। भूयः क्ष्मातलचुम्बिभिरासारसमयसमुत्पन्नकिसलयदलादिसमुत्पन्नतया भूतलस्पृग्भिस्तत्रापि तेषां द्रुमाणां चयैः समूहैः वृन्दावनं स्वत एव वनत्वेन सघनमपि तैर्गह्वरं दुष्प्रवेशम्। एतेन तमसो गाढतमत्वं तथा गह्वरपदाभिव्यञ्जितविजनतया शङ्काभावश्च बोधितः। तत्र कस्याप्यागमनमेव नास्तीति व्यञ्जितम्। ततः हे राधे! प्रेमशङ्कापरवशा किं ताम्यसि—किं करोमीति चिन्तया कथं खिद्यसि—सत्वरमभिसर। ननु कदाचित्कोऽपि तत्रागत एव स्यात्तदा किं विधेयमिति चेत्तत्राह- शृणु, युवयोर्युगपदेकत्र दर्शने भयं भवेत्। तत्राधुनैवंभूते गाढतमसि कृष्णः श्यामसुन्दरो दृश्यो दर्शनयोग्यो न, त न कोऽपि द्रक्ष्यतीत्यर्थः। ननु विद्युदुदयतया बिभेमीति तत्राह-- पूर्वं वर्षोन्मुखे घनतरे घने विद्युदेव न प्रकाशते, यदि दैवात्सा स्फुरति प्रकाशते चेत्तर्हि सा अचिरद्युतिरिति क्षणमात्रमेव तत्प्रकाशः; ततोऽपि बिभेमीति चेत्तर्हि तदा विद्युत्प्रकाशे त्वं जनैर्न दृश्या। सुवर्णाङ्गीं त्वां न कोऽपि द्रक्ष्यतीति सत्वरमभिसरेति भावः। एवं प्रकाशतमसोः क्रमेणाऽभयकरत्वे तथा कार्यसाधकत्वाऽसाधकत्वे च प्रसिद्धे। अत्र तु अभयकरत्वात् प्रियमिलनादिसर्वकार्यसाधकत्वात् तमस एव प्रकाशत्वमङ्गीकृतमिति ज्ञेयम्। एवं तयोर्मधुररतिकृतोऽयं तमःप्रकाशयोः विपर्ययः पद्यस्य पादत्रयेण दर्शितः। तुर्यं पादन्तु एतस्य व्यतिरेकरसविशेषस्य पोषकमिति सूक्ष्मदृशावधेयमिति॥

यथा कस्यचित्—

"रभसादभिसर्त्तुमुद्यतानां
वनितानां सखि ! वारिदो विवस्वान् ।
रजनी दिवसोऽन्धकारमर्चि-
र्विपिनं वेश्म विमार्ग एव मार्गः ॥" इति ।

घनतरघनघोरतमिस्रायामस्यां तमिस्रायां परमान्धकारे भवनं विहाय वने गमनं कर्त्तुं शङ्कमाना अस्मि, पुनर्यथा कथञ्चित्कृतेऽपि तस्मिन्मार्गज्ञानाभावात् कथमभिसरामीति वदन्तीं कृष्णे नवानुरागवतीं कामपि काचित्सहचरी प्रेमाभिसारप्रक्रियासारमुपदिशति—रभसादिति । हेसखि ! इति सम्बुद्धिस्त्वं न जानासि सख्येनाहमुपदिशामि, शृणु—इत्यभिप्रायेण । रभसात् प्रणयसम्भ्रमादभिसर्त्तुं प्रियान्तिकं गन्तुमुद्यतानां वनितानां जातात्यन्तानुरागाणां वारिदो वर्षन्मेघः, विवस्वान् सूर्य्यः, रजनी रात्रिः, दिवसो दिनम्, अन्धकारं तमः, अर्चिर्दीपः, विपिनं वनमेव वेश्म गृहम्, विमार्गो मार्गत्याग एव पन्थाः । ततः प्रेम्णो गतिर्विपरीतैवेति ज्ञात्वा सुखमभिसरेति । एवं मधुररतिकृतोऽयं तमःप्रकाशयोर्विपर्य्ययः स्फुट एव । अत्र पद्ये पादत्रयेणैव निजाभिप्रेतोदाहरणसिद्धिः । चतुर्थचरणस्तु पद्यस्य पठने शोभोद्भावार्थं प्रेम्णो विविधविपर्य्ययकर्त्तृबोधनार्थमेवेति ज्ञेयम् ॥

तथा कविर्गोवर्द्धनः—

"तमसि प्रदीपकलिका शिविका पथि तूलिका शयने
यूनोः सौहृदलतिका किशलयकुटिकाऽऽतपे भवति ॥" इति ।

तमसीति । अत्रापि पूर्ववाचतारिका । यूनोः सौहृदलतिका तमसि प्रदीपकलिका भवतीति स्फुट एवार्थः । एतद्वाक्येनैवास्मत्प्रयोजनसिद्धिः । वाक्यान्तराणि तु शोभार्थं प्रेम्णोऽनन्तविपरीत-

कारित्वबोधनार्थमेव लिखितानीति ज्ञेयम् । एवं मधुररतिकृतोऽयं तमःप्रकाशयोर्विपर्य्ययः प्रस्फुट एव ।

यथा वा—

संगमय्य प्रियां कृत्वा ममैवाङ्कमलक्षितम् ।
आतङ्कशान्तिमातन्वन् मम मित्रतमं तमः ॥६०॥

कदाचित्पूर्वानुरागवर्ती निजसखीसमूहपुरतोऽपि तदुदन्तं शसितुं विशङ्कितमतिं निजवदनकमलसम्भृतमधुरिममधुपानाय मधुकरीकृतनिजनयनां निभृतं संसेवितवातायनां कान्तामाराद्विज्ञाय निजसहचरस्य श्रीदाम्नः पुरतः स्वसखीनां निन्दनमिव कुर्वन्, सर्वथा भयशून्यं स्वसङ्गोपायं तां संश्रावयन्, स्वयं दौत्यं विशदयति–संगमय्येति । हे श्रीसुदामन् ! मम मित्राणि नाम्नैव न तु क्रिययेति मया मित्रान्तरमुररीकृतम् । अथ तेन पृष्टस्तन्नामाह - मम मित्रतमं तम इति । अन्ये तु मित्राण्येव, तमस्तु मित्रतममतिशयेन मित्रमित्यर्थः । कीदृशं तमः—पूर्वं प्रियां सगमय्य पुनर्ममैवाङ्कं न तु तस्या इत्येव शब्दार्थः, अलक्षितं कस्याप्यगोचरं कृत्वोभयोरातङ्कस्य भयस्य शान्तिमातन्वद् विस्तारयद्, अन्येन केनापि मम मित्रेण विनयशतैरपि कदाप्येवं न कृतम् । तेन तु स्वयमेव कृतम्, तत इदानीं तन्मैत्रीमपास्य मया तमसा सह मैत्रीकृतेत्यर्थः । एतेनव वचनेन तम एव तत्र तामानेष्यति पुनरन्धकारे स्थितस्यालक्षितस्य मम सङ्गमे गाङ्गेयाङ्गया अपि तव जनावलोकनभयं नास्तीति—तां संश्रावयति, यतस्तव सन्निधौ स्थितोऽप्यहं श्यामत्वात् तमसाऽनुपलक्ष्य एकाकिन्यास्तवावलोकनेनापि का चिन्ता ? ततस्तम एवावयोरभयसङ्गमोपाय इति स्वयंदौत्यम् । एवं मधुररतिकृतोऽयं तमःप्रकाशयोर्विपर्य्ययः स्फुट एव । एवमेवाभिप्रेत्य प्रायः श्रीमद्वल्लभाचार्यचरणैः श्रीमद्भागवतसुबोधिन्यां व्रजजनप्रेमप्रकरणं

तामसप्रकरणत्वेनालेखि। एवमेवेदानीमार्षोदाहरणाग्रहमपास्य प्रायो महानुभावानां तथा मदन्तस्थितश्रीप्रभुश्रीमुखाविर्भूतानां मन्मुखद्वारेण निस्सृतमात्राणां वा पद्यानामेवोदाहरणे रसास्वादैकजीवनाद् रसिकजनानानन्दयिष्यामीत्यनुसन्धेयम्॥ ६०॥

यत्र निषेध एव विधिः। यथोक्तं श्रीरूपगोस्वामिचरणैः—

"स्मेरां भङ्गीत्रयपरिचितां साचिविस्तीर्णदृष्टिं
वंशीन्यस्ताधरकिसलयामुज्वलां चन्द्रिकेण।
गोविन्दाख्यां हरितनुमितः केशितीर्थोपकण्ठे
मा प्रेक्षिष्ठास्तव यदि सखे! बन्धुसङ्गेऽस्ति रङ्गः॥" इति।

कदाचित् कश्चिद् विशुद्धबुद्धिर्बन्धुवर्गैः सह श्रीमद्वृन्दावने यात्रार्थमागतस्तत्र श्रीमद्गोविन्दप्रतिकृतेरवलोकनमात्रे सञ्जातभावस्तां त्यक्तुं गृहं गन्तुमप्यनीशो बन्धुभिः प्रातिकूल्येन नौरिव बलान्नीयमानो विवशः पुरतोऽन्यं यात्रार्थमागच्छन्तं कमपि निजमित्रमवलोक्य तमुपदिशति—स्मेरामिति। "मा प्रेक्षिष्ठा इति निषेधव्याजेन आवश्यकविधिरयम्, तदेतन्माधुर्य्येऽनुभूयमाने सर्वं तुच्छं मंस्यसे तस्मादेतामेव पश्येत्यभिप्रायात्" इति श्रीजीवगोस्वामिभिर्लिखितम्। अस्मिन् पद्येऽत्यन्ततिरस्कृतवाच्यध्वनिना निषेधेऽपि विधावेव तात्पर्य्यम्। एवं स्फुट एव विपर्य्ययस्तयोः। स च तस्य कृष्णकृपया जन्मान्तरे साधनाभिनिवेशेन वा तत्रापि निदानं तत्कृपैवेति सद्यःसञ्जातरतिविशेषलेशकृतः॥

यथा कस्यचित्—

"असंमुखालोकनमाभिमुख्यं
निषेध एवानुमतिप्रकारः'

प्रत्युत्तरं मुद्रणमेव वाचो
नवाङ्गनानां नव एव पन्थाः ॥" इति ।

कदाचित् कृष्णो नवानुरागवत्या कान्तया सह निशि नवसङ्गमसुखमनुभूय प्रातर्निजप्रियसखस्य सुदाम्नः पुरतो रहसि तदानुभूतं सुखविशेषमनुवर्णयति—असंमुखालोकनमिति । अनुमतिः सम्मतिः । नवाङ्गनानां पूर्वानुरागवतीनाम्, न तु मुग्धानाम्, तत्र तादृशविभ्रमविशेषाभावात् । अत्र निषेध एवेति द्वितीयचरणेन विधिनिषेधयोर्विपर्य्ययसिद्ध्याऽस्मत्प्रयोजनसिद्धिः । इतरच्चरणत्रयन्तु पद्यरसास्वादार्थम्, तथा रतिकृतविपर्य्ययानन्त्यबोधनार्थञ्चेत्यनुसन्धेयम् ॥

यथा वा—

हसति दृशा वदति मृषा परुषा सरुषा भ्रुवा विभीषयति ।
मणिबन्धमोचनमिषाद्रसिका रसिकान्तिकं शनैर्याति ॥६१॥

अहो अस्मिन् निकुञ्जे माधवागमनं विनैव माधवीमुकुलितेति प्रोत्साह्य कौतुकावलोकनकैतवेन केनापि चतुरच्चेटकेन निलीनमाधवं कुञ्जं प्रवेशितायाः सहसा रसिकेन करकमलेन मृदुकलितप्रकोष्ठायाः परमरसिकायास्तस्याः कान्ताया रसविशेषपोषिकां चेष्टां मधुरप्रणयस्वभावसुलभां प्रियचेष्टां च लतारन्ध्रैरवलोकयन्त्यो ललितादयः परस्परमास्वादयन्ति—हसतीति । अत्र मृषा परुषा कठिना सती वदति, सरुषा भ्रुवा विभीषयति । अत्रापि मृषेति पुनर्योज्यम् । मणिबन्धः प्रकोष्ठः ॥६१॥

यथा वा—

वल्लभरुद्धगतेरधिकानन-
मानतो न न नेति न याति,
कैतवकोपकरम्वितकुञ्चित-
चिल्लिनटी नटनं न जहाति ।

भीषयतीव वचोऽपि वपु-
र्गुरुलोकभियैव शनैरपयाति
कोऽपि विशालविलोलविलोचन-
हासविधिस्तु विधिं विदधाति ॥ ६२ ॥

कदाचिद्वनविहारे कुसुमावचयमिषेण इतस्ततो गतासु सहचरीषु निर्जने माधवेन निरुद्धायाः कान्ताया रसविशेषमर्यी लीलां ता एव लीलयावलोकयन्त्यो मिथः कथयन्ति—वल्लभरुद्धगतेरिति । अधिकाननं कानने । चिल्लिर्भ्रुकुटिः । वचः कर्तृ भीषयतीव । वपुः कर्तृ शनैरेव, न तु शीघ्रमपयाति, ततोऽपसरतीत्यर्थः । इवेत्युत्प्रेक्षा । एवं पद्यद्वयेऽस्मिन् मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥६२॥

यत्रानुत्तरमेव प्रत्युत्तरम् । यथाह गोवर्द्धनः—
"गुरुसदने नेदीयसि चरणगते मयि च मूकयाऽपि तया ।
नूपुरमपास्य पदयोः किं न प्रियमीरितं प्रियया ॥" इति ।

कदाचिन्निजानुनयसहस्रैरपि अनासादितगुरुमानिनीप्रसादाभिर्ललितादिभिः निजकान्तां त्वमेवानुनयेति प्रेषितः कान्तः कथञ्चिदनुनीतकान्तस्तदा तत्कृतचातुर्य्यं प्रातः स्वप्रियसखीपुरतो निभृतमनुवर्णयन् तदिङ्गितज्ञत्वेन निजचातुर्य्यमपि व्यञ्जयति—गुरुसदन इति । मूकया किञ्चिदपि अवदन्त्या किं न प्रियमीरितं कथितम् ? किन्तु सर्वमेवोक्तमित्यर्थः । हे सखि ! मयापि तच्चदैव ज्ञातमिति । एवं मधुररतिकृताऽयमनुत्तरप्रत्युत्तरयोर्विपर्य्ययः स्फुट एव ॥

पुनः स एव—
"किञ्चिन्न यालपोक्तं न सप्रसादा निवेशिता दृष्टिः ।
मयि पदपतिने केवलमकारि शुकपञ्जरो विमुखः ॥"इति ।

अत्रापि पूर्ववावतारिका। किञ्चिदिति। सप्रसादा प्रसादसहिता दृष्टिरपि न निवेशिता न प्रापिता। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः प्रकट एव। अत्र पद्यद्वयेऽन्यत्स्पष्टार्थमेव। पद्यद्वयमिदं बहिर्मुखं मया बलाद् वैष्णवीकृतमित्यनुसन्धेयम्॥

यथा वा—

सुभग! सुमानवतीनां सम्मानमेव मानसं मानम्।
मौनममौनमिदानीं मामनुजानीहि जानीहि ॥६३॥

कदाचिद् गुरुमानिनीमनुनेतुं तदन्तिके सख्यानीतं कृष्णं प्रति बहिः सादरां धीरां पुनस्तदनुनयैर्गतमानां तत एवावलम्बितमौनां विज्ञाय काचित् चतुरा सहचरी श्रीकृष्णमनुवदति—सुभग इति। हे सुभग! हे सुन्दर! सुमानवतीनामुत्तममानवतीनां मानसं मनसि भवं तत्र स्थितमित्यर्थः। अन्यत् स्पष्टमेव। अयं भावः—अनया यावद्भवतः सम्माननं न कृतम्, तावन्मनसि मानं जानीहि। अत एवाहं भवदन्तिके सहायार्थं स्थिता। इदानीन्तु अनया मौनमङ्गीकृतम्, [1]मौनमेव प्रतिवचनं जानीहि। ततश्च मामनुजानीहि गन्तुमाज्ञापय, मम प्रयोजनाभावाद्। यथेच्छं रमस्वेति भावः। पद्यत्रयेऽत्रैवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥६३॥

यत्राशिरस एव सहस्रशिरसः।

यथा वा—

प्रणयमया दयितकृते सततं करकलितजीविता जगति।
इति विशिरसोऽपि रसिकाः सहस्रशिरसां शिरोमणयः॥६४॥

कश्चिद्भक्तः कमपि कृष्णासक्तं भक्तमवलोक्य तद्भावलालसः सजातीयाशयं प्रति किञ्चित्तदनुभावं वर्णयति—प्रणयमया इति। हे

१—तव मौनमित्यपि पाठः।

मित्र! एते रसिका इति हेतोः अशिरसो भवन्ति, अर्थात् दृश्यमानशिरसोऽपि न शिरो येषान्ते अशिरसः। बहुवचनमत्रादरार्थम्। इति—इति किम्। यद्‌यितकृते दयितस्य श्रीनन्दनस्य किञ्चिद्दर्शनस्पर्शार्थं सततं करकलितजीविताः सततं निरन्तरं करे कलितं कृतं जीवितं यैस्ते निजजीवितदानेनापि प्रियदर्शनादिसाधका इत्यर्थः। तत्र हेतुगर्भं विशेषणम्—यतः प्रणयमयाः प्रेमैकप्रधानाः। अतः जीवनस्य शिरोऽधीनत्वात् तदर्थं तदपि दातुं वदान्या इत्यर्थः। तेपि सहस्रशिरसामपरिमितशिरसां शिरोमणयः, तैरपि शिरो धार्य्याः; तेषामाश्चर्यसुखदतया कान्तिविशेषविवर्द्धनाच्च तेभ्योऽप्यधिकतमा इति भावः। एवं रतिविशेषकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥६४।

यथा वा—

सखि! मम शिरोऽस्य लगुडीसङ्गमसुखसङ्गि कन्दुकं भवतु।
एवमशिरसां पुरतः सहस्रशिरसो बताऽशिरसः ॥६५॥

काचित् श्रीकृष्णे परमानुरक्ता दुःखशतैरपि यथाकथं तत्सङ्गसम्बन्धं समीहमाना श्रीवृन्दावने सखिभिः सह लगुडकन्दुकक्रीडाभिरतं निजदयितमवलोक्य प्रेम्णा शनैः सखीं प्रति वदति—सखीति। हे सखि! इति प्रेमार्त्तिव्यञ्जिकेयं सम्बुद्धिः। अत्र कार्ये सख्येन किञ्चित्सहायं त्वमेव रचयेत्यभिप्रायः। मम शिरोऽस्य पुरतो दृश्यमानस्य श्यामसुन्दरस्य कन्दुकं क्रीडनकं भवतु इति प्रार्थये। कीदृशं कन्दुकम्—अस्य लगुडीसङ्गमसुखसङ्गि लगुडी ईषद्वक्राग्रा यष्टिस्तस्याः सङ्गमस्तत्र सुखं तस्य सङ्गोऽस्यास्तीति तथा, तत एतत्करकमलसंसर्गिलगुडसंसर्गसुखानुभवभाग्यभाजनमित्यर्थः। एतद्वचनं श्रुत्वा सा सखी तां सविस्मयमाह—एवमित्युर्द्धेन। एवं यथा त्वं स्वशिरः प्रियकन्दुकं कर्त्तुमिच्छसि तथा अशिरसां शिरोहीनानां त्वद्विधानां पुरतोऽग्रे सहस्रशिरसः शेषादयो बहुभारं वोढुमीशा अशिरसः—न शिरो येषान्ते तथा। बतेति खेदे हर्षे वा। निज

दयितसुखक्रीडनकन्दुकार्थं निजदेहात्प्रायो दूरीकृतशिरसस्तवाग्रे शेषादयस्तु अशिरसः, त्वमेव सहस्रशिरस्का इति भावः। तेषां तथा प्रेमभाराऽसहत्वात्। मधुररतिकृतो यं विपर्य्ययः स्फुट एव ॥६५॥

यत्राऽचक्षुष एव सहस्रचक्षुषः। यथा प्रथमे श्रीसूतः—

"न्यरुन्धन्नुद्गलद्बाष्पमौत्कण्ठ्याद् देवकीसुते।
निर्यात्यगारान्नोऽभद्रमिति स्याद्बान्धवस्त्रियः॥"

न्यरुन्धन्निति। अत्राचक्षुष्ट्वं नाम अश्रुमुखादिभिर्दर्शनराहित्यमेव ज्ञेयम्। बान्धवस्त्रियः बान्धवाश्च स्त्रियश्च श्रीकृष्णं पश्यन्तः देवकीसुते तस्मिन् औत्कण्ठ्यात् प्रेमोत्कलिकया उद्गलद् बलाद्बहिः प्रकटीभवद् बाष्पमश्रुपुञ्जं बलान्न्यरुन्धन् रुरुधुः। अत्र हेतुः— "अयं नोऽगारान्निर्यातीत्यशकुनशङ्कया" इति श्रीधरस्वामिपादैर्व्याख्यातम्। मुख्यो हेतुस्तु बाष्परोधने तद्दर्शनोत्कलिकैव, तथैव प्रेम्णः परमस्वारस्यात्। एवमश्रुनिरुद्धनेत्रतया दर्शनानीशा अपि सहस्रचक्षुषः अपरिमितनेत्रास्तत्रैव प्रेमाधिक्यदर्शनात्। एवं विविधरतिकृतोऽयमचक्षुःसहस्रचक्षुषोर्विपर्य्ययः स्फुट एव॥

यथोक्तं दशमे श्रीशुकेन—

"वासोभिः पीतकौशेयैर्भूषणैश्च महाधनैः।
अर्हयित्वाश्रुपूर्णाक्षो नाशकत्समवेक्षितुम्॥"

वासोभिरिति। अत्र मुखं नेत्राभ्यां तन्माधुर्य्यमवलोकमानानां सभासदां मध्ये अश्रुनिरुद्धनेत्रतया श्रीधर्मसुतस्य युधिष्ठिरस्य परमप्रेममयत्वेन सहस्रनयनत्वं प्रस्फुटमेव। दास्यसंवलितवात्सल्यकृतोऽयं व्यत्ययः॥

यथा वा—

चिरं चकोरीकृतचारुनेत्रा
रूपामृतं हन्त पिबन्तु सन्तः।

प्रियावलोकप्रणयाश्रुपूर-
निरुद्धनेत्रास्तु सहस्रनेत्राः ॥६६॥

कदाचित्सायं वृन्दावनादायान्तं पथि निभृतमवलोकयन्तीषु निभृतं प्रेमवतीषु कामपि विपक्षां प्रियमुखकमलसमवलोकनसञ्जात-सुखविकसितनयनां पुनरन्तिके दयितमुखसम्मुखतामात्रसञ्जात-हर्षाश्रुविलसन्नयनां निजसखीं मुख्यां सासूयं सस्मितं साभिमानतया-ऽवलोकयन्तीमवलोक्य सासूयं निजसखीं प्रति किञ्चिदुदन्तमिव वदन्तीं तामेवाक्षिपति—चिरमिति । चिरं बहुकालं चकोरीकृतानि चकोरवदत्यार्त्तिवन्ति कृतानि चारूणि चाञ्चल्यादिनयनगुणवन्ति नेत्राणि यैस्ते तथाभूताः सन्तो रूपामृतम् अर्थादस्यैव रूपमेवामृतं ये पिबन्ति ते कामं पिबन्तु । अत्र रूपस्यामृतरूपकेण मुखस्य चन्द्रत्वा-रोपः । यतः सन्तः तेऽपि साधव एवेत्यर्थः । तु भिन्नोपक्रमे परन्तु इत्यर्थः। हे सखि ! शृणु ते सहस्रनेत्रा सहस्रमपरिमितानि नेत्राणि येषान्ते तथा। ते के? ये प्रियावलोकप्रणयाश्रुपूरनिरुद्धनेत्राः प्रियस्या-वलोके तदुच्छलितप्रणयेन यानि अश्रूणि तेषां पूरः प्रवाहस्तेन निरु-द्धानि आच्छादितानि नेत्राणि येषान्ते। प्रेम्ण स्वल्पत्वात् पूर्वेऽश्रुहीनाः द्वाभ्यामेव नेत्राभ्यां पश्यन्ति, प्रेम्णः जातिप्रमाणाभ्यामाधिक्येन अश्रुयुक्ता अपि नेत्रसहस्रैः पश्यन्तीत्यर्थः । अतः पाचित् मनसि मुधा-भिमानं मा कुरुतादिति तानाक्षिपति । एवं मधुररतिकृतोऽयमचक्षुः-सहस्रचक्षुषोर्विपर्य्ययः प्रस्फुट एव ॥६६॥

यथा वा—

सुखं मुखाम्भोजमधूनि साधवः
पिबन्तु धन्याश्चलदङ्कमधुव्रतैः ।
रागोदयाद् दृष्टिभिया निर्मीलित-
द्विचक्षुषस्तु द्विसहस्रचक्षुषः ॥६७॥

अयि तापसि ! अस्मदधीश्वरीयं व्रजेश्वरी निजदर्शनामृत-सञ्जीवितसकलव्रजस्य स्वतनयस्य स्वयमेव विविधभूषणादिभि-रलङ्कृतस्याङ्कगतस्यापि विशङ्कं मुखमाधुरीमवलोकयन्ती कदापि दासीभिरपि नावलोकिता तत्किमिति धनिष्ठिकादिभिः पृष्टा पौर्ण-मासी सामान्यतः प्रेमतारतम्यमिव वर्णयन्ती तस्याः प्रणयप्रेम प्रक्रियारहस्यसारसौभाग्यमेवाभिव्यञ्जयति–सुखमिति। हे धनिष्ठिके ! शृणु, अत्र जगति ये धन्या भाग्यभाजो निजैश्चलदृङ्मधुव्रतैः चलै-स्तृपोत्तरलैः दृश एव मधुव्रता मधुपास्तैः मुखाम्भोजमधूनि स्वप्रेम-विषयस्य मुखमेवाम्भोजं तस्य मधूनि माधुरीः द्वाभ्यां द्वाभ्यामेव नेत्राभ्यां पिबन्ति यतः साधव तेऽपि श्लाघनीया एवेति भावः। तुशब्दो भिन्नोपक्रमे परन्तु—इत्यर्थकः। ते द्विसहस्रचक्षुषो द्विगु-णितसहस्रचक्षुषः सन्ति। के ते ? ये रागोदयाद्रू रागस्य प्रेमविशेषस्य रवेरिव अनिरुद्धादुदयाद्धेतोः या स्वस्यैव तस्मिन् दृष्टिदोपसंसर्गेण भीः भयं तया निमीलितद्विचक्षुषः निमीलिते मुद्रिते द्वे निजचक्षुषी-यैस्ते तेभ्योऽपि धन्याः, तत्रैव प्रेमविशेषदर्शनात्। अतोऽन्येषु सर्वेषु नेत्रद्वयेन प्रेम्णा पश्यत्स्वपि सा व्रजेश्वरी प्रेम्णा निमीलितनयनापि नेत्रसहस्रद्वयेनावलोकयतीति व्यञ्जितम्। अत्र वत्सलरतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥६७॥

यथा वा—

मुकुन्दमुखमाधुरीं चपलदृक्चकोरैरलं
निपीय नवमीदशापरवशां समीपं गताः।
विलोक्य ललितादयो दरनिमीताक्षीं मुदा
सहस्रनयनाधिकामहह मेनिरे राधिकाम् ॥६८॥

कदापि पूर्वरागवत्याः कान्तायाः कामपि परमप्रेमदशामद्भुता-मवलोक्य ललितादिस्वप्रणयसखीसभाजनैः परमप्रेमामृतरसमाज-

नतया सभाजिताया मुख्यायास्तदानीन्तनमुदन्तं काश्चित्सख्यः सानन्दं परस्परमास्वादयन्ति—मुकुन्दमुखमाधुरीमिति। मुकुन्दस्य परमानन्दप्रदस्य मुखस्य या माधुरी सौन्दर्यं चपलैराकिमङ्गिर्दृक्चकोरैः। अत्र नेत्रयोः प्रपातॄणां बहुलत्वाद् बहुत्वम्। अलमत्यर्थं निपीय सादरमवलोक्य। नवमीदशा मूर्च्छाख्या तस्याः परवशां पारवश्यं प्राप्ताम्।

तदुक्तं भरतेन—

"चक्षूरागः प्रथमं चिन्तासङ्गस्ततोऽथ सङ्कल्पः।
निद्राच्छेदस्तनुता विषयनिवृत्तिस्त्रपानाशः॥
उन्मादो मूर्च्छा मृतिरित्येताः स्मरदशा दशैव स्युः।" इति।

राधिकां ललितादयः सख्यः तत्समीपं गताः सत्यः। कीदृशीं राधिकां—दरनिमीलितार्द्धा मूर्च्छायामपि प्रियदर्शनानन्दसंस्कारविशेषादीषन्मुद्रितनयनाम् इत्यद्भुतत्वम्। एवंभूतां तां विलोक्य मूर्च्छयाकृतकृष्णदर्शनप्रत्यूहामपि। अहहेति आश्चर्ये। सहस्रनयनाधिकां सहस्रनयनैर्यः पश्यति ततोऽप्यधिकदर्शनां तां मुदा आनन्देन मेनिरे। अत्रापि मधुररतिकृतोऽयमचक्षुःसहस्रचक्षुषोर्विपर्य्ययः स्फुट एव॥६८॥

यथा वा—

परयत्सु सत्सु प्रियमप्यकस्माद्
वियोगवीता मृगयन्ति कान्तम्।
वैचित्यसम्पद्घनसारशैत्य-
निरुद्धनेत्रास्तु सहस्रनेत्राः॥६९॥

अहो भाग्यं केषाञ्चिद्दपूर्वरसिकानां यद्दर्शावसरे निदाघ एवेति प्रेमवैचित्यवतीं कान्तां प्रति सोपहासं शैव्यावचनमसहमानः श्रीकृष्णचन्द्रः क्षणं तूष्णीं स्थित्वा किञ्चित्सामर्षा विशाखां प्रति श्लोकमेकं सामान्यतया पठन् तामधिक्षिपति—पश्यत्सु इति। हे विशाखे!

सत्सु त्वद्विधेषु साधुषु प्रियं निजदयितं पश्यत्सु विलोकयत्स्वपि अकस्मात्सहसा प्रत्यक्षतो दृश्यमानेऽपि तस्मिन् वियोगवीता वियोगेन विरहेण वीता वेष्टिताः सन्तः तं कान्तं मृगयन्ति—तत्पुरत एव क्वासि कान्तेति ये गवेषयन्ति—ते तु सहस्रनेत्राः। अन्ये नेत्रद्वयेन पश्यन्ति, ते तु नेत्रसहस्रेण पश्यन्तीत्यर्थः। कीदृशास्ते—वैचित्यसम्पद्घनसारशैत्यनिरुद्धनेत्राः प्रेमोन्दमादेन यद्वैचित्यं विचित्तता तस्य सम्पत् समृद्धिः सैव घनसारः कर्पूरः तस्य शैत्यं शीतलत्वं तेन निरुद्धानि मुद्रितानि नेत्राणि येषान्ते तथा प्रियदर्शनानन्दशीतलत्वनिमीलितनेत्रा इत्यर्थः, तत्रैव परमप्रेमदर्शनादिति भावः। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः ॥६६॥

यथा वा—

विलोक्य कान्तौ विकसन्ति सख्यः
प्रेमोन्मदास्तत्र वदन्ति खिन्नाः।
तावेव तल्पाद् गुरुभीतितान्तौ
निशान्तमालोक्य गतौ निशान्तम् ॥७०॥

विलोक्येति। अत्र सख्य इति कर्त्तृपदम्। कान्तौ विलोक्य विकसन्ति—इत्यन्वयः। मधुररतिकृतोऽयं विपर्य्ययस्तयोः ॥७०॥

यथा वा—

निशम्य कृष्णाभिमुखं गतानां
कोलाहलं गोकुलवासिनां यः।
धावन् करे दत्तकरः स्वबन्धोः
प्रेम्णा भवान्धोऽपि सहस्रनेत्रः ॥७१॥

एवं तावदचक्षुष इत्यत्र लक्षणाङ्गीकारेणैतत्प्रकरणपद्यानि व्याख्यातानि तत एवेदानीं मुख्यया वृत्त्यापि तत्साधयितुमुदाहरणा-

न्तरमाहुः—निशम्येति । कश्चिद्भवान्धो जन्मान्धः । अत्र भवपदेन कदाचित् पूर्वदृष्टे तस्मिन् प्रेमपरवशतया धावनं निरस्तम् । गोकुलवासिनां पुरुषाणां स्त्रीणां च कोलाहलम्—रे दिनताप ! अपयाहि ; अरे ! जीवञ्जीवा विरहविवशं स्वजीवनं सञ्जीवयन्तु; अहो ! प्रकाशभाञ्जि भवन्त्विन्दीवराणि; श्रीकृष्णचन्द्रोऽयमुदयमेति—इत्यादिलक्षणं निशम्य श्रुत्वा श्रीकृष्णाभिमुखं धावन् दर्शनानीशोऽपि प्रेम्णा सहस्रनेत्रः । प्रेममयेण नेत्रसहस्रेण पश्यति, अन्ये तु नेत्रद्वयेनैवेत्यर्थः । कीदृशो भवान्धः—स्वबन्धोः भ्रातृपुत्रादेः करे दत्तकरः, बन्धुना गृहीतहस्त इत्यर्थः । कीदृशानां गोकुलवासिनाम्—सायं वनादागच्छतः ससखस्य श्रीकृष्णचन्द्रस्य वेणुशृङ्गतालदलगीतादीनां गोगणहम्बारावपरिरम्भितानां कोलाहलं निशम्य कृष्णाभिमुखं गतानां प्राप्तप्रायाणाम् । एतच्च तं धावन्तं पश्यतः कस्यचित्तत्र भक्तिमतः प्रेमिभक्तस्य वचनं ज्ञेयम् । एवं रतिविषयकृतोऽयं विपर्य्ययस्तयोः स्फुट एव ॥७१॥

यत्राऽबाहव एव सहस्रबाहवः ॥

यत्रेति । स्फुटार्थः ॥

यथा वा—

मुदाकराभ्यामतिसादरं सदा
सन्त्येव सेवारससौख्यभागिनः ।
मुखाम्बुजालोकनजादिसात्त्विक-
ग्रस्ताविहस्तास्तु सहस्रबाहवः ॥७२॥

कदाचित्परमानुरक्तो रक्तकः श्रीवृन्दावने त्रिविधपवनसंसर्गेण सुखं प्रसुप्तस्य स्वप्रभोर्निजमृदुकराभ्यां चरणतलमुपलालयन् ससम्भ्रमं सम्मुखनिहितनयनः सञ्जातस्तम्भसंस्तम्भितहस्तः पत्रकादिभिरपहस्य ततः शनैरपसारितः सलज्जः प्रौढापि किञ्चिद्वदन्

यथार्हमेवाह—मुदाकराभ्यामिति। मुदा सानन्दं कराभ्यामेव श्रतिशयेन सादरं यथा स्यात्तथा सेवारससौख्यभागिनः सेवायां पादसंवाहनादिलक्षणायां यो रसस्तेन सौख्यं तस्यैव भागो भाग्यमस्ति येषान्ते भवद्विधाः सहस्रशः सन्त्येव स्वसेवां कुर्वन्तु। तुशब्दो भिन्नोपक्रमे। परन्तु तेऽस्मद्विधास्तु सहस्रबाहवः। सहस्रबाहुभिर्विविधां तदेकवेद्यां सेवां कुर्वन्तीत्यर्थः। कीदृशास्ते सहस्रबाहवः—मुखाम्बुजालोकनजादिसात्त्विकग्रस्ता अस्य मुखाम्बुजस्यावलोकनं ततो जातश्चासौ आदिसात्त्विकः स्तम्भस्तेन ग्रस्ता आक्रान्ता अत एव विहस्ता हस्तसंचलितक्रियया रहिता अपि। एतेन स्वभावसुलभया प्रौढ्या स्वस्य विविधप्रच्छन्नसेवासम्पादकत्वम्, परमप्रेमभाजनत्वञ्च व्यञ्जितम्। पुनः स्वस्य स्तम्भपरवशत्वञ्च सूचितम्। तच्च यथार्थमेव। सामान्यतः सेवारतानामपेक्षया सद्यःसञ्जातसात्त्विकानां प्रेमाधिक्यात् सहस्रबाहुत्वं युक्तमेव नात्र विषये कश्चिदपि संशयः। एवं दास्यरतिकृतोऽयमबाहुसहस्रबाह्वोर्विपर्य्ययः स्फुट एव ॥७२॥

यथा वा—

भाले विशाले रचयन्तु सन्तः
तमालपत्रादि करद्वयेन।
मुखेन्दुसन्दर्शनजातकम्प-
निरस्तहस्तास्तु सहस्रहस्ताः ॥७३॥

अहो गोपालमौलेः सकलकलानिधेर्भवतस्तिलकरचनाकौशलमवलोकितं तदलमायासेन अतो दूरादेवेदानीं मदीयचित्रविचित्रकरचनाचातुर्य्यमवलोक्यावधारयेति ललितया धिशङ्कमपसारितस्तद्रचनायामतिसलालसः तस्याः प्रागल्भ्यमीषदसहमानो रसिकशिरोमणिर्मनागवलम्बितमौनः साभिमानं सादरं शनैः सस्मितमाह—भाले विशाल इति। अयि परमप्रेमायत्तियलिते! ललिते! श्रए,

ये सन्तः साधवः सर्वथा निर्विकारा अर्थात्त्वद्विधा इति विरुद्धलक्षणया अपरिमितप्रेमवतां विविधविकारवत्त्वं ध्वनितम् । पुंस्त्वेन निर्देशस्तु प्रागल्भ्ये कटाक्षलेशं व्यञ्जयति, प्रागल्भ्यस्य पुरुषोचितत्वात् । तेन करद्वयेन तन्मात्रेणैव । यद्वा, करद्वयेनेत्यत्र वीप्सा ज्ञेया । द्वाभ्यां द्वाभ्यां कराभ्यामादरविशेषेणेत्यर्थः । भाले, अर्थात् कान्ताया एव तमालपत्रादि तिलकादि । "तमालपत्रतिलकचित्रकाणि विशेषकम्" । इत्यमरः । आदिना मकरिकापत्रञ्च रचयन्तु रचनाविशेषेण कुर्वन्तु, यतस्ते सन्तः । कीदृशे भाले—विशाले सौभाग्यसम्पत्समावेशोचितपरिणाहे । तदुक्तं सामुद्रिके—

"भाले विशालता स्त्रीणां सुष्ठुसौभाग्यमन्दिरम् ॥" इति

तुरत्रापि भिन्नोपक्रमे । परन्तु ते सहस्रहस्ता अस्मद्विधा इत्यर्थः । तस्मिन् बहुत्वनिर्देशस्तु नायकस्वभावसुलभं साभिमानत्वं व्यञ्जयति । तदुक्तं श्रीभरतेन—

"त्यागी भिमानी[1] कुशलो रतेषु" इत्यादि । कीदृशास्ते सहस्रहस्ताः—मुखेन्दुसन्दर्शनजातकम्पनिरस्तहस्ताः मुखमेवेन्दुस्तस्य सन्दर्शनं सम्यग्दर्शनम् । पूर्वन्तु किञ्चिद्दर्शनेऽपि लालसैव तिलकक्रियासेवावसरे भाग्योदयात्तज्जातमिति संशब्दार्थः । तेन जातो यः कम्पः सात्त्विकपञ्चमस्तेन निरस्ता न्यक्कृता निजसेवाता निवारिता हस्ता येषान्ते तथा । अतो बाहुसहस्रभारेणालसाः प्रभोराज्ञां धृत्वैव सकम्पाः सेवाचतुरैः साधुभिरपसारणीया एवेति सोत्प्रासोक्तिस्तथा (?) प्रेममयबाहुसहस्रभारालसत्वेन प्रभोः सेवां यथावत्कर्तुमनीशा अपि प्रभुणा निजान्तिके परमकृपापात्रतया सततं स्थापनीयाः, ते साधवस्तु निर्विकारतया प्रकटप्रेमाल्पभाववन्तः सेवाचतुरा अपि दूरेऽपसारणीया इति व्यञ्जयति । एवं मधुररतिरता: पूर्वोक्तयोर्विपर्ययः स्फुट एव ॥७३॥

१—भूराऽभिमानी—इति वा पाठः स्यात् । आर्षो वा संयोऽकारलोपः ।

यथा वा—

मृदुं प्रियं प्राप्य पुरः कलाविदः
कुर्वन्तु गाढं परिरम्भविभ्रमम्।
रोमाञ्चिताङ्गैः परिरभ्यते जनैः
शनैः सशङ्कं स सहस्रबाहुभिः ॥७४॥

मृदुमिति। ननु कनकलता इव व्रजवनिता निजभुजप्रतानैः कलिन्दनन्दनीकूलतमालबालमिव श्यामलकोमलकलेवरं कान्तं दृढं परिरभ्य सर्वाः प्रतिस्वं सुखयन्ति, त्वमेव एका नवयौवनालङ्कृताकृतिरपि गाढमालिङ्गय रहसि नन्दनन्दनं किमिति नानन्दयसीत्युक्ता वृन्दया वृन्दावनेश्वरी सामान्यतो जनवृत्तान्तमिव कथयन्ती आत्मनः प्रेमामृतसारसर्वस्वमाधुरीरसाभिज्ञत्वं व्यञ्जयति—मृदुमिति। मृदुं कुवलयदलकोमलाङ्गम्, प्रियं स्वविषयकप्रीतेराश्रयम्। प्रीञ् धातोः "इगुपधज्ञाप्रीकिरः कः" इति कर्त्तरि कः प्रत्ययः। अत एव स्वप्रीतिविषयम्, तेन तत्तद्विषयकप्रीतेराश्रयरूपं नेति ध्वनितम्। पुरोऽग्रतः प्राप्य ये (ते ?) जना गाढं दृढं यथा भवति तथा परिरम्भलक्षणं विभ्रमविलासविशेषं कुर्वन्तु; यतस्ते कलाविदः कामकेलिकलासु कोविदाः, न तु प्रेमक्रियाविद इति ध्वनिः। तुर्भिन्नोपक्रमे। परन्तु यैः रोमाञ्चिताङ्गैः प्रियदर्शनमात्रेण कण्टकिताङ्गत्वात् शनैः, न तु बलेन, तथापि सशङ्कं परिरभ्यते, तैः प्रियः सहस्रबाहुभिः परिरभ्यते। अतो हे वृन्दे! ताः परिमितप्रेमवत्यो या गाढं तमालिङ्गन्ति। शनैः सशङ्कं परिरम्भणकर्त्र्या मया तु सहस्रबाहुभिः परिरभ्यत इति स्वप्रेमपरिणाहो व्यञ्जितः। अत्रापि मधुररतिकृतोऽयमबाहुसहस्रबाह्वोर्विपर्य्ययः सम्यक् स्फुट एव। नात्राधिकनिरूपणापेक्षेति ॥७४॥

यत्राऽपद एव सहस्रपदः ॥

यत्रेति। अपदः प्रेम्णा पादक्रियारहिताः ॥

यथा वा—

येषां मनो निमग्नं मुखमधुरिमणीव मक्षिका मधुनि।
पदमपि न गन्तुमीशाः सहस्रपादाः परे द्विपदाः ॥७५॥

कदाचिद्गम्भीराशयतया प्रच्छन्नप्रायसमस्तसात्त्विकसंवीतं निजप्रेममधुरिममधुपानमदनिपतितमवलम्बितवृक्षमूलं कमपि परमासक्तं सेवासावधानैः साधारणभक्तैः सभ्रूभङ्गं सस्मितं सविस्मितमवलोकितमवलोक्य रसिकशिरोमणिः शतशोऽनुभूततादृगवस्थः सद्यः समुदितकृपया मनाङ् मसृणितनयनस्तमभिमोदयन्, तत्प्रेमसेवामेवानुमोदयन्, तानपि प्रेमसारसर्वस्वमुपदिशति—येषामिति। अहो विपरीतेयं प्रेमपदवी। ये पदमपि प्रेष्ठसमीपात् प्रेम्णा गन्तुं सेवार्थमपि चलितुमनीशाः न समर्थास्ते तु सहस्रपादाः, अर्थात् सहस्रचरणैः करणीयां सेवां प्रेममात्रेणैव कुर्वन्तीत्यर्थः। अपरे तादृशप्रेमाभावाद् विविधसेवार्थमितस्ततो धावमानास्तु द्विपदाः, पदद्वयोचितसेवाचतुरा एवेति भावः। परन्तु तेऽपि तद्विधा भविष्यन्तीति कृपया वैमनस्यपरिहारोऽपि ज्ञेयः। कीदृशास्ते—येषां मनः मुखमधुरिमणि, अर्थान्निजदयितस्यैव मुखकमलमाधुर्ये निमग्नं नितरां मग्नं हस्ताद्गतमेवेत्यर्थः। एतेन मधुरिम्णो गाम्भीर्य्यं मनसो गुरुत्वञ्च व्यञ्जितम्। कस्मिन् का इव? मधुनि सारघे मक्षिका इव। यथा तत्र निमग्ना मक्षिका मनागपि गन्तुं न क्षमते तथेति भावः। एवं मधुररतिविशेषकृतोऽयमपत्सहस्रपदोर्विपर्य्ययः स्फुट एव ॥७५॥

तदुक्तम्—

"दशशतशिरसमशिरसं शतभुजमभुजं सहस्रपदमपदम्।
रचयति शतमतिममतिं गतिरीतिविषमा रतेः कापि॥" इति

दशेति। स्पष्टार्थेयमार्या॥

यत्राऽनिद्रत्वमेव सनिद्रत्वम् ॥

यत्रेति। यथा निद्रायां सर्वविस्मृतिपूर्वकमात्मसुखं तथा तत्र जाग्रदवस्थायामपि विरहमोहमूर्च्छादिभिः सर्वविस्मृतिपूर्वकं प्रियानुभवसुखमनुभूयते। तस्य सुखत्वन्तु श्रीरसामृतसिन्धौ यथा--

"रतिनिसर्गोष्णप्रबलतरानन्दसान्द्ररूपैव।
उष्माणमपि वमन्ती सुधांशुकोटेरपि स्वाद्वी" ॥ इति।

यथोक्तं भगवता—

"तथाहमपि तच्चित्तो निद्रां च न लभे निशि।
वेदाहं रुक्मिणा द्वेषाद् ममोद्वाहो निवारितः ॥" इति।

तथाहमिति। तच्चित्तस्तस्यां रुक्मिण्यामेव चित्तं यस्य, अतो हे द्विज! निशि रात्रावपि निद्रां न लभे। चकारोऽप्यर्थे। इति विनिद्रत्वसनिद्रत्वयोर्मधुररतिकृतोऽयं विपर्य्यासः स्फुट एव ॥

तथैवोक्तं श्रीरूपगोस्वामिभिः—

"हस्तोदरे विनिहितैककपोलपाले-
रश्रान्तलोचनजलस्नपिताननायाः।
प्रस्थानमङ्गलदिनावधि माधवस्य
निद्रालवोऽपि कुत एव सरोरुहाक्ष्याः ॥" इति।

कृतमथुराप्रस्थानस्य दयितस्य विरहसन्तापेन नितान्ततान्तायाः कान्तायाः स्मरदशां तुरीयां निद्राच्छेदरूपां विषमदशां सहचरीं प्रति काचित्सवाष्पं सशिरःकम्पं वर्णयति--हस्तोदर इति। माधवस्य कदाचिच्छ्रुतमधुवंशोद्भवतया कठिनस्येत्यर्थः। अन्यथा गमनासम्भवात्। प्रस्थानमङ्गलदिनावधि प्रस्थानमेव मङ्गलं तस्य दिनं तदवधि तत आरभ्येत्यर्थः। अत्र दुःखदस्यापि प्रस्थानस्य मङ्ग-

लत्वकथनं प्रेम्णा पुनरागमनाय शुभसूचकम्, केवलस्य प्रस्थानपदस्य तत्प्रतियोगित्वात्। तस्याः सरोरुहादया अपि निद्रालवोऽपि कुतः, न कुतोऽपीत्यर्थः। सरोरुहाणां रात्रौ मुकुलितत्वरूपा निद्रा जायते; एतस्या नेत्रसरोरुहयोः रात्रावपि निद्रा नास्तीत्यपि शब्दार्थः। कीदृश्यास्तस्याः—हस्तोदरे हस्तस्य मध्ये विनिहितैककपोलपालेः वि विशेषेण चिरं निहिता एका कपोलपालिः कपोलस्थली ययेति तथा। इति स्वभावोक्तिरलङ्कारः। पुनः कीदृश्याः—अश्रान्तलोचनजलस्नपिताननायाः, अश्रान्तं निरन्तरं प्रवाहरूपाणि यानि लोचनयोर्जलानि तैः स्नपितं सर्वतो धौतमाननं मुखं यस्याः सा तस्याः। अत्र स्नपिताश्रान्तपदाभ्यामश्रूणां बहुत्वं व्यञ्जितम्। एवञ्च मधुररतिकृतोऽयं पूर्वोक्तयोर्विपर्य्ययः स्फुट एव॥

प्रह्लादसंहितायाञ्च—

"भगवानपि गोविन्दः कन्दर्पशरपीडितः।
न भुङ्क्ते न च स्वपिति चिन्तयन् वो ह्यहर्निशम्॥" इति।

भगवानिति। "कच्चित्स्मरति नः साधो! गोविन्दः प्रस्तुते क्वचित्"। इत्यादि पृष्टवतीर्गोपसुन्दरीः प्रति श्रीमदुद्धववाक्यम्। भगवानैश्वर्यादिषड्गुणपरिपूर्णतया सततमस्मद्विधैरनुचिन्तितोऽपि वो युष्मान् अहर्निशं चिन्तयन् न भुङ्क्ते न च स्वपिति—इति तस्यापि तदवस्थत्वमुक्तम्। कीदृशः—कन्दर्पशरपीडितः। तत्र हेतुगर्भं विशेषणम्—यतो गोविन्दो गोकुलेन्द्रः। गोकुलवासिनामिन्द्रतया सततं तत्सङ्गवशात्परमप्रेमवान् जात इति भावः। एवं व्रजजनविषयकः कृष्णस्य मधुररतिकृतोऽयं तयोर्विपर्यासः स्फुट एव॥

यथा कस्यचित्—

"याः पश्यन्ति प्रियं स्वप्ने धन्यास्ताः सखि! योषितः।
अस्माकन्तु गते कान्ते गता निद्राऽपि वैरिणी॥" इति।

कदाचित् प्रियविरहस्फूर्तिमतीनां गोकुलयुवतीनां संसदि मयाद्य स्वप्ने ससल। सोऽलयः सायं वनाद् व्रजं प्रति व्रजन् श्रीव्रजेन्द्रनन्दनोऽवलोकित इति वदन्तीं कामपि स्तुवन्ती काचिन्निपुणा स्वनिन्दयापि तस्याः परिमितप्रेमवत्त्वं व्यञ्जयति—याः पश्यन्तीति। याः प्रियं स्वप्ने पश्यन्ति ता धन्या इति स्तुतिव्याजेन निन्दैव, अस्माकन्तु कान्ते गते निद्राऽपि गतेति निजभाग्यनिन्दया निजस्तुतिरेव। ततो याः स्वप्ने पश्यन्ति ता निद्रावत्त्वेन परिमितप्रेमवत्य एव, यासां प्रियं विना निद्रा एव गता तास्तु परमप्रेमवत्य इति स्तुतिनिन्दाभ्यामेव व्यञ्जितम्। एवञ्चात्र कृष्णविषयकमधुररतिकृतोऽयमनिद्रत्वसनिद्रत्वयोर्विपर्य्ययः स्फुट एव॥

यत्र वियोग एव संयोगः॥

यत्रेति। वियोगपदं प्रथमान्तं सप्तम्यन्तं वा॥

तथाह जयदेवः—

"पश्यति दिशि दिशि रहसि भवन्तं
त्वदधरमधुरमधूनि पिबन्तं॥
नाथ! हरे! सीदति राधावासगृहे॥" इत्यादि।

काचित्सहचरी निजप्रियसख्या विषमाद्भुतां विरहदशां कृष्णस्य पुरतो निवेदयति—पश्यतीति। दिशि दिशि प्रतिदिशं भवन्तमेव यत्र यत्र पश्यति तत्र तत्र भवन्तमेव पश्यति नान्यम्। तच्च रहस्येव न तु व्रीडया सखीनामपि संसदीति विरहस्याऽप्रतीकारत्वं व्यञ्जितम्। कीदृशम्—त्वदधरमधुरमधूनि पिबन्तं त्वच्छब्दोऽत्रान्यपर्यायः, 'त्वच्छब्दावन्यपर्य्यायौ' इति स्मरणात्। ततस्त्वत् त्वत्तोऽन्यस्या अधरमधूनि सर्वविस्मारकान्यासवानि पिबन्तमेव पश्यतीत्यर्थः। नाथ! हरे! हे नाथ! हे हरे! राधा वासगृहे सङ्केतगृहे सीदतीति। अत्र 'नाथ हरे' इत्येकयैव सम्बुद्ध्या वैयाकरणैकवेद्यमाक्षेपमपि

व्यञ्जयतीति सूक्ष्मदृशाऽऽधेयम्। एवं मधुररतिकृतोऽयं वियोगसंयोगविपर्य्यासः स्फुट एव ॥

पुनर्यथा स एव—

"दृश्यसे पुरतो गतागतमेव मे विदधासि।
किं पुरेव ससम्भ्रमं परिरम्भणं न ददासि॥" इत्यादि।

काचित्सहचरी विरहविवशतया कान्तप्रलपितं कान्तान्तिके कथयति—दृश्यस इति। प्रकट एवार्थः। एवं कान्तस्य कान्ताविषयकमधुररतिकृतोऽयं पूर्वोक्तयोर्विपर्य्यासः स्फुट एव। प्रायः सर्वमेवेदमष्टपदीद्वयमेतत्प्रकरणोदाहरणमेवेति ज्ञेयम् ॥

यथा वा—

आदानपानलेपैः काश्चिद् गरलोपतापहारिण्यः।
सदसि स्थितैव सिद्धौषधिवल्ली काऽपि जीवयति ॥ ७६ ॥

कदाचित् पूर्वानुरागाक्रान्तस्वान्ततया विषविषमविशिखवेदनाक्रान्तः कान्तः क्वचिदलङ्कृतसखीसंसदं कान्तां दूरादेवावलोक्य मनाग् मुदितमनाः सोत्कलिकमप्रस्तुतप्रशंसया सविनयं वृन्दामाह—आदानपानेति। अत्र पूर्वार्द्धे काश्चिदिति बहुवचनमुत्तरार्द्धे कापीत्येकवचनं क्रमेण तत्र तत्र विरलत्वमविरलत्वञ्च व्यञ्जयति। जीवयतीत्युक्तिः दर्शनं विना जीवनेतरतुल्यत्वं व्यञ्जयति। स्पष्टमन्यत्। अत्रापि मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥ ७६ ॥

यथा वा—

स्थितिमिह ललिता तेऽजानती पश्य राधे!
सुबलमतिचलेन त्वां विधायाभिसार्य्य।

उदितनयनलास्यं सुप्रसादं ! ममास्यं
सलुठितमनु हास्यं कर्तुमारादुपैति ॥ ७७॥

कदाचिदलङ्कृतकान्तसङ्केतनिकुञ्जमन्दिरः सजलजलदसुन्दरः श्रीवृन्दावनपुरन्दरः प्रेयसीविरहविवशः प्रेममाध्वीकमदपरवशतया, तदनुध्यानावेशविशेषाभिनिवेशेन श्रीवृन्दावनचक्रवर्त्तिनीं निजान्तिकवर्त्तिनीमेव मन्यमानो मनाक् प्रमुदितमनाः क्षणान्तरे च स्वविरहविह्वलतामनुभावैरवगम्य स्वयमेव त्वरितं प्रस्थितां यथाकथञ्चित्तां प्रसाद्य, प्रसाध्य, अभिसार्य्य, यौवनमदमन्थरगतां शिरीषकुसुमसुकुमारतया मनागध्वश्रमतान्तां कान्तामनुगतां राधिकां शनैर्निजान्तिकमानयन्तीं ललितां दूरादेवावलोक्य विस्मितः सपुलकः स्वांसनिहितनिजभुजलतां तां मुधा राधामेव साक्षादिव पश्यन् सस्मितप्रलपितमाह—स्थितिमिति। ते—इति पदस्योभयत्र सम्बन्धः। ते ललिता त्वदादेशञ्चापहाय स्वयमेव तां जीवयितुं करुणया समागता या इह मदन्तिके स्थितिमवस्थानमजानती ते त्वदीया प्रीतिप्रतीतिपात्रं वशीकरणकर्मणि कुशला वाम्योपदेशविशेषैकगुरुः परमप्रेष्ठसखी ललितेत्युपालम्भगर्भितेन वचनेन दुर्दैवात् सहजसरलस्वभावतया अहं ते कस्यामपि गणनायां नेति ध्वनितम्। मम हास्यादिविडम्बनं सा प्रायस्त्वदनुमतेनैव विदधातीत्यनुध्वनिः। "यस्य यत्सङ्गतिः पुंसो मणिवत्स्यात्स तद्गुणः।" इति न्यायेन तत्सख्यास्तव तथा निभृतवाम्याचरणं नानुचितमिति प्रत्यनुध्वनिः। सुबलं मत्प्रियनर्मसखं मत्सहचरत्वात्सरलस्वभावं निजनामार्थं सार्थयन्तमिव बलान्मोचितमणिबन्धं मित्रप्रतारणमेवं मया न कदाचित्करणीयमिति शीघ्रान्मुहुर्वदन्तं मम शिरःशपथदापनादिलक्षणेनातिबलेन त्वां राधां विधाय, तं राधां कृत्वेत्यर्थः। सुबलं राधावेशं कृत्वेति भावः। पुनस्त्वमभिसार्य्य अभिसारं कारयित्वा त्वामिवानुगता सती आराद्विकटादेव सद्यस्तथा गमने निजकैतवाभिव्यक्तिभिया दूराद् वरसानोरुपत्यकाप्रदेशात्। "आराद् दूरसमीपयोः" इति विश्वः। उप अस्मत्समीपमेति

आगच्छति, हे राधे ! त्वं पश्येत्युक्तिं स्वसखीकैतवं त्वयैव द्रष्टव्यं तत्कौतुकस्य दर्शनीयतमत्वं वा व्यञ्जयति । ननु तर्हि "किञ्चित्प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्त्तते" इत्युक्तेर्महामतेस्तस्यास्तथोद्यमे किं प्रयोजनमित्यपेक्षायां निजान्तःकैतवाभिव्यञ्जनमेव प्रयोजनमित्याशयेनाह—ममास्यं मदीयं मुखं त्वामागतां तन्मुखाभिशम्य पूर्वं संप्रसादं प्रसन्नतासमन्वितं, पुनस्त्वामागतामवलोक्योदितनयनलास्यमुदितं नयनयोर्लास्यं नृत्यं यस्मिन् तत्तथा । अत्यन्तानन्देन नेत्रयोश्चापल्यं नृत्यत्वेनोत्प्रेक्षितम् । एतेन तया सह त्वदागमनेऽहमेवंभूतः सर्वदा भवामीति ध्वनितम् । त्वद्वियोगे प्रसादरहितमस्तनयनलास्यं ममास्यं भवतीत्यनुध्वनिः । एवमेव ललितां तदाशाश्चानपेक्ष्य करुणया मुहुरागमनं विधेयमिति प्रत्यनुध्वनिः । एवंभूतं कर्तुमनु पश्चात् तत्कैतवाभिव्यक्त्यनन्तरं सलुठितम् । भावे निष्ठा । भूतललुठनसहितमिति हास्यविशेषणं क्रियाविशेषणं वा । उपलक्षणञ्चैतत् मिथः करतलताडनभ्रूकुटिताण्डवाङ्गुष्ठचापल्यादीनाम् । मम हास्यञ्च कर्तुम्, अतस्त्वं मां मदीयोऽयमिति मनसि मन्यसे चेत्तर्हि सविधमागतयोरनयोरन्तर्हितमञ्चलग्रन्थिं निबध्य, निकुञ्जान्निरुध्य ललिताम्, हास्यं तथैवाद्यामपि कारयेति प्रार्थनं ध्वनितम् । मधुररतिरत्नोऽयं नयोर्विपर्य्यय स्फुट एव । श्रीराधाया वामप्रकृतितया मधुरस्नेहाधारतया प्रेयसि मदीयवामपक्षपाताश्रयतया ललितायशेनि संप्रातप्रसिद्धाऽभिधानतया च ललितां तदनुमतिं वा विना स्वत. सहसा प्राणप्रेयसोऽपि तस्य सविधे गमनं असम्भावितमिति पुनर्भङ्गिप्रज्ञापनादिविशेषाऽऽविर्भावाभावात् साधारणमर्थान्तरमुपेक्षितमित्यनुसन्धेयमत्र काव्यरसलग्नचित्तैर्विदग्धैः ॥७३॥

पश्चात् लीलाशुकः कर्णामृते—

"हे देव ! हे दयित ! हे भुवनैकबन्धो !

हे कृष्ण ! हे चपल ! हे करुणैकसिन्धो !

हे नाथ ! हे रमण ! हे नयनाभिराम !
हा हा कदा नु भवितासि पदं दृशोर्मे ॥" इति ।

कदाचित् काचित् कान्तविरहविवशा नवमदशाशय्यायां क्षणं विश्रम्य, पुनरुत्थाय, दिशोऽवलोक्य, अयि सख्यः! नूपुरशब्दः श्रूयते, स च न दृश्यते, तदत्र कुञ्जे कयापि रममाणः शठोऽयं तिष्ठतीति वदन्त्याः पुनरुन्मादावेशादन्यसम्भोगचिन्हाङ्कं तमागतं पुरः पश्यन्त्यास्तं प्रत्यमर्षोदयः, पुनर्गतमिव गत्वा आतपश्चात्तापादौत्सुक्योदयः, अतस्तयोः सन्धिः। तल्लक्षणम् "सरूपयोर्भिन्नयोर्वा सन्धिः स्याद्भावयोर्युतिः" इति। "अधिक्षेपापमानादेः स्यादमर्षोऽसहिष्णुता" इति। "कालाक्षमत्वमौत्सुक्यमिष्टेक्षातिस्पृहादिभिः" इति। तथा तावेव भावावाश्रित्य भावशाबल्यञ्च "शबलत्वन्तु भावानां समर्दः स्यात्परस्परम्" इति। अत्रामर्षानुरागासूयोदय्यावहित्थौत्सुक्यानुगामिमतिदैन्यचापलानि उन्मादोद्गताभ्यां भावसन्धिभावशावल्याभ्यां प्रलयमित्याह--अन्याङ्गनासम्भुक्तं तं मत्वा मर्षोदयात्सहसा निजधीराधीरमध्यात्वगुणमाश्रित्य सवाष्पं वक्रोक्त्या सम्बोधयति—अन्याभिः सह दीव्यसीति देवस्तत्सम्बुद्धौ हे देव! अतस्त्वं तत्रैव गच्छेत्यर्थः। तल्लक्षणम्--"धीराधीरा तु वक्रोक्त्या सवाष्पं वदति प्रियम्" इति। तदैवावधीरणाद् गतमिव तं मत्वा आतपश्चात्तापात्तद्दर्शनौत्सुक्येनाह—हे दयित! त्वन्तु प्राणादपि दयितोऽसि, कथं त्यदयसे? तत्पुनर्दर्शनं देहीत्यर्थः पुनरागत्यानुनयन्तमिव तं मत्वा अमर्षानुरागासूयोदयाद् धीरमध्यात्वमाश्रित्य वक्रोक्त्या सोल्लुण्ठमाह--हे भुवनैकबन्धो! तवात्र को दोषः? न केवलं ममैव सर्वगोपीनामपि किमुत तासामेव वेणुनादाकृष्टानां भुवनानां तदन्तर्गतस्त्रीणामपि बन्धुरसि तत्समाधानार्थं गच्छेत्यर्थः। तल्लक्षणम्--

"धीरा तु वक्ति वक्रोक्त्या सोल्लुण्ठं सागसं प्रियम्"। इति। पुनर्गतमिव मत्वोत्सुक्यानुगतमत्याख्यभावोदयादाह—हे कृष्ण! हे श्यामसुन्दर! चित्ताकर्षक! चित्तं त्वया हृतम्, किं मे मानेन?

तत् सकृदपि दर्शनं देहीति भावः । पुनरागत्य प्रिये ! मया बहिरेव स्थितं न कुत्रापि गतं प्रसीदेत्यनुनयन्तमिव मत्वा औत्स्योदयादधीर-मध्यात्वगुणमाश्रित्य सरोषमाह—हे चपल ! वल्लवीवृन्दभुजङ्ग ! पुरस्त्रीचौर ! गच्छ गच्छेत्यर्थः । तल्लक्षणम्—

"अधीरा परुषैर्वाक्यैर्निरस्येद्वल्लभं रुषा" । इति ।

पुनर्गतमिव मत्वा हन्त अवधीरणातोऽयं पुनरत्र नेष्यतीति दैन्योदयात् सकाकु आह—हे करुणैकसिन्धो ! यद्यप्यहमपराधिनी तथापि त्वं स्वस्य करुणाकोमलत्वाद् दर्शनं देहीत्यर्थः । पुनरागत्य प्रिये ! किमिति मुधा मानेन कदर्थयसि ? प्रसीद इत्यनुनयन्तमिव मत्वाऽमर्षानुगावहित्थोदयाद् धीरप्रगल्भागुणमाश्रित्य सौदासीन्य-माह—हे नाथ ! त्वं तु व्रजवासिनां गोरक्षितासि, का नाम हतधी-स्त्वां नाभिभाषेत ? किन्तु ब्राह्मणीभिर्व्रतार्थं मौनं आहितास्मि, तत् क्षन्तव्योऽयं ममापराधः । तल्लक्षणम्—

"उदास्ते सुरते धीरा सावहित्थञ्च सादरा" । इति ।

पुनर्गतमिव मत्वा मुहुर्निरस्तोऽसौ नायास्यत्येवेति चापल्योद-याद् यदि कृपया पुनर्दर्शनं ददाति तदा स्वमेव तं कण्ठे ग्रहीष्यामीति सदैन्यमाह—हे रमण ! सदा मां रमयसीति रमणस्त्वमिदानीमप्या-गत्य तथा कुर्वित्यर्थः । पुनरागतं मत्वा तिरस्कृतागन्तुकामर्षभावेन प्रबलसहजौत्सुक्येनाक्रान्तमनस्तया तदाश्लेषाय प्रसारितबाहुयुगला तमलब्ध्वा जातवाह्यस्फूर्तिः सविक्लवमाह—हे नयनाभिराम ! नयनानन्दन ! त्वद्दर्शनमन्तरा न कदाचिदपि मे नयनयोरानन्दो-त्पत्तिसम्भवः । अतो झटित्येवागत्य नेत्रे आनन्दय । एतदेव प्रार्थयते—*कदा नु मे दृशोः पदं भवितासि ? कदा कस्मिन् काले मे मम दृशो-*र्नेत्रयोः पदं गोचरो भवितासि भविष्यसीति । हा हा—इत्यव्यय-मतिखेदे । मधुररतिकृतोऽयं तयोर्विपर्ययः । व्याख्यानमिदं श्रीकृष्ण-दासकविराजमहाशयानाम् । अत्र लिखितमपि पद्यमिदमन्वयव्यतिरे-कात्मकत्वात् प्रकरणान्ते ज्ञेयम् ॥

तथैव चैतन्यचरितामृते—

"बाष्पव्याकुलितारुणं चलचलन्नेत्रं रसोल्लासितं
हेलोल्लासचलाधरं कुटिलितभ्रूयुग्ममुद्यत्स्मितम्।
राधायाः किलकिञ्चिताञ्चितमसौ वीक्ष्याननं सङ्गमा-
दानन्दं तमवाप कोटिगुणितं योऽभून्न गीर्गोचरः॥" इति

वाष्पेति। अत्र किलकिञ्चितवर्णने साक्षादसङ्गमेऽपि सङ्गमादपि कोटिगुणितं सुखमवापेति मधुररतिकृतमिदं तयोर्वैपरीत्यम्॥

यथा वा—

स्फुरति स एव हि परितः सदननिरोधोऽपि मे मुधैवालि!।
तस्मिन् वसति मनो मे मनसि मनोमोहनः सदा वसति॥७८॥

परमरूपवती युवती मम तनयवधूरियं येन केनापि व्याजेन बहिर्निःसृत्य आनन्दराशिं व्रजेन्द्रनन्दनं सानुरागं विलोकयतीति कयापि श्वश्र्वमन्यययाऽन्तःसदने निरूद्धा काचित्पूर्वरागवती निजप्रियसखीं प्रति सकरुणं सवाष्पं स्वसङ्कटं विशदयति—स्फुरतीति। हे आलि! नाहं तमवलोकयामि, स एव मम परितः स्फुरति। यत्र यत्र मम नेत्रं पतति तत्र तत्र स एव दृश्यते। हा किं करोमि? पुनरयं तया जरत्या कृतो मे मम सदननिरोधोऽपि गृहान्तर्निरोधोऽपि मुधा वृथैव। तत्र हेतुः—शास्त्रेषु परमदुर्जयतया ख्यातमव्रीडं मत्पार्श्वतोऽपगतं मनो मया बहुधा निरूद्धमपि तस्मिन्नेव वसति। किञ्च, स मम मनोमोहनः। मे मनस्येव सदा वसतीति सर्वथा मनसो नष्टत्वं व्यञ्जितम्। मोहनस्य तस्करस्य तत्रैव निवासात् तस्याप्यद्भुतत्वं व्यञ्जितम्। एवं मधुररतिकृतोऽयं पूर्वोक्तयोर्विपर्यासः स्फुट एव॥७८॥

भ्रमर गीतेऽपि एवंविधानि बहून्युदाहरणानि॥

भ्रमरेति। "मधुप! कितवबन्धो!" इत्यादिसर्वाण्येव श्रीरूपगोस्वामिचरणैरुज्ज्वलनीलमणौ चित्रोज्ज्वलपोदाहरणे लिखितत्वाद्

तद्व्याख्यानुसारेण तेषां मध्ये वियोग एव संयोगः स्फुट एव तासां मधुररतिकृतः ॥

यत्र संयोग एव वियोगः ॥

यत्र संयोग इति । अत्रापि संयोगपदं प्रथमान्तं सप्तम्यन्तं वा ॥

तथा—

"कुररि ! विलपसि त्वम्" इत्यादीनि बहून्युदाहरणानि ॥

कुररीति । तैर्व्याख्यातमेव । कृष्णविषयकसमञ्जसरतिकृतोऽयं तयोर्विपर्ययः स्फुट एव । व्यतिरेकोक्तिस्तु पूर्ववदेव ज्ञेया ॥

यथा वा—

दयितान्तिके रहस्यपि विसृजति विरहो न सखि ! ममानुगतिम्
मानसमहह मदीयं निमिषमिषेणालमाकुलीकुरुते ॥७९॥

काचिदभिसारिका दयितसेवितस्य कुञ्जस्य द्वारान्तः प्रवेश्य गन्तुकामां सहचरीं प्रति विरहवृत्तान्तवर्णनव्याजेन प्रियविषयकं स्वप्रेमातिशयं व्यञ्जयति--दयितान्तिक इति । हे सखि ! त्वमेतावत्-पर्य्यन्तमेव मामनुगतासि, अयं विरहस्तु मया सह अतीव सख्यं विदधाति, यतो दयितस्यान्तिके निकटे तत्रापि रहसि सुतरामेकान्तेऽपि ममानुगतिमनुगमनं न विसृजतीति विरुद्धलक्षणया स्तुतिव्याजेन निन्दैव । तामेव विशदयति—अहह इति खेदे । निमिषमिषेण पक्ष्मयत्नान्तरायमिषेण विरह एवायं तत्रापि मदीयं मानसमलमत्यर्थमाकुलीकुरुत इति तस्य स्वप्रयोजनसाधकत्वादात्मनेपदप्रयोगः । एवं मधुररतिकृतमिदं तयोर्वैपरीत्यं स्फुटमेव ॥७९॥

यथा वा—

इह न मम वयस्या दूषणं पश्यतास्याः
प्रियपरिजनवद्याऽऽयाति कान्तान्तिकेऽपि ।

प्रियपरिमलभीतो लज्जया हन्त नीतो
निजवपुषि विनीतो लज्जया विप्रलम्भः ॥८०॥

काचित् परमप्रेयसी बहिरन्तः प्रियविरहसंवीता सखीभिः प्रसाध्य प्रियान्तिकं नीतापि व्रीडयाऽवनतमुखी प्रियसंमुखमनवलोकयन्ती सखीभिरुपदिष्टा शनैस्ताः प्रत्याह--इह न ममेति । हे वयस्याः ! इह भवद्वचनोल्लङ्घने मम दूषणं न, किन्तु अस्या लज्जाया एव । तद्यूयं पश्यत । दूषणपदस्य देहलीदीपन्यायेनोभयत्र सम्बन्धः । कीदृश्या लज्जायाः--या मम परमविश्रम्भभाजनतया प्रियपरिजनवत् प्रियश्चासौ परिजनः सखीजनस्तद्वत् प्रियान्तिकेऽपि कान्तस्य निकटे रहस्यपि आयाति । तद्दूषणं विशदयति--यया लज्जया विप्रलम्भो वियोगो निजवपुषि नीतः संगोप्य स्थापितः । कीदृशो विप्रलम्भः--प्रियपरिमलभीतः प्रियस्य कान्तस्य यः सहजोऽङ्गपरिमलो मामभ्युपगत इव आगतस्तस्माद्भीतः, अतएव विनीतः, अर्थात् तामेव मां याहीत्यवनतः । कीदृश्या लज्जया--अलज्जया एवं करणे विश्वसितायास्तस्याः परमानौचित्याद् । हन्त इति खेदे । अतः परिजनाभासयाऽनया संगोप्य स्थापितो विरहः मामद्याप्यनुगत एव । लज्जा तु प्रियमुखावलोकने प्रत्यूहं करोतीति किं करोमि ? एवं प्रियविषयकमधुररतिकृतोऽयं पूर्वोक्तयोर्विपर्यासः स्फुट एव ॥ ८० ॥

यथा वा—

लभन्ते विश्रमं सर्वाः सुभ्रुवः प्रियसङ्गमे ।
आभीर्य्यस्तु भृशं भाविविरहानलभीरवः ॥८१॥

यथाह भरतः—

"योगे प्रियाचित्तवृत्तिर्वियोगमुपलालयेत् ।
शाण्डिल्यःसूत्रकृत्प्राह तामेव प्रेमसञ्ज्ञिताम् ॥" इति ।

स्पष्टार्थाविमौ श्लोकौ । अतो नात्र व्याख्यानापेक्षा ॥

यत्र मरणमेव जीवनम् ॥

यत्रेति । स्पष्टमेतत् ॥

यथा दशमे—

"तत्रैका विधृता भर्त्रा भगवन्तं यथाश्रुतम् ।
हृदोपगुह्य विजहौ देहं कर्मानुबन्धनम् ॥" इति।

तत्रैकेति । अत्र कर्मानुबन्धनदेहत्यागस्तस्या जीवनमेव, तत्क्षणमेव सच्चिदानन्दमयदेहप्राप्त्या भगवत्प्राप्तिनिदानरूपत्वात् ; तदेकप्रयोजनमेव भगवतस्तत्र गमनमक्षयाचनं च श्रीमद्वल्लभाचार्यचरणैः श्रीभागवतसुबोधिन्यां लिखितत्वाद् । अत्रापि मधुररतिकृतोऽयं तयोर्विपर्ययः स्फुट एव ॥

यथा च तत्रैव—

"¹अन्तर्गृहगताः काश्चिद् गोप्योऽलब्धविनिर्गमाः।" इति।

अन्तर्गृहगता इति । अत्रापि गुणमयदेहत्यागस्तासां जीवनाधिक', सद्योऽलौकिकदेहप्राप्त्या रासमण्डलपरिकरप्रवेशात् ॥

यथा वा उद्धवं प्रति हरेर्वाक्यम्—

"धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ।
प्रत्यागमनसन्देशैर्वल्लव्यो मे मदात्मिकाः ॥" इति।

धारयन्तीति । अत्र वल्लव्यः स्वभावत एव मयि अनुरक्ता मे मम अतिकठिनस्य परिमितप्रेम्णः सन्देशैः – 'आयास्ये' इति मृषोक्तैः— पाशैरिव निबध्य प्राणान् कृच्छ्रेण कष्टेन कथञ्चन कथं कथमपि प्रायः धारयन्ति । अत्र प्राय.पदं कदाचिद् विरहवह्नेः सूद्दीप्ततया दशमीं दशामपि प्राप्नुवन्तीति व्यञ्जयति । तर्हि कथं पुनर्जीवनमित्यपेक्षायां

१—अन्तर्गृहगता काश्चिद्‌ गोप्योऽलब्धविनिर्गमाः ।
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ॥ [भा० स्क० १० अ० २९]

पुनर्विशिनष्टि--मदात्मिका मयि अतिकठिने आत्मा जीवात्मा यासां तास्तथा। तासां मयि न्यस्तजीवात्मतया अन्तिकमागतोऽपि मृत्युः मृगयन्नपि जीवनमप्राप्य प्रतियातीत्यर्थः। एवं क्षणे क्षणे तासां जीवन-मरणे भवतः तत्र क्षणं तासां दशमी दशा तु सर्ववेदनानिवर्तकत्वात् जीवनाधिका, जीवनन्तु विविधतापसम्पादकत्वात् मरणाधिकम्, अतस्तत्समयसञ्जातमाधिं कस्यापि पुरतः कथयितुमयोग्यां मनः-पीडां मत्संदेशैर्विमोचयेत्युपदिशन्तं त्वां प्रेषयामीति भावः। पद्यद्वयेऽस्मिन् मधुररतिकृतोऽयं तयोर्विपर्ययः॥

यथा वा—

अलमातपैरनल्पैः सखि! शरतल्पैश्च विषधराकल्पैः।
यदुपायसार्थमाशा निरर्थयन्ती कदर्थयति ॥८२॥

अलमातपैरिति। अत्र ज्योत्स्ना, सुमनस्तल्पं (पुष्पशय्या), विसाकल्पं कमलनालैर्भूषणरचनमित्यर्थः, सख्या सन्तापोपशमनाय कृतं विरहभरात् सन्तापप्रदतया संख्या मम हिताय कृतं मरणोपायमातप-शरतल्पविषधराकल्पतया मन्यमाना तत्रोद्यतां सखीं सनिर्वेदं सनिःश्वासं शनैराह—एतैरातपादिभिर्मरणोपायैर्मम सुखाय कृतैरपि हे सखि! संख्यास्तयोचितैरलं परिपूर्णतास्तु। मा कुर्वित्यर्थः। यद् यतस्त्वया कृतं मत्सुखाय उपायानां सार्थं समूहं निरर्थयन्ती निर्थकतां नयन्ती इयमाशा प्रियप्रत्यागमनाशारूपा वैरिणी त्वत्तः प्रबला मां कदर्थयति। अत्र मामिति कर्मपदमाक्षेपलब्धम्। त्वत्कृतं मरणसुखमसहमाना मां जीवयत्येवेत्यर्थः। तच्च जीवनं तापप्रदत्वान्मम कदर्थनमेव। अत्र मधुररतिकृतस्तयोर्विपर्ययः॥८२॥

यथा वा—

साधयन्ति बहुधा मम सौख्यं
साधु मत्सुखसुखा मम सख्यः।

प्राणपालनपरा हि दुराशा
हा सदाऽनिनिषति स्वयमेव ॥८३॥

काचित् श्रीकृष्णविरहपरवशतया अतिखिन्ना निर्विण्णा मरणमेव मम जीवनमिति मनसि मन्यमाना निजप्रियसखीं शनैराह—साधयन्तीति । हे सखि ! एता मम सख्यः मदेकजीवना अपि एतस्या जीवनहानौ अस्माकमपि जीवनं न स्यादित्यविगणय्य बहुधा विषवह्न्यादिवत् सद्यःप्राणपरिपन्थिभिः सचन्द्रचन्दनचन्द्रिकादिभिर्विविधोपायैर्वियोगसन्तप्ताया मम साधु यथा भवति तथा सौख्यं जीवनहानिलक्षणं साधयन्ति, यतो मत्सुखसुखा मत्सुखमेव सुखं यासां ताः। तथापि मम हृदयवसतिरियं दुराशा दुष्टा निजजीवनार्थिनी प्रियप्रत्यागमनाशा सदा प्राणपालनपरा सततं मत्प्राणरक्षणपरा हा कष्टं पालनकैतवेन स्वयमनिनिषति अनितुं जीवितुमिच्छति, ममान्यथाभावे तस्या अपि तथात्वापत्तेः। "अन प्राणने" इत्यस्य सन्नन्तं रूपम् । यद्वा, हासदेत्येकं पदम्। इयं कुलिशादपि कठिना प्रियतमविरहे मम सखीभी रचितैः मरणोपायसहस्रैरपि जीवनं धारयत्येवेति लोके सखीजनेष्वपि मम हास्यप्रवर्तिकेत्यर्थः। मधुररतिकृतोऽयं तयोर्विपर्ययः ॥८३॥

यथा वा—

मलयाचलविषपङ्कं वपुषि विशङ्कं हितेहया दधती ।
हन्त मम रागरङ्कं कुशले ! किमलं कलङ्कयसि ॥८४॥

व्रजनवयुवराजवियोगरोगराजक्षतरतनु काचिदाभीरवरतनुरखिलगदवेदनाविपदवसादनभेषजाभिरामदि दशमीं दशां विपद्यनभिमुखीं सखीमिव मनागपि नानुयन्ती परमप्रेमसारसंचितसम्पन्नमतिः मनाक् तापोपशमनाय सचन्द्रचन्दनपङ्केनाङ्गमनुलेपयन्तीं सखीं सपारुष्यं शनैः सादरमियाह—मलयाचलविषपङ्कमिति। कुशले! हे चतुरे ! एकैव सम्बुद्धिरियं पद्यव्याख्यानारम्भे प्रथममुदीरिता

सखि ! साधु साधु, ममास्याः सख्या जीवनमिदमत्यन्तमहितमिति सम्यगवसितमिति व्यञ्जयति। उत्तरार्द्धे तु पुनः पठिता विरुद्धलक्षणया तस्याश्चातुर्य्याभावं व्यञ्जयतीति रसविशेषपोषकतयोभयत्राप्यनुसन्धेया। अत एव मलयाचलविषपङ्कं मलयाचलस्य यद्विषं तस्य पङ्कमज्ञातं चन्दनपङ्कमिदं न भवति, तस्य शीतलीकरणस्वभावत्वात्। इदं सन्तापातिशयसम्पादकत्वान्मलयाचलविषपङ्कमेव, सुष्ठ्‌ववसिततया त्वया सुविचार्य्यैवानीतमिति।अत्र मलयाचलपदोपादानं तस्मिन्नितस्ततः प्रसर्पत्सर्पसहस्रगलविलविनिर्गलदनर्गलगरलाविरलसेकसम्भावनया विषस्योग्रतमत्वं व्यञ्जयति। मम हितस्य जीवनप्रतियोगिलक्षणस्य ईहया कर्त्तुमिच्छया विशङ्कं गतशङ्कं यथा भवति तथा दधती लेपयन्त्यपि त्वं हन्त कष्टं मम रागरङ्कं रागः प्रेमा स एव रङ्को दरिद्रोऽसमृद्धः क्षीणोऽल्पतर इति यावत्। अत्र रागस्य रङ्केण रूपकम्। यदि रागः समृद्धोऽभविष्यत्तदा वियोगक्षणे एवान्यथाभावोऽभविष्यदित्यनुमानं व्यञ्जयति। तथा च प्रयोगो *मम रागोऽल्पतमो वियोगक्षण एव जीवनाभावकरत्वाभावात्*, यदेवं तदेवं याज्ञिकपत्नीवद्, निरुद्धगोपीसमूहवत्, कादम्बर्य्यादौ पुण्डरीकादिवत्, यन्नैवं तन्नैवमहमिवेति। हे कुशले ! तत्किमित्यलमत्यर्थं कलङ्कयसि कलङ्कितं करोषि। सर्ववेदनाविपदुन्मूलनस्यान्यथाभावस्य स्वसुखार्थमङ्गीकारेण रागस्यात्यन्तकलङ्कितत्वं स्यादेव। निर्दयस्यापि तस्य मद्दयितस्य मम सौख्याभावेनैव यदि सुखाधिक्यं तर्हि तथैवास्तु, तत्सुखसुखत्वेनैव रागस्य स्वच्छतासिद्धेः। अतो रङ्कस्य तस्य सकलङ्कित्वसम्पादनं निपुणायास्तव नैपुण्यहानिकरत्वान्नैवोचितमिति ध्वनिः। रागस्य कलङ्कप्रदत्वात्त्वया मम हितत्वेनावसितमपि मरणमहितमेव। हितन्तु प्रेम्णः निर्मलत्वनिदानं विरहविविधवेदनसहनदुःखेनैव यथाकथञ्चिज्जीवनमेवेत्यनुध्वनिः। अतः सद्यो मद्सुखमपश्यतो हरेरेभिरुपायैरलमिति प्रत्यनुध्वनिः। मधुररतिकृतोऽयं तयोर्विपर्य्ययः ॥८४॥

यथा वा—

अनल्पैरालेपैः शिशिरतरतल्पैः सुमनसां
विसानामाकल्पैः शशधरकरैरञ्जनिकरैः ।
ममोपायं रामा विदधति विरामाय विपदां
दुराशेयं वामाऽनिनयिषति हा मामतिकृशाम् ॥८५॥

प्रियतमविरहवह्निःशुष्यमहोष्मविवशवर्ष्मणः कस्याश्चिदोपरसन्तापशान्तिचिकीर्षया कयाचित् प्रियसख्याकल्पितैरालेपादिभिः पञ्चभिरुपायैः शतगुणितसन्तापाऽस्वस्थासीति पृच्छन्तीं कामपि सखीं सकरुणमाह—अनल्पैरिति । अत्रानल्पैरिति आलेपादित्रयस्य विशेषणम् । तच्च तदङ्गोष्मणः सद्यः शुष्यमाणानां तेषां मुहुरुत्तरोत्तरसम्पादनं बोधयत् सन्तापस्यानल्पतमत्वं व्यञ्जयति । अञ्जनिकरैरित्यत्रापि निकरपदं पूर्ववदेवार्थं सूचयति । रमयन्तीति रामाः सख्यो मम विपदां विरामाय निरसनाय, अर्थाञ्जीवनाभावाय एतैः करणरूपैरुपायं विदधति कुर्वन्त्येव । परन्तु इयं दुराशा दुर्दुष्टा मदीयं स्वास्थ्यमसहमाना आशा प्रियप्रत्यागमनाशाऽतिकृशामपि मामानिनयिषति अनयितुं जीवयितुमेवेच्छति । अन प्राणधारणे—इत्यस्य धातोर्णिचः सन्नन्तं रूपम् । यतो वामा कुटिला परदुःखदर्शनसन्तोषिणी । अतो दुराशायां सत्यां किं मम स्वास्थ्यं पृच्छसीति ध्वनिः । एतास्तु मुग्धा आशानिरसनोपायं न जानन्तीत्यनुध्वनिः । अतो विदग्धा त्वमेव, तत्र सख्येन कमप्युपायं रचयेति प्रत्यनुध्वनिः । हा शब्दोऽतिखेदे । एवमत्रापि मधुररतिकृतोऽयं विपर्ययः स्फुट एव ॥८५॥

यथा कस्यापि—

"तस्याः कुशलं जीवति कुशलं पृच्छामि जीवतीत्युक्तम् ।
पुनरपि तदेव कथयसि मृतां नु कथयामि या श्वसिति ॥"

मथुरायां संस्थितस्य श्रीकृष्णस्य मजात्प्रत्यागतस्य चोद्धव-

स्योक्तिप्रत्युक्तियुक्तमेतत्पद्यम्—तस्या इति । तस्याः कुशलमिति कस्याश्चित्प्रियतमाया गोपकिशोर्य्याः कुशलं पृष्ट उद्धवः प्राह—जीवतीति। तन्निशम्य हरिः पुनराह—भोः कुशलं पृच्छामि। तच्छ्रुत्वा स पुनराह—जीवतीत्युक्तन्तु। तदाकर्ण्यकृष्णः पुनरुवाच—पुनस्तदेव कथयसीति। तन्निशम्य सव्यङ्गं स पुनराह—या श्वसिति, तां नु निश्चयेन मृतामेव कथयामीति काका मरणमेव तस्याः कुशलं नान्यथेति ध्वनिः। ततस्त्वरितं त्वमेव व्रजं प्रयाहीत्यनुध्वनिः। इतरथा पुनर्महाविप्रतीसारं यास्यति भवानित्यनुध्वनिः। मधुररतिकृतोऽय तयोर्विपर्य्ययः॥

यथा वा—

तीव्रैस्तपोभिः स्वतनुं तिलीकृतां
संस्कृत्य निष्पीड्य नयामि तैलताम्।
विक्रीय तत्तत्कचसङ्गि चेत्सकृत्
सद्यस्तदा यामि मृतापि जीवितम् ॥८६॥

मनाक्प्रियतरसम्बन्धबन्धुरफलं मरणं जीवनमेवेति निश्चयवती परमानुरागवती कापि गोपयुवती स्वप्रियसखीं प्रति निजाभिलषितमुद्गिरति—तीव्रैरिति। तीव्रैरुग्रतरैर्बहुभिस्तपोभिः। उक्तिरियं तैर्विना मनोभिलषितसिद्धिं बोधयन्ती लालसातिशयेन तस्य दुर्लभतमत्वं व्यञ्जयति। तिलीकृतां तिलसमुदायतां नीताम्। "अभूततद्भावे च्विः"। स्वतनुं निजाङ्गं तुषलक्षणमलापाकरणेन सुमनःसौगन्धलक्षणातिशयाधानेन संस्कृत्य पुनस्तैलयन्त्रे निष्पीड्य तैलतां नयामि प्रापयामि। पुनस्तत्तैलं विक्रीय तद्रूपेणाहमेव प्रतिहट्टपथं विक्रयं प्राप्य, तैलस्य तदङ्गपरिणामरूपत्वात्। पुनस्तत्तैलं सकृदेकवारमपि तस्य सौन्दर्यसिन्धोः श्यामसुन्दरस्य कचसङ्गि कुन्तलस्पृक् चेत्कथञ्चित्स्यात्तदा तत्क्षणमेव सद्यस्तूर्णं पूर्वं मृताप्यहं जीवितं यामि। जीवितवती स्यामित्यर्थः। मधुररतिकृतो विपर्य्ययोऽत्रापि स्फुट एव ॥८६॥

यथा वा—

मृदस्तु मेऽङ्गं खनितं खनित्रकैः
खराधिरूढं बहुमुद्गराहतम्।
बन्धभ्रमातापवदल्पभाजनं
तचेत्तदीयाधरसङ्गि जीवयेत् ॥८७॥

मृदस्त्विति। अत्रापि पूर्ववावतारिका। मे मम अङ्गं वपुर्मृद् मृद्भावमस्तु प्राप्नोतु—इति विधातारं प्रति प्रार्थनायां लोट्। ततो मदङ्गं ममाङ्गं खनित्रकैः खननसाधनैः कुद्दालकादिभिः खनितमस्तु। "स्वार्थे कः"। पुनः खरे रासभपृष्ठेऽधिरूढमस्तु। पुनर्बहुभिर्मुद्गरै-राहतमस्तु। सम्यक् चूर्णितं भवत्वित्यर्थः। पुनर्बन्धभ्रमातापवदस्तु—बन्धो जलेन पिण्डीभावः, भ्रमश्चक्रारूढस्य भ्रमणम्, आतापः महानल-सन्तापः, तच्च तच्च तद्वत् तत्तद्युक्तमस्तु। पुनरल्पं लघु मसृणं मञ्जुलं कुञ्जकरूपं भाजनं पानपात्रमस्तु। तत्करकिसलयस्पर्शोत्थोपनयोग्य-मित्यर्थः। अत्राल्पपदं प्रियतमस्य परमसुकुमारत्वं व्यञ्जयति। तद्भा-जनं चेद् यदि कथञ्चन महाभाग्योदयेन तदीयाधरसङ्गि तस्य माधुर्य्य-सिन्धोः व्रजेन्द्रकुमारस्याम्बुपानादौ अधरस्पृक् स्यादिति शेषः। तदा तदैव मृद्भावेन मृतमपि मदङ्गं मामेव जीवयेत्। तदधरस्पर्श-मात्रेण मृताप्यहं जीवामीत्यर्थः। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥ ८७ ॥

यथा कस्यापि

"पञ्चत्वं तनुरेतु भूतनिवहाः स्वांशे विशन्तु स्फुटं
धातारं प्रणिपत्य किन्तु[1] शिरसा तत्रापि याचे वरम्।
तद्वापीषु पयस्तदीयमुकुरे ज्योतिस्तदीयाङ्गण-
व्योम्नि व्योम तदीयवर्त्मनि धरा तत्तालवृन्तेऽनिलः ॥"

१—नम्रशिरसा याचेऽहमेकं वरम्—इति पाठान्तरमन्यत्र दृश्यते।

वल्लभविप्रलम्भवनदहनगहनकीलावलिभिः परिरम्भिता चिरमनासादितघनाघनागमा दशमीं दशामुपगतामेव मन्यमाना कापि वृन्दावनकनकमल्लिकावल्लिर्निजमनसि निखिलवरदातुर्विधातुर्वरविशेषमीहते—पञ्चत्वमिति । मम तनुः पञ्चत्वं दशमीं दशामेतु प्राप्नोतु । भूतनिवहाः पञ्चभूतानि स्वांशे—स्व आत्मा अंशो यस्य स तस्मिन् निजनिजांशिनीत्यर्थः । भूतपञ्चके विशन्तु । स्फुटं तत्प्रकटमेवेति सर्वसाधारणत्वमभिप्रेतम् । तत्रापि प्रवेशसमयेऽपि । हन्त इति खेदेऽव्ययपदं निजाभिलषितस्यासुलभत्वं व्यञ्जयति । प्रणिपत्य साष्टाङ्गं नमस्कृत्य पयस्तु स्वांशिनि पयसि प्रवेशं गमिष्यत्येव, किन्तु दीनायां मयि करुणया तस्य महाभिमानिनः बहिरन्तरसितस्य केलिवापीष्वेव प्रविशतु—इत्येतावन्मात्रं प्रार्थनम् । एवमग्रेऽपि । अत्र क्रमातिक्रमस्तापातिशयेन चित्तास्वास्थ्यं व्यञ्जयति, "स्वस्थे चित्ते बुद्धयः सम्भवन्ति" इत्युक्तेः । वापीष्विति वृन्दावनीयानन्तनिकुञ्जेषु प्रतिकुञ्जं वृन्दया परमादरेण प्रेम्णा रचितां समस्तक्रीडासम्पदं बोधयति । तदीयमुकुरे तस्यादर्शे । तालवृन्ते तदीयव्यजने । एवं प्रार्थनेन मरणान्तरमपि तदीयसम्बन्धगन्धो मा विरमतु इति ध्वनितम् । एवञ्चेन्मरणमपि जीवनाधिकमित्यनुध्वनिः । एवं तस्यानुरागस्योन्नततमत्वमिति प्रत्यनुध्वनिः । मधुररतिकृतोऽयं विपर्य्यासः ॥

यत्र लघुत्वमेव गुरुत्वम् ।

यथोक्तं श्रीरूपगोस्वामिभिः—

"नर्मोक्तौ मम निर्मितोरुपरमानन्दोत्सवायामपि
श्रोत्रस्यान्तत‍टीमपि स्फुटमनाधाय स्थितोचन्मुखी ।
राधा लाघवमप्यसादरगिरां भङ्गीभिरातन्वती
मैत्रीगौरवतोऽप्यसौ शतगुणां मत्प्रीतिमेवादधे ॥"

अहो व्रजनवयुवराज ! भवता यदाज्ञप्तं त्वमेव तद्विनवद्

तामेव मां कृपया पुनर्दर्शयेति तदतीव दुष्करमिति दूतीस्वभावान्मुवदन्तीं वृन्दां श्रीराधायां पूर्वरागवान्नागेन्द्रः व्यञ्जितपरेङ्गिताभिज्ञत्वं स्वरसाभिज्ञत्वमभिवदन्निजाज्ञायाः सुकरत्वं व्यञ्जयति—नर्मोक्ताविति। अनादरगिरां भङ्गीभिर्मम लाघवमातन्वती राधा मैत्रीगौरवतोऽपि मत्प्रीतिमेवादध इत्यन्वयः। कीदृशी सा—मम नर्मोक्तौ नर्मणा परिहासेन या उक्तिः—वनविहारेण श्रान्तासि क्षणं निषीद, मत्कृतां चरणक्षालनवीजनादिसेवामुररीकुरु, सहजारुणचरणकमलैर्मदीयं निकुञ्जमन्दिरं सफलयेति तस्याम्। श्रोत्रस्यान्ततटी श्रोत्रस्य कर्णस्यान्तः प्रान्तस्तस्यापि तटीं कोटिमपि स्फुटं प्रकटमनाधाय कर्णमदत्वेत्यर्थः। स्थिता। अत्र स्फुटमनाधायेत्यप्रकटं सम्यगाधायेति ध्वनितम्। कीदृश्यां नर्मोक्तौ—निर्मितोरुपरमानन्दोत्सवायामपि निर्मितः कृत उरुर्बहुतरो यः परमानन्दस्तेन उत्सवो यया तस्यामपि। ततः क्षणं तूष्णीं स्थित्वा तत्सुखमनुभूय पुनः सावगुण्ठनं तूष्णीं स्थातुमनीशा सती उद्यन्मुखी अवगुण्ठनाच्चन्द्र इवोद्यन्मुखं यस्या सा मुखचन्द्रमीषत्प्रकाशयन्तीत्यर्थः। अनादरगिरां सनिरादरवाचाम् रे गोपकिशोर! निजश्यामतयैवातिगर्वितोऽसि, सतीजनेष्वेवं वक्तुं योग्यमयोग्यं वेति न जानासि, अतः क्वचिच्छलादावपि निजमुखमवलोकयेत्येवंविधानां विविधानां गिरां वाचाम्—भङ्गीभी रचनाविशेषैस्तूष्णीं स्थित्वा मनसि सद्यो रचिताभिः, न तु नैसर्गिकीभिः, मम व्रजेन्द्रनन्दनस्यापि लाघवं लघुत्वमातन्वती विस्तारयन्ती सा मैत्रीगौरवतोऽपि अन्यासां मैत्र्या कृतं यद् गौरवमादरविशेषस्ततोऽपि शतगुणां मत्प्रीतिं मम प्रसन्नतामेवादधे, न तु तदितरामित्येवशब्दार्थः। एवं तस्या निरादरक्रिययानुमितं निजाज्ञायाः सुकरत्वं तां प्रति ध्वनितम्। अतस्तदर्थं यत्नमाचरणीयमेवेत्यनुध्वनिः। एवं त्वं मां जीवयेति प्रत्यनुध्वनिः। एवं मधुररतिकृतो लघुत्वगुरुत्वविपर्ययः स्फुट एव। अत्र लाघवगौरवपदयोः प्रत्यक्षविन्यासादनादर एवादर इत्यत्र नानित्याप्तिः॥

यथोक्तं गोवर्द्धनेन—

"त्वामभिलपतो भामिनि मम गरिमगुणोऽपि हन्त[1] दोषाय।
पङ्किलकूलां तटिनीं पिपासतः सिन्धुरस्येव" ॥ इति ।

सङ्केतनिकेतकुञ्जान्तःस्थितं स्वविरहविवशं स्वकान्तं स्वसखीमुखादीषन्निशम्य सत्वरमभिसारिकाम्, तत्र तमनवलोक्य अवनतवदनां सप्रतिसाराम्, पुनः परिवृत्य गन्तुकामाम्, तमागतमेव जानीहीति परिजनानुनयेन कथञ्चिदुपविष्टां वासकसज्जाम्, पुनः प्रणयोत्कलिकया क्षणादेव विप्रलब्धाम्, तत्सौन्दर्य्यस्मरणसमुदितवहुवल्लभत्वस्फूर्तिसञ्जातासूयाम्, तदनन्तरं निजान्तिकमायान्तं सौन्दर्य्यसागरनागरं दूरादवलोक्य मनाग् मानवतीमनुनयन् रसिकनायकः स्वस्य विलम्बेनागमनं निजापराधाभावत्वं व्यञ्जयति त्वामिति । हे भामिनि ! त्वामेवाभिलपतः "सर्वं वाक्यं सावधारणम्" इति न्यायात् । सततं तवैव दर्शनादिमनोरथवतोऽपि मम सदन्वयोत्पन्नत्वेन सज्जनसम्भावितस्वभावत्वेन व्रजराजकुमारत्वेन च यो गरिमा लघिमप्रतियोगी समस्तजनादरणीयत्वलक्षणः स एव गुणः लोके गुणत्वेन प्रसिद्धोऽपि । हन्त इति खेदे । दोषायैव, अर्थात् मम तु त्वत्सम्बन्धलक्षणमहादोषोत्पादक एवाभूदिति भावः । उक्तमर्थं पूर्णोपमया विशदयति । पङ्किलकूलां पङ्किलं घनपङ्काकुलं तीरं यस्यास्तां तटिनीं नदीम् । अत्र तटिनीपदोपन्यासात् परिकुराङ्कुरेणान्यत्रावतरणमार्गाभावं व्यञ्जयति । पिपासतः पातुमीहतः सिन्धुरस्य हस्तिनः गरिमागुण इव । यदि दैवदयया तस्य लघुत्वमभविष्यत् तदा तदभिलपितपूर्तिरभविष्यत्तथा ममापि । इति मधुररतिकृतोऽयं पूर्वोक्तयोर्विपर्य्ययः स्फुट एव ।

यथोक्तं दानकेलिकौमुद्यां श्रीरूपगोस्वामिचरणैः—
"गुरुरपि गौरवचर्य्यया विहीना जयति सुरद्विपि राधिकानुरागः" ॥ इति

[1] —दोषतां यातः—इति प्रचलितपुस्तकेऽस्ति पाठः ।

यत्र स्तुतिरेव निन्दा।

यथा वा—

त्वय्येव सुभग सुतरां सेयं संभाविताश्रिता सरणिः।
संप्रति जगति जनानां वचसि किमपि मानसे किमपि ॥८८॥

कदाचिद् मधुरमधुरमृदुलतरविविधविनयवचनरचनाभिः कान्तामनुनयन्तं सहसा संजातगोत्रस्खलनतया अवनतविवर्णवदनं कान्तं धीरा मानवती किंचिदवगुण्ठनमपसार्य्याऽनुनीतस्मिता स्तुवन्तीवाह—त्वय्येवेति। हे सुभग! हे सुन्दर! इति संबुद्ध्या तस्य बहुवल्लभत्वं ध्वनितम्। ततस्तव तादृग् वचनमुचितमेवेत्यनुध्वनिः। अतो मम किं मानेन किं तवानुनयेनापीति प्रत्यनुध्वनिः। या संभाविताश्रिता संभावितैः सच्चरितैः साधुभिः सत्ययुगादौ आश्रिता सेविता सा सरणिः पदवी मार्ग इति यावत्। "सरणिः पद्धतिः पद्या" इत्यमरः। सुतरामतिशयेन त्वय्येव, तिष्ठतीत्याक्षेपलब्धम्, नान्यत्र दृश्यते इत्येवशब्दार्थः। यतः संप्रति इदानीं जगति सर्वस्मिन्नेव जनानां त्वद्व्यतिरिक्तानां सर्वेषामेव मनसि किमपि अन्यदेव, वचसि वचने किमपि अन्यदेव दृश्यते इत्यर्थः। अतो यदेव मनसि तदेव वचसीत्ययं सभावितमार्गः सत्यवक्तृत्वलक्षणः त्वय्येवेति स्तुतिर्निन्दैवेति मधुररतिकृतोऽयं स्तुतिनिन्द्योर्व्यत्ययः स्फुट एव ॥८८॥

यथा वा—

शिरस्तु सन्तो ददति स्वकीयं
निशम्य निन्दां दयितस्य तस्य।
श्रुत्वैव सद्यः स्तवमप्यमुष्य
दातुं शिरः स्वं वयमेव शूराः ॥८९॥

कदाचित् केनापि कंसमेवकेन कृतं नन्दनन्दनस्य निन्दनं निशम्य

सद्यस्तं हन्तुमुद्यतायुधैस्तदनुगैर्निन्दनसमयेऽपि प्रमुदितवदनत्वाद-पूर्वोऽयं भक्त इत्युपहसितः कोपि तन्माधुर्य्यामृतजीवातुकः निर्मञ्छनीकृतप्राणो बहिरेवाभिव्यक्तपुंभाव एते सानुरागं तन्मुखमवलोकयन्तः (न्ति ?) इति तादृशप्रेम्णः सहजस्वभावाभिज्ञनयनयोरपि सासूयः परमासक्तभक्तोत्तमः शनैस्तान्प्रत्याह—शिर इति। तस्य मदीयजीवनस्य सौन्दर्य्यसागरस्य दयितस्य, अर्थात्तेषां प्रीतिप्रेयोमयतया तस्य निन्दां निशम्य ये स्वकीयं शिरो ददति, ते ददतु दातुमुद्यताः भवन्तु। साधवः सन्तः समीचीना एवेति स्तुत्या निन्दैव। ददतीत्यत्र पूर्वमाङुपसर्गाप्रयोगः "शूरैरपि सदा ध्येयो जयात्पूर्वं पराजयः" इति न्यायेन ज्ञेयः। एवमग्रेऽपि। परन्तु अमुष्य तस्य मम प्राणप्रियस्य स्तवं स्तोत्रम्—श्रीकृष्णः परमसुन्दरः, परमरसिकः, युवतीनां मनोमोहन इत्यादिलक्षणम्—श्रुत्वैव सद्यस्तत्क्षणमेव स्वकीयं शिरो दातुं वयमेव शूराः, नान्ये भवद्विधा इति तेषामाक्षेपः। अयं भावः—यस्तु निन्दति स तु निःस्नेह एव ये, तु हन्तुमुद्यतास्तेऽपि स्वप्रभुं सखायं वा मत्वा तं पश्यन्तु, तत्र न ममासूयालेशोऽपि। ये तु "सुन्दरोऽयं रसिकोऽयम्" इति परोक्षेऽपि वदन्ति, तेभ्यः शिरः समर्पयितुं वयमेव शूराः। एवञ्च मधुररतिकृतोऽयं स्तुतिनिन्दयोर्विपर्य्ययोऽत्यन्तस्फुट एव ॥६८॥

यत्र निन्दैव स्तुतिरस्ति ॥

यत्रेति स्पष्टार्थः ॥

यथा वा—

"विशदं प्रनिवेशि पयोजमणि-
द्वितयं नसि चारुचाऽरुणितम्,
मृदुना सुषिरादधरेण कृतं
द्विजवृन्दमदः स्वरमासहितम्।

सखि! येन मनःपिहितप्रियसं-
-गमसूचनमेव सदाऽवसितम्,
तदनेन सदा निजसीमसितं
निजमन्दतयैव सितं हसितम् ॥६०॥

प्रियतमसमागमसमुदितविविधविलाससुखसमूहे तत्क्षणमिव संनीतसकलरजनीकां कथमप्युषसि मञ्जुलकेलिकुञ्जमन्दिरद्वारादितस्ततः सशङ्कमवलोक्य, शनैर्निःसृतां प्रसादसुमुखीं कान्तामवलोक्य सहर्षा काचित् प्रियसहचरी त्वयापलपितमपि रजनीरहस्यमेतत्तव मृदुहास्यमेव स्फुटमनुलपतीति व्यञ्जयन्ती निन्दाव्याजेन तदवदातमन्दस्मितं स्तौति—विशदमिति। तत्र चतुश्चरणस्यास्य कवित्वस्य तृतीयपादादौ सखि! इति सम्बुद्धया पारस्परिकप्रणयास्पदत्वं ध्वनितम्। ततस्तत्पुरतस्त्रपयावहित्थादिचातुर्य्यं विफलमित्यनुध्वनिः। अमुना तवाधरेण विशदं सततान्तर्बहिः स्वच्छतासरसतासुवृत्ततागुणसमेततया तत्प्रतियोगिमालिन्यशून्यम्। नसि नासायामित्यधिकरणे सप्तमी। अलङ्कृतनासिकोन्नतपदमित्यर्थः। तत एव प्रतिवेशि निजनिकेतनानतिदूरनिवासमपि पयोजमणिद्वितयं मुक्ताफलयुगलं चारुरुचा, अर्थात् स्वस्यैव बिम्बबन्धूकविद्रुमेभ्योऽपि चारुर्मनोहारिणी या रुक् कान्तिस्तया अरुणितमरुणतां नीतम्। पुनर्यथा मृदुलस्वभावेन केनापि पुंसा स्वसदनाश्रितं द्विजवृन्दं विप्रकुलं दानादिभिर्निजसम्पदामास्पदं क्रियते, तथा स्वभावत एव मृदुना तेनैव सुचिरात्तदुत्पत्तित एव अदः कुन्दकलिकाकमनीयं निजनिकेताश्रितं द्विजवृन्दम्, श्लेषेण दन्तपङ्क्तिः, स्वरमालहितं निजाख्यलक्ष्मीसमवेतं कृतम्, किन्तु त्वदधराङ्के विलुठदपि हसितं निजमन्दतयैव। नात्र कोप्यपराध इत्येवशब्दार्थः। सितमुज्ज्वलमेव न गनागप्यरुणम्। तन्मन्दतामेव विशदयति—त्वया स्वमनसोऽपि पिहितः पिधानोचितः किमुत परिजनतः; यद्वा, मनस्येव पिहितः संवृतः

प्रियपरिजनपुरतोऽपि नाविष्कृतो यः प्रियसङ्गमस्तस्य सूचनं पैशुन्यमेव, न [1]सख्यादिसङ्गमसूचनम्, सदैव न कदाचिद्, येनावसितमेवावश्यकर्त्तव्यतया निश्चितम्, नाकस्माद्भ्रमप्रमादापतितमित्येकस्याप्यवधारणस्यार्थसौष्ठवात् त्रिधोपयोगः। ततः 'यत्तदोर्नित्यसम्बन्धात्' तद् हसितम् अनेनातिमृदुनापि तवाधरेण परमापराधभाजनतया निजसीमनि स्वान्तिक एव सितं निबद्धम्। "षिञ् बन्धने" इत्यस्मान्निष्ठा। ततो मनागपि बहिर्गन्तुमनीशमिति गम्योत्प्रेक्षा। तल्लक्षणं चन्द्रालोके—"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः॥ तदभावे तु विज्ञेया गम्योत्प्रेक्षा मनीषिभिः"। इति। अत्र हसितस्य निन्दासमर्थनार्थं प्रयुक्तमपि पिशुनत्वं निबद्धत्वं सितत्वं मन्दत्वञ्च स्तुतिपर्य्यवसाय्येव, स्मितस्य तथैव शोभाविशेषोदयशालित्वेन महाकविभिस्तत्रतत्र बहुशो वर्णितत्वात्। सख्याः सख्यरतिकृतोऽयं निन्दास्तुत्योर्मधुररतिपोषको विनिमयः सम्यक् प्रकारेण स्पष्ट एव। अतो नात्राधिकव्याख्यानावसरः॥

सख्यः सहायतां यात पश्यतास्यापि विक्रमम्।
मन्दो मरुन्मत्समीपे मानिनीमानिनीषति ॥६१॥

मञ्जुलवञ्जुलनिलयान्तर्निजकलितललितकुसुमकिसलयशयनसरसीरुहनयनः सहसा समागतमन्दमलयानिलमिलनसन्धुक्षितविरहानलः शतशो विफलगतागतानुनयप्रयासखिन्नखिन्नाङ्गमनोवचसः कथमपि मानवतीं प्राणाधीशामनुनीयानेतुमनीशा वृन्दावीराद्याः स्वसखीः पुनरपि तत्रैव प्रेषयिष्यन्सोपपत्तिकं शनैराह—सख्य इति। हे सख्यः! इति सम्बोधनेन कमलकोमलकमनीयस्वकलेवरकदनमविचार्य्य मदुपकृतये कृतसंकल्पा यूयमेव सत्याः सख्य इति ध्वनितम्। तदुक्तम्—

1—पत्यादिसङ्गमसूचनम्—इति वा पाठः।

"कराविव शरीरस्य नेत्रयोरिव पक्ष्मणी ।
अविचार्य प्रियं कुर्य्यात्तन्मित्रं मित्रमुच्यते ॥" इति ।

अन्यास्तु सख्याभासा एवेत्यनुध्वनिः । अतः श्रान्ता अपि यूयं यथाकथमपि मदुपकृतये मदुक्तं यत्नान्तरं कुरुतेति प्रत्यनुध्वनि । तामानेतुं बद्धपरिकरः सञ्चलितोऽयं मन्दः सावलेपतया मन्थरः, श्लेषेण युष्मद्विक्रमासाध्यं कर्म्म सिसाधयिपुरयं महामूर्खस्तां मानिनीं मत्समीपमानिनीषति आनेतुमिच्छति, अत एतस्य सहायतां यात—चलितस्यास्य सहायार्थं यूयमपि शनैरनुयात । ननु कोऽयं मन्दो वराको यदनुगतयेऽस्मानाज्ञापयसीत्यत आह—मया तु निश्चितं युष्मत्साध्यं कर्म्म शीघ्रं विलम्बेन वा युष्माभिरेव सेत्स्यतीति, तथापि मन्दस्यास्य स्वविक्रममविचार्य्य मदुपकृतये सोत्साहस्य विक्रमं पश्यत । एतस्य यत्किञ्चिद्विक्रमानन्तरमेतत्सहायमिव विधायानुनीय तामानयतेति एतस्याविचारितस्वविक्रमस्य विक्रमाभासावलोकनाय युष्मान्प्रेषयामि, ममाभिलषितलाभस्तु भवतीभिरेव भविष्यतीति भावः । अत्र श्लेषेणापि मलयमारुतस्य निन्दार्थं प्रयुक्तमपि मन्दपदं स्तुतावेव पर्य्यवसितम्, तस्य तथैव सुखदत्वेन श्लाघनीयत्वात् । अत्रापि मधुररतिकृतोऽयं निन्दास्तुत्योर्विनिमयः सम्यक् स्पष्टतर एव ॥ ६१ ॥

हृदि भुवि रतिबीजं यत्त्वया गुप्तमुप्तं
नवघनरससेकैरालि ! भेजे घनत्वम् ।
अथ तदुपरि निन्दाकौमुदीवानुदीयान्-
मयि मलिनमतीनां दोषधीरोषधीशः ॥६२॥

अयि कुलवति ! गोकुलेऽस्मिन् प्रतिसदनं प्रतिजनवदनं प्रवृत्ता क्षपापवादप्रवृत्तिस्तद् यदिहन्तरसितेन तेन समं किमनेन प्रणयानुबन्धेनेति निजोपश्लिष्टितप्रणयपरिणामपरीक्षणाय सखीसंसदि साव-

हित्यमुपदिशन्तीं प्रियसखीं सासज्जनावशं सावलेपं सभयाभावं सहसितं सहर्षमाह—हृदीति । आलि ! प्रियसखि ! इति सम्बुद्ध्याऽनभिज्ञानां गुरुजनानां तथा पुरजनानाञ्च नानाविधनिन्दनं न मां मनागप्युपतापयति, मदिङ्गितज्ञायास्तव तु उपदेशलेशोऽपि परमारुन्तुद इति ध्वनितम् । तदलं तवोपदेशप्रलापैरित्यनुध्वनिः । मदभिप्रायमप्याकर्णयेति प्रत्यनुध्वनिः । तामेवमाभाष्याऽभिमुखीकृत्य निजसत्यप्रतत्वमभिव्यञ्जयन्त्याह—यत्पूर्वं त्वया रतिबीजं मनाक् तद्गुणमाधुर्य्यरसज्ञतायात्मकं प्रणयबीजं हृदि भुवि मदीयमृदुहृदयानूपरक्षेत्रे गुप्तं निभृतं यथा स्यात्तथा उप्तं निक्षिप्तम् । उप्तमिति "टुवप् बीजसन्ताने" इत्यस्य रूपम् । तद् यथा सद्भूमावुप्तं बीजं नीरसेकेनैव घनीभवति तथा नवघनस्यातिशयोक्तया श्यामसुन्दरतारसवर्षितातापहारितादिसाधारणधर्म्मव्रजनवयुवराजस्य रससेकैस्तत्कर्तृकभ्रूभङ्गापाङ्गानुनयाभिवादनवेणुवादनादिभिः शृङ्गाररसात्मकैः सेकैरिव सेकैर्निषिञ्चनैः । अत्र बहुत्वं मुहुः सेकव्यञ्जकम् । घनत्वं भेजे घनीभावं प्रापेत्यर्थः । अथानन्तरं तदुपरि प्रेमक्षेत्रोपरि मलिनमतीनां स्वारसिकमलिनबुद्धीनां मयि या दोषधीरसद्बुद्धिः सैव ओषधीशश्चन्द्रः जनकृतनिन्दैव सर्वतः प्रकाशकत्वप्रसरणादिसाधारणधर्मैः कौमुदी जोत्स्ना तद्वान् तत्समवेतः सन् कामसुदीयादुदयं प्राप्नुयादिति । ईगतावित्यस्य रूपम् । तथा च प्रयुक्तोऽयं महाकविना श्रीहर्षेण नैषधे—"उदितस्तम्भो न धर्त्तुं सहसा शशाक" इति । यथा चन्द्रस्तामसीतमःपुञ्जपिहितं स्वस्यौषधीशत्वादात्मपोष्यं वनोपवनारामक्षेत्रादिकं निजकौमुदीभिः प्रकाश्य सम्पोष्य समेधयति, तथा मयि दोषधीलक्षणोऽयमौषधीशः अपत्रपातामसीतमःपुञ्जपिहितं प्रणयक्षेत्रं जननिन्दाकौमुदीभिः सम्प्रकाश्य सम्पोष्य समेधयितुमुदयं प्राप्नोतु— इति ममात्यन्ताभीप्सिततमामाशिषमिमामहमिष्टदेवं भगवन्तं भास्करं साञ्चलप्रसारमभ्यर्थयामि । भवती तु वृथैव भीता भवतीति भावः ।

अत्र "ओषधीशः, भुवि, बीजम्, उत्तम्" इति पदचतुष्टयेन प्रेम्णो महौषधित्वमारोपितम्; तेनात्मनस्तदेकजीवातुकत्वं ध्वनितम्। तत्त्यागे जीवनमेव न स्यादित्यनुध्वनिः। ततो दुर्जनसारमेयभषितैस्त्वं किमिति विषीदसीति प्रत्यनुध्वनिः।

"ये तु त्वदीयचरणाम्बुजकोशगन्धं
जिघ्रन्ति कर्णविवरैः श्रुतिवातनीतम्"। इति श्रीभागवते।

यथा—
"दिवि भूमौ च ते राजन् राजते कीर्तिचन्द्रमाः"।
इति बृहत्कथायाम्।

तथा—
"विहाय कल्पद्रुमहो सुधान्धसां
त्वत्कीर्तिकल्पद्रुममाश्रिता वयम्।"

इति कृष्णकौतुके जयदेवः।
"वयं हरेर्मञ्जुनिकुञ्जकेलिपयोधिकल्लोलशतावगाहाः"।

इति गोपालभट्टाः।
"घण्टालं साधुवादैरनभिमतयशो देव! मृद्नन्मृणालं।
युष्मत्कीर्त्यभ्रकुम्भी[1] जगदुदरसरःसम्भ्रमी बम्भ्रमीति॥"

इति कालिदासः।
"भूभृत्त्वमीत्येवौदीच्याः शैला हिममिषाकृतेः।
देव! त्वत्कीर्तिकर्पूरपूरैरेव कृताः सिताः"॥

इति कुलपतिकविरिदानीन्तनः। इत्यादिमहाकविप्रयोगदर्शनात्, "कवयः प्रयोगशरणाः" इति न्यायात्, पद्येऽत्र दीपप्योषधीशयोः स्त्रीपुंव्यक्तिमतो रूपकमनवद्यम्। यथा स्तुतिभिः सकलजनानां मनांसि प्रसन्नानि भवन्ति, मम तु निन्दयैव तत्सिद्धिरिति निन्दास्तु-

1—अभ्रकुम्भी = अभ्रमातङ्ग, ऐरावत इति यावत्।

त्योर्मधुररतिकृतोऽयं विनिमयः सम्यक् स्पष्ट एव वर्त्तते। पद्यत्रितयमिदं व्यतिरेकोदाहरणरूपमिति प्रकरणान्तेऽन्यत्राप्येवमेव ज्ञेयमिति ज्ञापनार्थं लिखितमित्यवधेयम् ॥६२॥

यत्र नतिरेव परमोन्नतिः।

यथाह श्रीजयदेवः श्रीगीतगोविन्दे—

"स्मरगरलखण्डनं मम शिरसि मण्डनं
धेहि पदपल्लवमुदारम्"। इति।

यथा वा—

स्थाने मानेन हे[1] कृष्ण! पदं न पतति क्षितौ।
अहो महोन्नतेर्मूलं यद् राधापदयोर्नतिः ॥६३॥

कदाचिदनपेक्षितसखीसमूहसहायं स्वयमेव पदपतनादिभिरनुनीतकान्तं कान्तयाऽनुगृहीतं तत्संगमसुखेन सद्यःसञ्जातनिशान्तं ततः सङ्केतनिकुञ्जनिशान्तान्निःसृतं सानन्दं विकसद्वदनं कान्तमवलोक्य तां कान्तां निजनिकेतं नेतुमागता ललिता सानन्दं सशिरःकम्पं सासूयमिवाह—स्थान इति। हे कृष्ण! इति संबुद्ध्या सर्वचित्ताकर्षकत्वं ध्वनितम्। तेन तस्याः स्वयमेवानुनयादिना प्रसादनमुचितमेवेत्यनुध्वनिः। इदानीमस्माकं सर्वथा प्रयोजनाभाव एवेति प्रत्यनुध्वनिः। यद्वा, हे कृष्ण! श्यामसुन्दर! इत्यस्मत्सम्मतिमप्यपास्य स्वयमेव स्वकीयसमस्तकार्य्यसम्पादकतया वहिरन्तः सकैतवत्वं व्यञ्जयति। मानेन सुवर्णाङ्ग्या मम सख्याः सङ्गमलाभसम्भूतया चेतसः परमोन्नत्या। "मानश्चित्तसमुन्नतिः" इत्यमरः। तेन ते गमनसमये पुरतो निहितं पदं क्षितौ पृथिव्यां न पततीति लोकोक्तिरीतिः। तया स्वाभाविकपदन्यासमपास्यान्यथैव लक्षणया तदभिप्रेतं

[1]—ते कृष्ण! इत्यपि पाठः।

तत्स्थाने उचितमेव । औचित्यमेवाह—शास्त्रपुराणागमादिषु समस्त-सूरिरसिकजनेषु च यत्प्रसिद्धं तदिदानीमपरोक्षतयाऽवलोकितमिति । अहो—इत्याश्चर्य्ये। यद् यस्माद् राधाया मत्सख्याः पदयार्नतिर्नमनं परमोन्नतेर्मूलमिति तत्त्वयि सम्प्रति साक्षात्कृतमिति भावः। देव-गन्धर्वस्मरणपूर्वकं शतशः पदपतनैः प्राप्ते वस्तुनि सहसा स्वसहाये-ष्वपि किमेवं मानमुद्वहसीति गूढोऽभिप्रायः। एवं मधुररतिकृतोऽयं नतिपरमौन्नत्योर्विनिमयः स्फुट एव ॥६३॥

यथा वा—

शिखिपिच्छ ! गोपमौलेः शिरोधिरोहात्तवोन्नतिर्भवतु ।
तस्यास्तु मानवत्याः पदतललुठनं फलं जनुस्तपसोः ॥६४॥

काचित्परमनिपुणतासंवलिता ललिता परिजनपरिषदि सोप-हासमिवं केकिचन्द्रकान्योक्तिं कथयन्ती गुरुमानवर्ती कान्ता-मनुनेतुं कान्तं सत्वरमभिसारयति—शिखिपिच्छेति । हे शिखि-पिच्छ ! मयूरचन्द्रक ! गोपमौलेर्गोपकुलोत्तंसस्यास्य व्रजराजकुमा-रस्य शिरोधिरोहात् शिरसि उत्तंसतया योऽवरोहोऽवस्थितिस्तस्मा-द्धेतोस्तव तपस्विन इव शीतवातातपादिसहनशीलतया जनतास-म्पादितनमनस्तवनादिलक्षणोन्नतिः धन्योऽयमिति सम्भावितत्वमात्रं भवतु । तुर्भिन्नोपक्रमे । परन्तु मानवत्या गुरुमानिन्यास्तस्या अनिर्व-चनीयरूपमाधुर्य्यादिगुणनिधेर्मम सख्याः पदतललुठनं परममृदु-लयोश्चरणकमलयोर्मध्ये यल्लुठनं निपत्य चिरमनुत्थानं परमानन्दप्रद-तया महाभाग्योदयलभ्यतया तव जनुषो जन्मनः तथा तपसस्तव पूर्वोक्तस्य शीतातपादिसहनरूपस्योन्नतिहेतोरपि फलम् तद्विना परम-विचित्रवपुषोऽपि तव जन्मतपसोर्वैफल्यमेवेति ध्वनितम् । अतः प्रच्छन्ना परमोन्नतिस्तु सद्यःसुखसम्पादकतया पदतललुठनमेवेति। अत्रापि मधुररतिकृतोऽयं पूर्वोक्तयोर्नतिपरमोन्नत्योर्विपर्य्ययः सम्प्रस्फुट एव ॥६४॥

यथा वा—

सुमुखि! शिरसि नीताः सादरं स्नेहसिक्ता
रतिसमितिपरस्ताल्लम्बिनोऽमी तथापि।
सुरतसमरशूरे! बन्धनेनालमेषां
लुलितललितकेशाः पादपद्मं स्पृशन्ति ॥६५॥

कदाचित् सुरतान्ते पुनर्निजाङ्के विन्यस्ताऽस्तव्यस्तसमस्तालङ्कृतिं विस्नस्ततत्कचनिचयशोभावलोकनलोभाभिभूतमनोनयनः तद्बन्धनायोन्मुखीं श्रीवृन्दावनेन्दुरतिनिपुणां तां प्रसादयितुकामो युक्तिविशेषमुररीकुर्वन् सविनयं विज्ञापयति—सुमुखीति। हे सुमुखि! सम्बुद्धिरियं श्रमसलिलकणकरम्बिताननतया सरदत्तनीरागरदच्छदतया विलुलिततिलकालिकतया लुलिताल्पलतिककज्जललोचनतया च समयान्तरादपि शोभाविशेषं व्यञ्जयति। सादरमिति क्रियाविशेषणं पूर्वापरविशेषणाभ्यां संयोजनीम्। रतिसमितौ सुरतसंग्रामे परस्तात् पश्चादेव न तु नयनवदनाधरादिवत्पुरतो लम्बितुं विलम्बितुं शीलं येषान्ते। एवमेते परमापराधिनोऽपि भवन्ति। तथापि हे सुरतसमरशूरे! सुम्बुद्धिरियं मेतान्विनाप्येकस्या एव तस्यास्तत्समरविजये सामर्थ्यं व्यञ्जयति। एषां केशानां बन्धनेनालम्। अलमित्यव्ययमत्र वारणवाचकम्। मा कुर्वित्यर्थः। कुत इत्यत आह—लुलितललित केशाः—लुलिता रतिविलुलिता अत एव केशवेशरचनाविशेषादपि सद्यःकृतबन्धनादपि ललिताः केशाः पादपद्मं स्पृशन्तीति तेषां दीर्घतरत्वं बोधयदपराधिनामपि पादपद्मस्पृशां बन्धनं शूराणामनुचितमिति व्यञ्जयति। अत्र शिरसि नीताः, सादरं स्नेहसिक्ता इति विशेषणद्वयेन तथा युक्तिपोषणाय निन्दनमिव कुर्वता तृतीयविशेषणेनापि तेषां स्तुतिरेव व्यज्यते, तेषां पश्चाल्लम्बमानतयैव शोभाविशेषोदयात्। पुनर्लुलितपदेन तथा पादपद्मं स्पृशन्तीति नतिव्याजेन तेषां

दीर्घतमत्वं बोधयत् परमौन्नत्यमेव व्यञ्जयति पद्यमिदमिति मधुर-रतिकृतोऽयं तयोर्विपर्य्ययः प्रकट एवात्र ॥ ६५ ॥

यत्र व्यय एव लाभः ॥

यत्र व्यय इति। स्पष्टार्थमेतत् ॥

यथाह गोवर्द्धनः—

"आदाय धनमनल्पं ददानया सुभग! तावकं वासः।
मुग्धा रजकगृहिण्या कृता दिनैः कतिपयैर्निस्वा ॥" इति।

आदायेति स्पष्टार्थम्। अत्रानल्पेन धनदानेन तद्वासस आदानं व्ययोऽपि लाभादधिकः। मधुरतिकृतोऽयं तयोर्व्यत्ययः ॥

यथा वा—

वसन्तकाले विदलद्रसाले सुवर्णवल्लीविलसत्तमाले।
लभ्येत चेत्संप्रति गोपमौलिर्लाभस्तनुप्राणधनव्ययोऽपि ॥६६॥

श्रीव्रजेन्द्रनन्दने पूर्वानुरागवती रूपमाधुर्यादिगुणवती कापि गोपकुलयुवती व्रीडाविरहाभ्यामतीव मुहुराकृष्यमाणा मनोविनोदाय सखीभिर्वनं नीता तत्र श्रीवृन्दावनस्य वासन्तिकीनां शोभासम्पदामवलोकनेन सद्यःसमुद्दीपितभावविशेषविवशापि कामांध स्वप्रियसखीं प्रति दूत्यादिषु वहुधनादिदानेनापि तं कान्तं सङ्गमय्य मां सञ्जीवयेति व्यञ्जयन्ती किञ्चित्सोपहासमिवाह—वसन्तकाल इति। वसन्तकाले पुष्पसमये इति यस्य श्रवणस्मरणादिकमप्युद्दीपनं किं पुनरागमनमेवेति तस्योद्दीपनत्वमुक्तम्। पुनः पदद्वयस्य प्रथमा-तत्पुरुषेण श्लेषार्थेन प्राणपीडाकरत्वं ध्वनितम्। उक्तमुद्दीपनत्वं यत्तु तं विशिनष्टि—विदलद्रसाले विदलन्तः प्रफुल्लिता रसाला आम्रतरवो यस्मिन्निति साक्षादुद्दीपनत्वमुक्तम्। पुनः विदलन्तः प्रमुदिता

रसालाः शुचिरससम्भृताः साक्षात्तद्रसमनुभवन्तः संयोगिन इति यावत्। यस्मिन्निति स्मरणमात्रेण उत्कलिकावर्द्धनत्वमपि तस्य ध्वनितम्। पुनः कीदृशे—सुवर्णवल्लीविलसत्तमाले सुवर्णवल्लीभिर्विशेषेण लसन्तः शोभमानास्तमालाः श्यामतरुविशेषा यस्मिन्निति—उद्दीपनतमत्वमुक्तम्। सम्प्रति इदानीमेतस्मिन्नवसरे गोपमौलिः गोपानां शिरोभूषणमिव शोभाप्रदः परमसौन्दर्यनिधिः श्रीकृष्णश्चेल्लभ्येत तर्हि तनुप्राणव्ययोऽपि लाभ एव। एवञ्च मधुररतिकृतोऽयं व्ययलाभयोर्विपर्यासः स्फुट एव ॥९६॥

यथा वा—

अवेहि तमुपागतं गतमवेहि तापं तनो-
रसुवसतु ते सुखं द्रविणदेहदानैरलम्।
पुरैव यदि दित्ससे निखिलमेव मह्यं प्रिये !
प्रियोपरि करिष्यसे कथय किं नु निर्मञ्छनम् ॥९७॥

कयापि पूर्वानुरागवत्या गोपयुवत्या कुलवत्या वियोगपरवशया विवशया हे प्रियसखि! कामं द्रविणादिकं गृहाण, किं बहुना, जावज्जीवं निजदेहमपि तव दास्याय दास्यामि, अन्यथा प्राणा यान्ति, ततो हन्त तं महामानिनं कठिनहृदयमत्राभिसारयेति सविविधविनयानुनयं सचिबुकग्रहं प्रेपिता निजचतुरसखीसाधितार्था सत्वरं तदन्तिकमागत्य तदागमनकथामृतं पाययन्ती तां कृशतनुमाश्वासयति—अवेहीति। तं प्राणप्रियं नागरं लावण्यामृतसागरमुप समीपे आगतमेवावेहि जानीहि, तत एव तनोस्तापं विरहसम्भवं गतमेवावेहीति "सर्वं वाक्यं सावधारणम्" इति न्यायात्। क्रियापदद्वयन्तु तदागमनतापनाशयोरवश्यं शीघ्रमावित्वं व्यञ्जयति। ते असुः प्राणाः सुखं यथा भवति तथा वसतु, अर्थात्त्वदन्तः। ततश्च तद्वचनामृतं निपीय परमानन्दसम्भृतमनसं द्रविणादिकं दातुमुद्यतां प्रणतां तामुपदि-

शति– द्रविणदेहदानैरलमिति । द्रविणादिदानं मा कुर्वित्यर्थः । अलमव्ययमत्र वारणार्थम् । कथमित्यपेक्षायां सप्रणयं पुनराह—हे प्रिये ! हे प्रियसखि ! यदि दयितागमनतः पुरैव पूर्वमेव निखिलमेव द्रविणदेहादिकं दित्ससे मह्यं दातुमिच्छसि, तर्हि मम चेतसि महती चिन्ता । तामेवाह—तस्य प्रियस्योपरि दर्शनान्तरं किं निर्मञ्छनं करिष्यसीति युक्तिसमवेतेयमुक्तिः तस्य प्राणपर्यन्तं निर्मञ्छनयोग्यत्वेन दर्शनीयतमत्वं तथात्मनो निरपेक्षत्वं तत्सुखसुखवतीत्वं व्यञ्जयति। एवं मधुररतिकृतोऽयमत्र व्ययलाभयोर्विपर्य्यासः स्फुट एव वर्त्तते, अतो नात्र बहु व्याख्यायते ॥८७॥

यत्र विस्मरणमेव स्मरणम् ॥

यत्रेति । स्पष्टार्थमेतत् ॥

यथाह पञ्चमे शुकः—

"तत्रेत्थमविरतपुरुषपरिचर्य्यया भगवति प्रवर्द्धमानानुरागभरद्रुतहृदयशैथिल्यः प्रहर्षवेगेनात्मन्युद्भिद्यमानरोमपुलककुलक औत्कण्ठ्यप्रवृत्तप्रणयबाष्पनिरुद्धावलोकनयन एवं निजरमणारुणचरणारविन्दानुध्यानपरिचितभक्तियोगेन परिप्लुतपरमाह्लादगम्भीरहृदावगाढधिषणस्तामपि क्रियमाणां भगवत्सपर्य्यां न सस्मार ॥

तत्रेति । व्याख्यातमेव श्रीधरस्वामिभिः । एवं गद्येऽस्मिन् विन्यस्तरमणपदसामर्थ्यान्मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥

तथा दशमे—

"गोविन्दं गृहमानीय देवदेवेशमादृतः ।
पूजायां नाविदत्कृत्यं प्रमोदोपहतो नृपः ॥"इति

गोविन्दमिति। एवं वत्सलसंवलितदास्यरतिकृतोऽयं तयोर्विपर्य्ययः। अन्यत्स्वामिभिर्व्याख्यातमेव ॥

तथा द्वादशे—

"क्वचित्पूजां विसस्मार स्नेहप्रसरसम्प्लुतः" ॥ इति।[1]

क्वचित्पूजामिति। दास्यरतिकृतोऽयं तयोर्विपर्य्ययः ॥

तथोक्तं विदग्धमाधवे श्रीरूपगोस्वामिभिः—

"प्रत्याहृत्य मुनिः क्षणं विषयतो यस्मिन्मनो धित्सते
बालासौ विषयेषु धित्सति ततः प्रत्याहरन्ती मनः।
यस्य स्फूर्तिलवाय हन्त हृदये योगी समुत्कण्ठते
मुग्धेयं किल तस्य पश्य हृदयान्निष्क्रान्तिमाकाङ्क्षति ॥"

ललितादयः सख्यो मुग्धाया निजसख्याः श्रीकृष्णविषयकप्रणयसमृद्धिस्वभावसिद्धां तां प्रसिद्धां लोकविरुद्धां पद्धतिं तदनुभावैरनुभूय सानुतापं सविस्मयं परस्परमनुवर्णयन्ति—प्रत्याहृत्येति। कश्चिदन्यो मुनिः मननशीलः स्वमनो विषयत इन्द्रियार्थेभ्यः प्रत्याहृत्य प्रतिकूलतयाऽऽहरणं कृत्वा—योगाङ्गेषु पञ्चमं प्रत्याहारं कृत्वेत्यर्थः। यस्मिन् श्रीकृष्णे क्षणं क्षणमात्रं मनश्चित्तं धित्सते धातुमिच्छत्येव, न तु तथा कर्त्तुं शक्नोतीत्यर्थः। अत्रैकवचनन्तु तद्विधानां मुनीनां विरल्यं बोधयति। असौ मत्सखी तु ततः श्रीकृष्णात् मनः प्रत्याहरन्ती प्रतिकूलं नाथमिवाहरन्ती सती विषयेषु धित्सति धातुमीहते। कीदृशी सा—बाला। एतेन विशेषणेन स्त्रीत्वं तथाल्पवयस्कात्वं तद्धेतुकमज्ञत्वमपि ध्वनितम्। अहो प्रेम्णो विरुद्धकर्त्तृत्व-

---

[1]—ध्यायन् सर्वत्र च हरिं भावद्रव्यैरपूजयत्।
क्वचित्पूजां विसस्मार प्रेमप्रसरसम्प्लुतः ॥
[भा० स्क० १२ अ० ९]

मिति भावः। किञ्च, यस्य श्रीकृष्णस्य स्फूर्तिः स्फुरणमात्रं तस्यापि लवो लेशस्तदर्थं योगी कश्चन भाग्यवान् भक्तियोगी समुत्कण्ठामेव करोति, इयन्तु तस्य हृदयाद्विष्क्रान्तिं निर्गमनमेव आ समन्तात् सर्वथा काङ्क्षति, प्रार्थयते। किलेति निश्चये। कीदृशीयम्—मुग्धा सुन्दरी शुद्धबुद्धिश्च; या मम हृदयादेनं बहिरन्तरसितं मानिनं निरनुग्रहं निःसारयेत् सैव मम जीवनप्रदा प्रियसखीति मुहुर्वदतीति भावः। एवं मधुररतिकृतोऽयं विस्मरणस्मरणयोर्विपर्य्यासः प्रकट एव॥

यथा वा—

सन्त्यज सखि! तदुदन्तं यदि सुखलवमपि समीहसे सख्याः।
स्मारय किमपि तदितरद् विस्मारय हन्त मोहनं मनसः॥६८॥

काऽपि प्रेमपरिपन्थिपरवशा विरहविवशा भृशं कृशाङ्गी निजजीवसञ्जीवनाय श्रीकृष्णकथामेव मुहुः कथयन्तीं सखीं कथं कथमपि शनैः सखेदं सनिर्वेदमिदमाह—सन्त्यजेति। हे सखि! अस्याः सख्या मल्लक्षणायाः सुखलवमपि सुखस्य लवो लेशः, क्षणमात्रमपि सुखमित्यर्थः, यदि समीहसे सम्यक् प्रकारेण कर्त्तुमीहसे वाञ्छसि, तर्हि तदुदन्तं तस्योदन्तं वृत्तान्तं वार्त्तां सन्त्यज सम्यक् प्रकारेण मुञ्च। तत्कथाभिः सम्भवदपि स्वल्पं सुखं तत्कैतवत्वाद्विस्मरणेन शतगुणतां गतेन तापेन समीचीनतया न भवतीति मनागपि तत्कथां मा कथयेत्युभयत्र संशब्दार्थः। अत्र सखि! इति सम्बुद्ध्या तथा ममेति पदमप्रयुज्य सख्या इति पदेनैव स्वनिर्देशेनापि आवयोः सहजसख्यवत्वे तत्कथाभिः किं तत्प्रतियोगितामिवा चरसीति ध्वनितम्। ननु मम मौनमपि तव मनोऽवलम्बनप्रतिकूलमेवेति चेत्, तत्राह—किमपि तदितरत् तस्मात् कैतवात् तत्कथाभ्यो वा इतरदन्यदेव वस्तुविशेषं स्मारय मम मनोविनोदाय स्मरणविषयीकुरु। ननु त्वत्कर्णसुखदं तत्कथं स्याद्? अत आह—हन्तेति

खेदे। मम मनसो मोहनं कितवं मानिनं बहुवल्लभं-कथमपि विस्मारय। अन्यकथया श्रवणतुलाभावेऽपि क्षणं सन्तापान्तरानुत्पत्तिमात्रं सुखं स्यादेवेति भावः। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥६८॥

यथा वा—

प्रेमावृतानि नितराममृतायितानि
दत्तानि साररहितानि च भक्तपत्न्या।
मोदप्रदानि मनसा मम विस्मृतानि
नाद्यापि तानि कदलीफलवल्कलानि ॥६९॥

प्रेमावृतेति। भक्तपत्न्या विदुरस्त्रिया। अत्र दास्यरतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव सारं प्रक्षिप्य वल्कलदानरूपः। यथा प्रेमपत्तनापरपर्य्याये तस्मिन्नगरे विस्मरणमेव स्मरणं स्त्या स्थापितम्, तथा तद्वर्णनसमये प्रेमपत्तनाभिधेऽस्मिन्सन्दर्भेऽपि मूले टीकायां वा क्वचित्कदाचिदन्तःपातिनां कोशव्याकरणकाव्यरीत्यलङ्काराव्याप्त्यतिव्याप्तिपुनरुक्त्यादीनां विस्मरणं स्मरणादपि विच्छित्तिविशेषशालि,प्रणयमाध्वीकमदनिपीतमतित्वात्कवेः; अतोऽत्रापि तस्मिन्निव वादविवादानवसरः। अतः प्रेमोन्मदैरेव श्रोतृभिः श्रोतव्यमपीति दिक् ॥६९॥

यत्रागर्वत्वमेव सगर्वत्वम् ॥

यत्रेति। स्पष्टार्थमिदम् ॥

यथोक्तं श्रीरूपगोस्वामिचरणैः पद्यावल्यां—

"मा गर्वमुद्वह कपोलतले चकास्ति
कृष्णस्वहस्तलिखिता नवमञ्जरीति।

अन्यापि किं न सखि ! भाजनमीदृशीनां
वैरी न चेद् भवति वेपथुरन्तरायः" ॥इति॥

रहसि मधुरमधुरहासविलासादिकलाकलापैर्निजवशीकृतेन रसिककान्तेन निजललितकरकमलकलितरतिविलुलिततिलकाद्य-लङ्कृततया सावलेपां स्वमुख्यसख्या सस्मितमवलोकितामवलो-क्यान्ते स्थिता प्रखरस्वभावतया सासूयं तामाह—मा गर्वमिति । तव कपोलतले कपोलपाल्यां कृष्णस्वहस्तलिखिता कृष्णेन श्याम-सुन्दरेण स्वेनासाधरेण, यद्वा, स्वेनैव न तु स्वशिक्षया सखीहस्तेन रचिता कृता या नवमञ्जरी नवीनमकरिकापत्रं चकास्ति शोभते, इति गर्वं मा उद्वह उद् उच्चैर्मा वह । अत्रोद्वहेति क्रियापदसामर्थ्याद् मुधा भाररूपं गर्वं मा धारयेत्यर्थः । हे सखि ! इति सम्बुद्धिः सख्येनैव त्वामुपदिशामि मनसि मय्यसूयां मा रचयेति बोधयति । यतोऽन्या किमीदृशीनां भाजनं न ? अपि त्वस्त्येवेति । निजसखीमुखं मनागवलोक्य पुनराह—यदि वैरी शत्रुः प्रकरणसम्भवः हरेः कम्पोऽन्तरायः प्रत्यूहो न भवेत् । मम सख्यां प्रियस्य प्रेमातिशयात् सद्यः करकम्पेन नवमञ्जरी-लिखनमशक्यमेवेति प्रेमपरिणाहगुणाभिज्ञा गर्वयोग्यापि गम्भी-राशयतया नेयं गर्वं समुद्भावयति, त्वयि तु प्रियस्य प्रेम्णः परिमित-तया निष्कम्पाभ्यां कराभ्यां नवमञ्जरीलिखनं सुखं स्यादिति प्रेमतार-तम्यानभिज्ञा नवमञ्जरीशोभां मुहुः दर्शयन्ती तन्मात्रेणैव प्रेमगर्विता मा भूरिति भावः । एवं मधुररतिकृतोऽयमगर्वसगर्वयोर्विपर्य्ययः स्फुट एव ॥

यथा—

"मत्सखीं विलुलितालकभूषां वीक्ष्य नेयमलसा स्वयमेव ।
तत्तवैव सखि ! सर्वमीर्ष्यया कुर्वती वहसि गर्वमखर्वम्" ॥

श्रीकृष्णाङ्गसङ्गमाद्वालङ्कृतनतनुं नयनवचनगमनादिषु समुत्कसखी-मद्भिमानां कामपि विपक्षसखीं समवलोक्य ललिता प्रखरस्वभाया

स्वमुख्यसखीं सुखयितुमितरसखीभिः सह सासूयं तामुपहसति— हे सखि ! विशाखे ! पश्य, सेयं—सा समस्तगोकुलविख्यातरूपगुणचातुर्य्या, इयं पुरतो दृश्यमानेत्यङ्गुल्या निर्दिशति। प्रातः निकुञ्जमन्दिरादुपागतां विलुलितालकभूषां विलुलिता विपर्यस्तविन्यासा अलका भूषा भूषणानि च यस्यास्ताम्। एतदुपलक्षणमन्येषां वसनाञ्जनतिलकादीनां तथाऽधरव्रणनखाङ्कजृम्भणाङ्गमोटनादीनामपि ज्ञेयम्। एवं सौभाग्यसुखसम्पन्नां मत्सखीं श्रीराधां वीक्ष्य विलोक्य चतुरतया स्वयमेव मुधैव अलसा सती यत्सख्यामवलोकितं तत्तथैव यथावत्स्वाधीनत्वात् स्वयमेव मुधा कुर्वती कुर्वाणा केवलमखर्वमनल्पं गर्वमभिमानं वहति धरति। अत्र वहतीति क्रियापदसामर्थ्याद् गर्वस्य भारत्वारोपः, तेन वृथा भारं वहतीत्याशयः। एवं सखीभिः सह सहस्ततालं स्वयमुपहस्य मुख्यां सखीमपि हासयामासेति। अत्र तस्यां गर्वस्याखर्वत्वकथनं स्वसख्यां गर्वाभावस्य अखर्वत्वं व्यञ्जयति—व्यञ्जनया प्रकाशयति। तेनान्वयव्यतिरेकाभ्यामगर्वत्वसगर्वत्वयोः हास्यरतिकरस्मितसख्यरतिकृतोऽयं तयोर्विपर्य्ययः सम्यक् स्फुट एव। नात्र विशेषव्याख्यानावसरः॥

यत्र सकामत्वमेवाऽकामत्वम्॥

यत्रेति। प्रेम्णा कृष्णे सकामत्वं निष्कामत्वादधिकमिति मुनीन्द्रस्याभिप्रायः। पीत्वा मुकुन्दमुखसारघमिति गोपीनां परमानन्द इत्यादौ भगवत्पदप्राप्तिकामस्य राज्ञस्तेन सादरं तासां सकामत्वस्यैव मुहुर्वर्णनाद्। उक्तञ्च श्रीभगवता—"न मय्यावेशितधियाम्" इति॥

यथोक्तं श्रीरूपगोस्वामिचरणैः—

"प्रियः सोऽयं कृष्णः सहचरि ! कुरुक्षेत्रमिलित-
स्तथा साहं राधा तदिदमुभयोः सङ्गमसुखम्।

तथाप्यन्तः खेलन्मधुरमुरलीपञ्चमजुषे
मनो मे कालिन्दीपुलिनविपिनाय स्पृहयति ॥" इति ।

कुरुक्षेत्रयात्रायामेकान्ते कान्तेन सह संलापसङ्गमादिसुखमनुभूय स्वसखीसंसदमुपगता वदनप्रसक्तिसंसूचितसकलसौभाग्यसुखसम्पत्तिरपि कान्ता सस्मितं ललितां प्रति सस्मितं विस्मितं शनैः स्वमनोभिलषितापूर्तिलेशं कथयन्ती रसस्याऽपरिपूर्णतयैव स्वादुविशेषोपलम्भकत्वं व्यञ्जयति--प्रिय इति । हे सहचरि ! ललिते ! अयमेव मदीयमनःसन्तापोशमनः कृष्णो नवनीरदसुन्दरः सः "सर्वं वाक्यं सावधारणम्" इति न्यायात् स एवेत्यर्थः । नृपत्वप्राप्तावपि पूर्ववदेव प्रणयरसमयस्वभावसरल एवेत्यर्थः । अत एव प्रियः पूर्ववदेव मयि प्रीतिरत् "इगुपधज्ञाप्रीकिरः क" इति कर्त्तरि कप्रत्ययविधानात्, तत एव प्राणादपि अधिकप्रियो जात इति प्रियपदस्यैवार्थद्वयम्, तथा पुनः राधाख्याहमपि सैव मानाकान्तमानसैव, तथा तत्पूर्ववदेव उभयोरावयोः सङ्गमसुखमपीति पूर्ववदेव सर्वसुखसाकल्यमुक्तम् । तथापीदं मम मन अन्तः निजान्तः कालिन्दीपुलिनविपिनायैव स्पृहयति । कालिन्दी श्रीयमुना तस्यास्तटे यत् पुलिनं तन्निकटे यद्वनं श्रीवृन्दावनमेव मुहुः स्मरतीत्यर्थः । कीदृशाय—खेलन्मधुरमुरलीपञ्चमजुषे खेलन्ती सुखं गानकेलिं कुर्वती या मधुरस्वरा मुरली तस्याः पञ्चमाख्यो यः सामस्वरविशेषस्तं जुषते सेवत इति तथा तस्मै । एवं स्वसुखसाकल्यमभिव्यज्य किञ्चिदपूर्त्तिकथनेनापि तद्रसस्य परमास्वादनीयत्वमभिव्यञ्जितम्, अपरिपूर्ण एव रसः स्वादुतामापद्यते इति प्राचीनानामुक्तेः । अत्र सर्वसम्पन्नपरिपूर्त्यां अप्राप्तांशस्येप्सिततमत्वाभावात् "स्पृहेरीप्सितः" इति सूत्रेण चतुर्थ्यप्रयोगेति ज्ञेयम् । एवं मधुररतिरत्नोऽयं नवाभन्यानामन्ययोर्विपर्ययः स्फुट एव ॥

यथा वा—

यो गुञ्जन्मुरलीमञ्जुमुखाम्बुजविलोकने ।
कामो नामोत्तमः प्रेमा कोऽपि गोपनतभ्रुवाम् ॥ १००॥

दुर्दैवात् प्रणयपद्धतिसिद्धान्तविरुद्धा विशुद्धबुद्धीनामश्रान्तसङ्गतिसञ्जातदुर्वैराग्यरोगाक्रान्तस्वान्ततयैव श्रीकृष्णविषयकव्रजजनविशेषस्नेहविशेषलेशसंश्लेषादपि बिभ्यतं चिरान्निजान्तिकमागतं स्वशिष्यं करुणावरुणालयः कोऽपि परिणतानन्यरसिकभक्तवरः शनैः समुपदिशति—य इति । रे! त्वं वृद्धोऽपि बाल एवासि, ततः शृणु, गोपनतभ्रुवां व्रजसुन्दरीणां गुञ्जन्मुरलीमञ्जुमुखाम्बुजविलोकने गुञ्जन्ती परममधुराधरमधुमदमुदितेव मधुरतरकलस्वरवती या मुरली तया मञ्जु पूर्वतोऽपि मञ्जुलं मनोहरं यन्मुखाम्बुजं सर्वसन्तापहारित्वहृदयनयनानन्दकारित्वश्रीनिकेतत्वादिसाधारणधर्मैः मुखमेवाम्बुजं कमलं तस्य विलोकनं विशेषेणावलोकनम् । अत्र विशब्देन मुहुरवलोकितेऽपि तस्मिन् प्रेमस्वभावसुलभं परमोत्कलिकाकुलत्वं ध्वनितम् । तस्मिन् यः कामः । नाम इति प्रसिद्धौ । लोके काम इति नाम्ना प्रसिद्ध इत्यर्थः । यत्तदोर्नित्यसम्बन्धात् स कोऽपि अनिर्वचनीयः परमात्मतत्त्ववद् अन्तरेवानुभूयमानः परमानन्दरूपस्तासां प्रेमा प्रेमैवेत्यर्थः । न तु विद्वद्विवेकबाधाकरः साधारणः कामः, अत एवोक्तम उत्कृष्टतमः, स्वतः सुखरूपस्यापि तस्य कामरूपताङ्गीकारे एव तत्तत्केलिकदम्बनिदानतया परमचमत्काराकरत्वावाप्तेः । तदुक्तं श्रीरूपगोस्वामिभिः—"तत्तत्क्रीडानिदानत्वाद्" इति । तथा च तन्त्रे—"प्रेमैव गोपरामाणां काम इत्यगमत्प्रथाम्" इति । पुनरुत्तम इति विशेषणेनैवास्य प्रेम्णो लोकप्रसिद्धैः सिद्धैः साधकैरपि क्रमेण रसरूपतया स्वदनीयपरमफलरूपत्वेन तथा निखिलरागरोगनिरसनरसरूपतया सर्वथा सेव्यत्वं ध्वनितम् । ततस्त्वयापि सांसर्गिकहृदयरुग्णतारोगनिरासार्थमयमेव सततं सेव्य इति स्वशिष्यशिक्षणमनु-

ध्वनिः। ततस्तस्मिन्नपथ्यमतिमतथ्यां सन्त्यजेति प्रत्यनुध्वनिः। इम-मेवार्थं तन्नगरे कीरोक्तिविलासोऽपि व्रतभावत्वादीपन्मर्यादामेवा-वलम्ब्य स्वान्तःस्थेन युक्तिविशेषमयेण भगवद्वचनेन तत्रत्यान् सर्वदा शिक्षयति। यथा—'न मय्यावेशितधियाम्" इति। एवं मधुर-रतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव ॥१००॥

यत्र रविरेव चन्द्रः ॥

यत्र रविरिति। स्पष्टार्थमेतत् ॥

यथा कस्यचित्—

"भीष्मग्रीष्मर्त्तुसन्तापशून्यरथ्यान्तरस्थयोः ।
अन्योन्यालापसुखिनोर्यूनोश्चन्द्रायते रविः" ॥ इति।

कदाचित्प्रबलतराऽपूर्वपूर्वानुरागरसरञ्जितमनसोर्दूरादपि क्वचि-दपि कदाचिदपि किञ्चिदपि कथमपि दर्शनमात्रमपि स्यादिति निर-न्तरमन्तरभिलपितयतोर्दिने एव निर्जनवनवीथिकायां यदृच्छया सहसा सङ्गतयोस्तयोः कान्ताकान्तयोः परस्परसावलोकनपरे ललिताविरागे परस्परमास्वादयतः—भीष्मेति। अयि! पश्य, कनकमालतीकमलदलकोमलकलेवरयोरप्यनयोर्यूनो रविः कृपादि-त्योऽपि चन्द्रायते शरच्चन्द्रतामाचरति। तीव्रातपोऽपि कौमुदीयं मात इति भावः। कीदृशयोः—भीष्मेति—भीष्मो भयानको यो ग्रीष्म-र्त्तुस्तेन यः सन्तापः परमोष्मा तेन हेतुना शून्या जनतायातायातरहिता या रथ्या प्रतोली तस्या अन्तरं मध्यं तत्र स्थितयोः, अत एव सचकितं ससम्भ्रममन्योन्यं परस्परं यः आलापः सम्भाषणमात्रं तेनैव सुखिनोः परमानन्दवतोः इति मधुररतिकृतोऽयं तयोः पुण्यवतोर्विपर्य्ययः ॥

यथा वा—

तपन्तु दैवादत केऽपि चान्यः
मर्मादय कान्तां निजकान्तमद्गताम् ।

दिने स पापोऽपि तपार्कसम्भव-
स्तापोऽपि चन्द्रावलि ! चन्द्रिकायते ॥१०१॥

श्रीवृन्दावनशीतभानुना समं श्रीवृषभानुसुता मध्यंदिने भानुमत्सहस्रभानुसंसर्गसञ्जातचाकचिक्याधिक्यं भानुसुता सकेतमवलोकयतीति निजसखीमुखान्निभृतं निशम्य सद्यःसमुदितमत्सरतया किञ्चिद्विवर्णवदना धीरतया क्षणमात्रं मौनमवलम्ब्य, अहो धन्यास्ताः, वयन्त्वस्मिन् तीव्रातपे बहिः पदमप्यर्पयितुमनीशा इति व्यञ्जितेन निजसौकुमार्य्येणोपहसितस्वसखीसौकुमार्य्यां चन्द्रावलिं प्रति ललिता प्रगल्भस्वभावाऽपि वल्गुभिरेव वचनैः सावहित्थं किञ्चिदुदन्तकथनकैतवेन तदाक्षेपपुरस्सरं कान्ताकान्तयोः पारस्परिकमनुरागातिशयं व्यञ्जयति—तपन्त्विति । हे चन्द्रावलि ! इति सादरं सम्बुद्धिः आस्तां तावद्बहिर्निःसरणं सुकुमारीणां चन्द्रावल्यादीनामातपश्रवणदर्शनमात्रेणैव मुखे वैवर्ण्यं भवतीति तस्या आक्षेपं व्यञ्जयति । शृणु, स प्रसिद्धः पापोऽपि विश्वजीवनशोषकत्वात् पापरूपोऽपि कान्तां सौन्दर्य्यनिधिं मत्सखीं राधिकां निजेन सहजसिद्धेन कान्तेन परमसुन्दरेण नायकेन नन्दनन्दनेन सह दिने दिवसे सङ्गतां मिलितां समीक्ष्य दृष्ट्वा तपार्कसम्भवस्तपो निदाघस्तस्य योऽर्कस्तस्मात्सम्भवो यस्य स तथा, "उष्ण ऊष्मागमस्तपः" इत्यमर वचनात्, "तपेन वर्षा शरदा हिमागमः" इति माघकाव्योदाहरणाच्च । तापोऽपि चन्द्रिकायते—कौमुदीवच्छीतलत्वमेवाचरतीत्यर्थः । एतेन निजसख्या भाग्यविशेष उक्तः । एवंप्रभावां तां समीक्ष्य ये जन्तवस्तपन्ति, ते दैवान्निजदुर्दैवादेव तपन्तु, न तत्र कोऽपि तदपराध इति पुनरपि प्रच्छन्नस्तदाक्षेपः । मम सख्यास्तु प्रियसङ्गमे निदाघातपोऽपि ज्योत्स्नारूपतां यातीति निजसखीप्रेमातिशयो व्यञ्जितः । एवं मधुररतिकृतोऽयं रविचन्द्रमसोर्विपर्य्यासः सम्यक् प्रस्फुट एव ॥१०१॥

यत्र चन्द्र एव रविः।

यथा कस्यचित्—

"कुलाकीर्त्तिव्रीडाऽऽकुलितमतिरात्मानमधुना
तिरोधातुं धत्ते नियतमयमङ्कं दिनमणिः।
कलङ्की मे प्रेयानिति मलिनतामेति नलिनी
द्वितीयोऽभूदिन्दोरिति कुमुदवृन्दं विहसति॥" इति।

मर्य्यादापुरुषोत्तमस्यापि सकलकल्याणगुणनिधेर्मधुरमेचकीयस्वरूपान्तरत्वेनोद्रिक्तसीमासमुन्मूलनप्रबलप्रणयपरवशतया वैदेहीविरहविह्वलस्य रात्रावपि सौमित्रिणा समं तत्र तत्र तामेवान्वेषमाणस्य विरहसन्तापकत्वेन पूर्णं रजनीकरमपि दिनकरमेवाभिमन्यमानस्येन्दुरेवायमिति वदन्तं सौमित्रिं प्रति श्रीरघुकुलतिलकस्येयं प्रलापोक्तिः—कुलाकीर्त्तिरिति। वत्स! लक्ष्मण! अयं नियतं निश्चितं दिनमणिरस्मत्पूर्वपूर्वजः सूर्य्य एव, न चन्द्रः, साक्षात्सन्तापकारित्वात्। अङ्कन्तु आत्मानं तिरोधातुं मां कश्चिद्विरयमिति मा प्रत्यभिजानातु इत्यात्मानं स्वं तिरोधातुं गोपयितुमङ्कमङ्कमिव किमपि वस्तु धत्ते निजाङ्कमारोपयतीत्यपि नियतं निश्चितमेव। एवमग्रेऽपि ज्ञेयम्। अत्र हेतुगर्भं विशेषणम्—कुलाकीर्त्तिव्रीडाकुलितमतिरिति। हीनपराक्रमस्य हृतदारस्य दीनस्य मम सम्बन्धाद् या कुलस्य निजान्वयस्याकीर्त्तिस्तया या व्रीडा तया आकुला व्याकुला मतिर्यस्येति। तर्हि नलिनी निमीलनं कथमिति तत्राह—मे मम प्रेयान् प्रियतमः पद्मबन्धुः कलङ्की जात इति नलिनी कमलिनी जातावेकत्वं लज्जया, निजवदनमदर्शयन्ती मलिनतामेति, न तु तस्यास्तन्नैसर्गिकं निमीलनमिति भावः। तर्हि कैरवविकासः कथमिति तत्राह—द्वितीयोऽभूदिति, पूर्वमेतत्पर्य्यन्तं मत्प्रियः कुमुदबन्धुरेव कलङ्कीति प्रसिद्धः सम्यग्ज्ञातः। इदानीन्तु तस्मादिन्दोः सकाशाद् द्वितीयः कलङ्की

अभूदिति कुमुदवृन्दं विहसति, "न दुःखं पञ्चभिः सह", इति न्यायात्। नायं तेषां स्वाभाविको विकास, इत्यत्र कुमुदपदेन कुत्सिता मुदो यस्येति समासेन परविषादसन्तोषतया तन्मुदामति-कुत्सितत्वं व्यञ्जितम्। एवमनुकूलनायकतया प्रख्यातस्य श्रीसीतापतेः दशरथराजकुमारस्य समञ्जसरतिकृतोऽयं निशाकरदिवाकरयोर्वि-निमयः सम्यक् स्फुट एव॥

यथा वा कस्यचित्—

"वत्स ! यत्सरसिजस्य मुद्रणं
चण्डरोचिरुदयेऽपि दृश्यते ।
नूनमत्र शतपत्रकानने
शीतदीधितिमुखी भविष्यति" ॥ इति ॥

पूर्वपद्यावतारिकायां लिखितावस्थः समुदितसकलकलानिधौ निशीथे निमीलितं कमलवनमवलोक्य किञ्चिदाशाभासाश्वासित-मानसः श्रीजानकीजानिः स्वानुजमनुवदति—वत्सेति। हे वत्स ! इति वात्सल्यमयीयं सम्बुद्धिः सूर्य्यमपि चन्द्रं कथयतस्तस्य मुग्धत्वं व्यञ्ज-यति। पश्य, चण्डरोचिरुदये चण्डरोचिषः सूर्य्यस्योदयस्तस्मिन्नपि साक्षाद् मां संतापयतो निदाघसह ग्भानोरुदयेऽपि सरसिजस्येति जातावेकवचन कमलानामित्यर्थः, मुद्रणं निमीलनं दृश्यते—प्रत्यक्षमनु-भूयते। अत्र वने नूनं निश्चितं शीतदीधितिमुखी चन्द्रमुखी सा मञ्जीवनौषधिः सीता भविष्यतीति। अत्र शीतदीधितिपदं परिकरा-ङ्कुरेण तन्मुखस्यैव स्वसन्तापहारित्वं व्यञ्जयति। ततोऽत्रैवाभ्यां सम्यक् तदन्वेषणं विधेयमिति भावः। अत्र व्यतिरेकोक्तिः पूर्ववदेव। एवं समञ्जसरतिकृतोऽयं निशाकरदिवाकरयोर्विनिमयः समीचीन-तया स्पष्ट एव॥

यत्रासन्त एव सन्तः॥

यत्रेति। स्पष्टार्थमेतत्॥

यथा वा—

अन्यत्र पीतगीता भवभीता विषयवासनावीताः।
सन्तस्त्वद्विपरीता हन्त सखि! प्रेमपत्तने गीताः ॥१०२॥

अन्यत्रेति। दूरदेशाद्भाग्योदयेन सद्यःश्रीवृन्दावने समागतया सेवितगीतासहस्रनामादिनिष्ठसामान्यभक्तसमूहया प्रेमपद्धतिमजानन्त्या साधकशान्तभक्तभक्तिमत्या कयापि साध्व्या भाग्योदयात्तत्र मिलितः कोऽपि युगलमाधुर्यामृतजीवातुः परिणतानन्यरसिकभक्तः सादरं पृष्टः—कथमत्रत्यवैष्णवानां गीतादिषु तथा परमादराभाव इति। ततः स तां सदयमाभाष्य विहस्य शनैरुपदिशति—अन्यत्रेति। अन्यत्र देशान्तरे पीतगीताः पीता सादरं श्रुतभगवदुक्तोपनिषदः, भवभीताः संसृतेर्भीतिभाजः, विषयवासनावीतास्तद्रहिताः, सर्व एव सन्तो वसन्ति, तद्सत्यमेव, परन्तु ते तथैवाधिकारिणः। अत्रत्यास्तु तद्विपरीता अनाघ्रातगीतार्थाः, यतो गीतायां क्रमेण कर्म्मभक्तिज्ञानमयमध्यायषट्कत्रयं तत्र तत्रान्यानामनधिकारात्। तथोक्तं श्रीभागवते—

"तावत्कर्माणि कुर्वीत न निर्विद्येत यावता।
मत्कथाश्रवणादौ वा यावच्छ्रद्धा न जायते॥" इति।

तथा—
"तस्मान्मद्भक्तियुक्तस्य योगिनो वै मदात्मनः।
न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह॥" इति।

पुनः—"अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्।
आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥"

इत्युक्तलक्षणायां भक्तावधिकारिणोऽन्यत्या गीतोक्तायां साधनभक्तावनधिकारिण एव, सिद्धदशायां साधनप्रयोजनाभावात्। पुनरन्यत्या भयादपि न बिभ्यति। यथोक्तं श्रीरुद्रेण पार्वतीं प्रति षष्ठे—

"नारायणपराः सर्वे न कुतश्चन बिभ्यति।
स्वर्गापवर्गनरकेष्वपि तुल्यार्थदर्शिनः॥" इति।

यथा वा दशमे—

"एवं नन्दादयो गोपाः कृष्णरामकथां मुदा।
कुर्वन्तो रममाणाश्च नाविदन् भववेदनाम्॥"

इति शुकोक्तेः तद्रागानुगामिनोऽपि तथैवेति भावः। तथाऽत्यास्तु स्निग्धदेहाः सुवसनाः सुगन्धचन्दनाद्यालिप्ता एव, न तु विषयबुद्ध्या तत्त्यागिनः। तदुक्तमेकादशे भक्तप्रवरेणोद्धवेन—

"त्वयोपभुक्तस्रग्गन्धवासोलङ्कारचर्चिताः।
उच्छिष्टभोजिनो दासास्तव मायां जयेमहि"॥ इति।

तस्मादत्यानामेवं सिद्धान्तोत्तमपरिनिष्ठितानां परिपाटीमवधार्य विचिकित्सां विमुञ्च, कृपया हे सखि। इति सम्बुद्धिः अतिरहस्यस्यास्य सिद्धान्तस्योपदेशे हेतुः "सतां साप्तपदी मैत्रीत्युक्तेः"। एवं भवितुं नवापि मनोरथश्चेद् श्रीवृन्दावने निवस, रसिकभक्तान्निष्कपटं भज, श्रीकालिन्दीसेवनं कुरु, तादृशत्वप्राप्तावयमेवोपचारः,

"स्वभावविजयो भवेद्वदति वल्लभः श्रीहरेः"। इति श्रीयमुनाष्टके श्रीमद्वल्लभाचार्य्यचरणैरुक्तत्वात्। प्रेमपत्तने श्रीव्रजमण्डले। एवं रतिविशेषकृतोऽयं सदसतोर्विपर्य्ययः स्फुट एव॥१०२॥

यत्राऽसतीत्वमेव सतीत्वम्॥

यत्राऽसतीत्वमिति। स्पष्टार्थमेतत्॥

यथा वा—

सन्ति रोगान्तरं हन्तुं संहितापथगामिनः।
कृष्णानुरागरोगेऽस्मिन्नसतीसङ्गमौषधम्॥१०३॥

नन्दगोकुलवसतिना केनापि गोपकिशोरेण कृतपरिग्रहां[1] पितृभ्यां दत्तद्विरागमनां पत्या स्वभवनमुपनीतां विनीतां रूपादि-गुणवतीं युवतीमस्माभिः सह सख्यं कुरु, इति श्रीकृष्णानुरागवतीभि-र्बहुशोऽभ्यर्थितामपि तास्वसतीबुद्ध्या रचिततद्वचनानादरां पतिप्र-तामन्यां ताभिरुपेक्षितां पुनः कियद्दिनानन्तरं श्रीकृष्णचिल्लीचापच-ञ्चच्चारुचपलोऽपाङ्गसायकनिर्भिन्नहृदयां पूर्वानुरागवतीं विरहता-पवतीं व्याधिविशेषबुद्ध्या गुरुजनैः कृतानन्तोपचारां तदप्यलब्धोप-शमां सखेदां निशम्य तासां संसदः सत्वरेण तदवलोकनव्याजेन तस्याः समीपमागता काचिद् गोपयुवतिर्विरहविह्वलां तां तापोप-शान्त्युपायं शनैरुपदिशति—सन्तीति। संहितापथगामिनश्चरक-सुश्रुतादिग्रन्थपद्धतिनिबद्धश्रद्धाश्चिकित्सका रोगान्तरं हन्तुं सन्ति बहुशः। परन्तु हे सखि! अस्मिन् कृष्णानुरागाभिधे महारोगे तु असतीनां त्वया असतीत्वेन अनादृतवचसामस्माकं सङ्ग एवौषधम् "सर्वं वाक्यं सावधारणम्" इति न्यायात्। अन्ययोगव्यवच्छेदकोऽ यमेवकारः। नान्यदित्यर्थः। अतोऽसतीनामस्माकं संगं कुरु, तदैव श्रीकृष्णप्राप्त्या तापोपशमोऽतः पूर्वमनादृतमपि मद्वचनमेवाधुनाप्याशु-कुरु इति भावः। एवं मधुररतिकृतोऽयमसतीसत्योर्विपर्य्ययः समी-चीनतया प्रस्फुट एव। नाधिकमत्र वितन्यते ॥१०३॥

यथा वा—

केकिपक्षधरः कोऽयमालि! यस्यातिचञ्चलम्।

लोचनं मोचयति मां सतीव्रतपिशाचतः ॥१०४॥

केकीति। अत्र सतीव्रतस्य पिशाचरूपकेणासतीत्वमेव सतीत्व-मिति ध्वनिः ॥१०४॥

यत्र सतीत्वमेवाऽसतीत्वम्।

यत्र सतीत्वमिति स्पष्टमेतत् ॥

[1] करग्रहाम्—इति पाठान्तरम्।

यथा—

"कृष्णानुरागार्तिलसन्मतीनां
गोपीततीनामभिलक्ष्य भावम्।
मतं सतां सत्कृतसत्पतीना-
महो सतीनामसतीत्वमेव"॥ इति।

दत्तादिशापाश्वाधिरूढो लोकान् परिभ्रमन् कृष्णे प्रच्छन्न-परमानुरागवतीषु गोपयुवतीषु परमभक्तिमान् श्रीनारदः तासु सामान्यमतिमन्तं कमप्यविशुद्धबुद्धिं बहिर्मुखं साधिक्षेपमुपदिशति—कृष्ण इति। कृष्णे श्यामसुन्दरे योऽनुरागः प्रेमपरिणामस्तेन या आर्त्तिर्व्याकुलत्वं तया लसन्ती सतीमतिभ्योऽपि शोभमाना मतिर्यासान्तासां गोपीततीनां गोपवधूश्रेणीनां भावं मनोविकारविशेषमभिसारादिमनोरथमयमभिलक्ष्य। अहो—इत्याश्चर्य्ये। सतीनामरुन्धतीप्रभृतीनामसतीत्वमेव सतां भक्तोत्तमानां मतम्, न तु त्वद्विधानामसतामित्याक्षेपो व्यञ्जितः। कथंभूतानां सतीनाम्-सत्कृतसत्पतीनां सत्कृताः परमादृताः सन्तः सदाचारादिनिष्ठाः पतयो वशिष्ठादयो याभिस्तासाम्। यतः सत्यस्तु पाञ्चभौतिकशरीरवति सामान्यजीवे 'पतिरेव हि नारीणां दैवतं परमं स्मृतम्" इत्यादि शास्त्रबलान्नरकपातभयेन यथाकथञ्चिद्भगवन्मतिं विधाय प्रीत्या पातिव्रत्यं साधयन्ति। एतास्तु साक्षात् परब्रह्मणि श्रीकृष्णे स्वारसिकानुरागिण्यस्तदर्थं त्यक्तैहिकामुष्मिकार्था अत एव सत्य इति समुचितं सतां मतम्, त्वद्विधानां मतमनुचितमिति ध्वनिः,

"मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्"।

इति तृतीये श्रीकपिलदेवोक्तेः, तथा—

"त्वक्श्मश्रुरोमनखकेशपिनद्धमन्त-
मांसास्थिरक्तकृमिविट्कफपित्तवातम्।
जीवच्छवं भजति कान्तमतिर्विमूढा
या ते पदाब्जमकरन्दमजिघ्रती स्त्री"॥

इति श्रीरुक्मिणीदेव्युक्तेश्च। एवं मधुररतिकृतोऽयं तयोर्विपर्य्ययः स्फुट एव। पुनरत्र ग्रन्थान्ते व्यतिरेकोक्तिः सर्वत्रैव तदुभयवस्तुबोधनायैव॥

एवं यत्राऽकीर्त्तिरेव कीर्त्तिः, यत्र निग्रह एवानुग्रहः, यत्राकवय एव कवयः, यत्र शिष्या एव गुरवः, इत्यादीनि तथा तदुदाहरणानि च। यथा—

"नन्दकुमारेण समं ममास्तु मिथ्याभिशापोऽपि।
इति पश्यति मुहुरबला भाद्रचतुर्थीकलानाथम्॥"

तथा—

"मृदुचरणारुणताडनदण्डः कृपयैव चण्डि! मयि रसिके।
प्रतिकूलता तवेयं व्यञ्जितपरमानुकूलता जयति॥"

तथा—

"विलोक्य कान्तं कवयन्तु कोविदाः
ससंभ्रमा हन्त मनस्तु मामकम्।
यदैव तद्वर्णयितुं समीहते
गभीर्यमश्नाति नदीव रुन्धती॥"

तथा—

"यच्चास्मामुपदेशाय भवता महामर्पितम्।
जगद्गुरो! गुरुत्वं तन्मया ताभ्यः समर्पितम्॥"

एवं तस्मिन्प्रकारे रतिरता विपर्य्ययाः सहस्रशः सन्ति कियन्तो लेखनीयाः। इदं दिग्दर्शनमात्रमित्यलं पल्लवितेन। तद्दिग्दर्शन-

मात्रलिखनन्तु रतिपर्य्यायस्य प्रेम्णो निसर्गकुटिलत्वकथनायैव। तदुक्तं श्रीरूपगोस्वामिचरणैः—

"अहेरिव गतिः प्रेम्णः स्वभावकुटिला भवेद्।" इति।

एवमेवाभिप्रेत्य प्रायः प्रेमवतो लक्षणमपि दुरूहमिति तैरेवोक्तम्—

"धन्यस्यायं नवः प्रेमा यस्योन्मीलति चेतसि।
अन्तर्वाणिभिरप्यस्य मुद्रा सुष्ठु सुदुर्गमा॥" इति।

तत एव यत्र स्तुतिरेव निन्दा इत्यादिकतिचित्प्रकरणानामुदाहरणरूपं पद्यं विदग्धमाधवे प्रकटं तैरेवालेखि।

यथा—

"स्तोत्रं यत्र तटस्थतां प्रकटयच्चित्तस्य धत्ते व्यथां
निन्दापि प्रमुदं प्रयच्छति परीहासश्रियं बिभ्रती।
दोषेण[1]गुरुतां गुणेन गुरुतां केनाप्यनातन्वती
प्रेम्णः स्वारसिकस्य कस्यचिदियं नैसर्गिकी[2] प्रक्रिया॥" इति।

अद्भुतेन मयोन्नीतमद्भुतं प्रेमपत्तनम्।
प्रियः प्रविश्य प्रीणातु रतिः क्रीणातु मामिति॥

द्रष्टुं तथा व्यष्टुमिदं मुधैव दुष्टा निकृष्टा न निरोधनीयाः।
कष्ट न शिष्टानपि यत् सयष्टिर्वेष्टि प्रवेष्टुं दुरदृष्ट एव॥

सुवर्णसुमनोऽर्चितं सुखदचित्रपर्णाञ्चितं
मनोज्ञगुरुतागुणं मुखरवीरवित्रासनम्।
शरासनमुमापतेरिव ममेदमत्यद्भुतं
सुविक्रमकृशेतरैरपि न पस्पृशे पुस्तकम्॥

विशत भो रसवित्तमसत्तमाः प्रणयपत्तनमेतदनुत्तमम्।
यचसि ते पिकताधिकता मते रसिकता यदते सिकतायते॥

१—क्षोपेण क्षयिताम्—इति प्रचलितपुस्तकेऽस्ति पाठः।
२—विक्रीडति प्रक्रिया— ,,

संसृजन्तु समदृष्टयः स्रजं कुन्दकिंशुककदम्बचम्पकैः ।
कोविदास्तु युगसङ्गमोचितं दाम कर्तुमिह वामलोचनाः ॥

काचं मणिं काञ्चनमेकसूत्रे गुम्फन्ति मन्दाः किमुतात्र चित्रम् ।
विरोधवित् पाणिनिरेक सूत्रे श्वानं युवानं मघवानमाह ॥

इति श्रीरसिकोत्तंसविरचितं प्रेमपत्तनं प्रेमसर्वस्वपूर्णं सम्पूर्णतामगात् ।
प्रेमदाम्यै नमः श्रीवृषभानुकिशोर्य्यै भूयो भूयो नमो नमः ।

शुभं भूयात् ।

समाप्तोऽयं ग्रन्थः



प्रेमपत्तनस्थश्लोकादीनामकारादिक्रमेण सूची

प्रेमपत्तनटीकायां प्रसङ्गादुद्धृतानां श्लोकादीना-मकारादिक्रमेण सूची

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
पुनस्तेनव	पुनस्तेनैव	१०	२५
यत	यत	११	१३
यथेत्यव्ययादनन्तरं	यथा वेत्यव्ययादनन्तरं	११	२६
ज्ञातये [प्रोक्तम् ,]	ज्ञायते ?	१४	१४
विणा विजिज्जई	विणा ण विजिज्जई	१५	३
···परिरम्भिताङ्करित	···परिरम्भिताङ्कुरित	२१	१
विकटाकपाटपटली	विकटा कपाटपटली	२३	८
कान्तविषयककथा	कान्तविषयिकया	२६	१३
···न मस्कृताः	नमस्कृताः	२८	१८
गुरूतर	गुरुतर	२९	७
नुतानता	नुता नताः	२९	१०
···भिन्नाभ्यम्	···भिन्नाभ्याम्	३०	३
·· कामना गन्धवत्तया	···कामनागन्धवत्तया	३१	३
योग प्रभावेण	योगप्रभावेण	३१	१८
प्रकृत मनुसरामः	प्रकृतमनुसरामः	३१	२६
ऽथपतेत्	ऽथ पतेत्	३२	१९
यत्र काऽभद्र···	यत्र क वाऽभद्र···	३२	२०
यत	यत्त	३४	१९
नृत्यक्र्यो ! नवरमन	नृत्यक्र्यो नवरमन !	३७	२१
मपर्पयिष्ये	समर्पयिष्ये	४३	१६
मादर	मादरं	५५	३
संप्रलपितम्	सम्प्रलपिताम्	६५	१९

अशुद्धम्	शुद्धम्	पृष्ठे	पङ्क्तौ
वियागाधि	वियोगाधि	६७	१४
मारचय	मा रचय	७२	२०
निरूपमो	निरुपमो	७५	८
अश्रतचरः	अश्रुतचरः	७५	१६
निपेद्धम्	निषेद्धुम्	७७	१२
असाद्य	आसाद्य	८३	८
घृतम	घृत्तम्	८९	१९
···मातन्वन् मम	···मातन्वन्मम	१०२	५
मानतो	माननतो	१०४	२३
धार्तिंयन्ति	आर्तिमन्ति	१०९	९
राधावास गृहे	राधाऽऽवासगृहे	१२०	१६
सर्वविस्मारकान्यासवानि	सर्वविस्मारकाण्यासवानि	१२०	२३
···भीतो लज्जया	···भीतोऽलज्जया	१२८	१
अदाय	आदाय	१४९	६
सुदाहृदम्	सुदाहृतम्	१६६	२४

अच्युतग्रन्थमालायां प्रकाशमुपगतानां पुस्तकानां सूचीपत्रम्

(क) विभागे

१. भगवन्नाम कौमुदी—[भगवन्नाममहिमप्रतिपादकमनुपमं पुस्तकम्]मीमांसापारावारपारीणेन श्रीलक्ष्मीधरविदुषा विरचिता, मीमांसाधुरीणानन्तदेवनिर्मितया प्रकाशाख्यव्याख्यया समेता। पृ० सं० १५०, मूल्यम्—१० आणकाः

२. भगवद्भक्तिरसायनम्—[भक्तेः सामान्येन विशेषेण च सोपपत्तिकं सपरिकरं स्वरूपप्रतिपादकमनुत्तमं पुस्तकम्, भक्तवराणामतीवोपयोगि भृशमुपादेयञ्च] आचार्य्यवरमधुसूदनसरस्वतीरचितम्, आचार्यवरदामोदरलालगोस्वामिभिः सम्पादितम्। पृ० सं० १८०, मू०—१२ आ०

३. शुल्वसूत्रम्—[कात्यायनश्रौतसूत्रपरिशिष्टरूपम्] महर्षिश्रीकात्यायनप्रणीतम्। वेदाचार्यश्रीविद्याधरशर्म्मविरचितया सरलया वृत्त्या समेतम्। तैरेव सम्पादितम्। पृ० सं० ६०, मू०—४ आ०

४. कात्यायनश्रौतसूत्रम्—[अत्र दर्शपूर्णमासाद्यारभ्य अश्वमेधपितृमेधान्ताः कियन्तो यागाः सविधानं निरूपिताः] महर्षिश्रीकात्यायनप्रणीतम्। वेदाचार्य्यश्रीविद्याधरशर्म्मविरचितया स-

रलया वृत्त्या समेतम् । तैरेव सम्पादितम् । विपुलाकाराणि १००० पृष्ठानि,
मू०—६ रू०

५. प्रत्यक्तत्त्वचिन्तामणिः—(१ मो भागः) [शाङ्करभाष्यानुसारी वेदान्तस्य सुसरलः पद्यमयो ग्रन्थः] श्रीसदानन्दव्यासविरचितः, स्वोपज्ञस्वप्रभाख्यव्याख्यसहितः । साहित्याचार्यश्रीकृष्णपन्तशास्त्रिणा सम्पादितः पृ० ३४०,
मू०—२ रू०

६. भक्तिरसामृतसिन्धुः—[भक्तिरसपरिपूर्णोऽयं ग्रन्थो नूनं पीयूषसिन्धुरेव] श्रीरूपगोस्वामिप्रणीतः । श्रीजीवगोस्वामिकृतदुर्गमसंगमनीटीकोपेतः । आचार्यवरगोस्वामिदामोदरलालशास्त्रिभिः सम्पादितः । पृ० ६२५, मू०—३ रू०

७. प्रत्यक्तत्त्वचिन्तामणिः—[२यो भागः] पृ० ४५०,
मू०—२ रू० ४ आ०

८. तिथ्यर्कः—[तिथिनिर्णयपरोऽपूर्वः प्रामाणिको ग्रन्थः] श्रीदिवाकरविरचितः । साहित्याचार्यश्रीकृष्णपन्तशास्त्रिणा संपादितः । पृ० २४०,
मू०—१ रू० ८ आ०

९. परमार्थसारः—[अद्वैतवेदान्तस्यातिप्राचीनं पुस्तकम्] श्रीमद्भगवत्पतञ्जलिप्रणीतः । श्रीराघवानन्दविरचितविवरणेन न्यायव्याकरणाचार्यश्रीसूर्यनारायणशुक्लविरचितया टिप्पण्या समेतः । तैरेव सम्पादितः । पृ० ११०, मू०—६ आ०

१०. प्रेमपत्तनम्—[कृष्णभक्तिपरिप्लुतं चैतन्यसम्प्रदायस्य किमप्य-

पूर्वं ग्रन्थरत्नम्] श्रीरसिकोत्तंसविरचितं-
स्वोपज्ञव्याख्यानेनोल्लसितम् । साहित्याचार्य
श्रीकृष्णपन्तशास्त्रिणा सम्पादितम् । पृ० २३०
मू०—१ रू०

(ख) विभागे

१. खण्डनखण्डखाद्यम्—("धीरा यथोक्तमपि कीरवदेतदुक्त्वा, लोकेषु दिग्विजयकौतुकमातनध्वम्" इत्यादिग्रन्थकारप्रतिज्ञयैव तन्महिमा प्रतीयते, वेदान्तग्रन्थेष्वत्युच्चां कोटिमाटीकतेऽयं ग्रन्थः ।] श्रीकवितार्किकसार्वभौमश्रीहर्षप्रणीतम् । पण्डितप्रवरश्रीचण्डीप्रसादशुक्लकृतभाषानुवादसहितम् । विपुलाकाराणि ४२५ पृ०, मू०—२ रू० १२ आ०

२. काशीकेदारमाहात्म्यम्—[ब्रह्मवैवर्त्तपुराणान्तर्गतम्, शिवभक्तानामतीवोपयोगि] साहित्यरञ्जनश्रीविजयानन्दत्रिपाठिविरचितभाषानुवादेन सहितम् । साहित्याचार्यश्रीकृष्णपन्तशास्त्रिणा सम्पादितम् । पृ० २६+६०४, मू०—२ रू० ८ आ०

३. सिद्धान्तबिन्दुः—[अद्वैतवेदान्तस्य प्रमेयबहुलमत्युत्तमं ग्रन्थरत्नम्] आचार्यप्रवरमधुसूदनसरस्वतीप्रणीतः । भाषानुवादेन विभूषितः । साहित्याचार्यश्रीकृष्णपन्तशास्त्रिणा संपादितः । पृ० २५+२४८+६, मू०—१ रू० ६ आ०

४. प्रकरणपञ्चकम्—[आचार्यप्रवरशङ्करपादप्रणीतानामात्मबोधप्रौढानुभूतिलघुवाक्यवृत्तिसत्त्वोपदेशापरोक्षा-

नुभूतीनां पञ्चप्रकरणानां संग्रहरूपम्, वेदान्त-पदार्थजिज्ञासूनामतीवोपयोगि।] भाषानुवादेन विभूषितम्। साहित्याचार्यश्रीकृष्णपन्त-शास्त्रिणा सम्पादितम्। पृ० ११०, मू०—८आ०

मुद्रणावस्थायां विद्यमाना ग्रन्थाः—

(क) विभागे

१. षट्सन्दर्भः—विविधटीकाभिरूपेतः।

(ख) विभागे

२. भक्तिरसायनम्—भाषानुवादयुतम्।

प्राप्तिस्थानम्—(१) अच्युतग्रन्थमाला कार्यालय, काशी
(२) गीताप्रेस, गोरखपुर।

मू०—अच्युतग्रन्थमालायाः स्थायिग्राहकेभ्यः सर्वे ग्रन्थाः प्रतिरूप्यकं चतुराणकन्यूनेन मूल्येन दास्यन्ते।